मार्गमिति ॥ हे **जलद तावत्** इदानीं **कथयतः** । मत्त इति शेषः । [**त्वत्प्रयाणानुरूपं**] त्वत्प्रयाणस्यानुरूपमनुकूलं **मार्गम्** अध्वानम् ॥ 'मार्गो मृगपदे मासि सौम्यर्क्षेऽन्वेषणेऽध्वनि ।' इति यादवः ॥ **शृणु** । **तदनु** मार्गश्रवणानन्तरं [**श्रोत्रपेयं**] श्रोत्राभ्यां पेयं पानार्हम् । अतितृष्णया श्रोतव्यमित्यर्थः ॥ पेयग्रहणात्संदेशस्यामृतसाम्यं गम्यते ॥ **मे संदेशं** वाचिकम् ॥ 'संदेशवाग्वाचिकं स्यात्' इत्यमरः ॥ **श्रोष्यसि** । **यत्र** मार्गे **खिन्नः खिन्नः** अभीक्ष्णं क्षीणबलः सन् । 'नित्यवीप्सयोः' इति नित्यार्थे द्विर्भावः ॥ **शिखरिषु** पर्वतेषु **पदं न्यस्य** निक्षिप्य । पुनर्बललाभार्थं क्वचिद्विश्रम्येत्यर्थः । **क्षीणः क्षीणः** अभीक्ष्णं कृशाङ्गः सन् ॥ अत्रापि कृदन्तत्वात्पूर्ववद्द्विरुक्तिः ॥ **स्रोतसां परिलघु** गुरुत्वदोषरहितम् । उपलास्फालनखेदितत्वात्पथ्यमित्यर्थः ॥ तथा च वाग्भटः—'उपलास्फालनक्षेपविच्छेदैः खेदितोदकाः । हिमवन्मलयोद्भूताः पथ्या नद्यो भवन्त्यमूः ॥' इति । **पयः** पानीयम् **उपभुज्य** शरीरपोषणार्थमभ्यवहृत्य **च गन्तासि** गमिष्यसि । गमेर्लुट् ॥

Śl. 13. He now points out to the cloud the route to be taken by it. "We now begin the geographical part of the poem, which, as far as it can be made out through the difference of ancient and modern appellations, seems to be very accurately conceived. The two extreme points of the cloud's progress are the vicinity of Nagpur, as mentioned in the note on verse 1, and the mountain Kailāsa, or rather, the Himālaya range. During this course, the poet notices some of the most celebrated places, with the greater number of which we are still acquainted. In the first instance, we have here his direction due north from the mountain of Rāmagiri"—Wilson. **अनुरूपं**—रूपस्य सदृशो योग्यो वा अनुरूपस्तं, fit for, suited to (so that you can go with ease, avoiding a circuitous way). **श्रोत्रपेयं**—*Lit.* fit to be drunk, as it were, by the ear; hence, extremely sweet to hear; the use of the word **पेय** implies the comparison of the message to nectar. When a thing is extremely gratifying to the ear this expression is used; *cf.* कर्णामृतं सूक्तिरसं विमुच्य Vikr-Ch. I. **श्राव्यबन्ध**—is the reading of the **पार्श्वाभ्युदय**, which means 'the arrangement of the words in which is fit to be heard', *i. e.* pleasing. But the Yaksha is not likely to refer in his present mood to the beauty of the composition of the message, as to its import being charming. **खिन्नः खिन्नः**—Whenever worn out or fatigued. **शिखरिषु**—on mountains (and not 'trees' as some propose, which cannot be good resting-places for clouds). **परिलघु**—Very light (by being dashed against stones) and therefore wholesome. See com.

अद्रेः शृङ्गं [1]हरति पवनः किंस्विदित्युन्मुखीभि-
[2]र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।
स्थानादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन्स्थूलहस्ताव[3]लेपान् ॥ १४ ॥

14. Soar into the sky, with your face turned to the north, from this place, full of wet *Nichulas*, with your flutter gazed at with great astonishment by the simple-minded wives of the Siddhas, with their faces turned up to see if the wind was bearing away the peak of the mountain, and avoiding in your journey (the blows from) the tossings of the huge trunks of the quarter-elephants.

अद्रेरिति ॥ **पवनः** वायुः **अद्रेः** चित्रकूटस्य **शृङ्गं हरति किंस्वित्** । किंस्विच्छब्दो विकल्पवितर्कार्थादिषु पठितः । इति शङ्कया **उन्मुखीभिः** उन्नतमुखीभिः ॥ 'स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इति ङीप् ॥ [**मुग्धसिद्धाङ्गनाभिः**] मुग्धाभिर्मूढाभिः ॥ 'मुग्धः सुन्दरमूढयोः' इत्यमरः । सिद्धानां देवयोनिविशेषाणामङ्गनाभिः । **चकितचकितं** चकितप्रकारं यथा तथा ॥ 'प्रकारे गुणवचनस्य' इति द्विर्भावः ॥ **दृष्टोत्साहः** दृष्टोद्योगः सन् । [**सरसनिचुलात्**] सरसा आर्द्रा निचुलाः स्थलवेतसो यस्मिंस्तस्मात् ॥ 'वानीरे कविभेदे स्यान्निचुलः स्थलवेतसे' इति शब्दार्णवे ॥ **अस्मात् स्थानात्** आश्रमात् **पथि** नभोमार्गे **दिङ्नागानां** दिग्गजानां [**स्थूलहस्तावलेपान्**] स्थूला ये हस्ताः करास्तेषामवलेपानाक्षेपान् **परिहरन्** । 'हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि ।' इति, 'अवलेपस्तु गर्वे स्यात्क्षेपणे दूषणेऽपि च ।' इति च विश्वः ॥ उदङ्मुखः सन् । अलकाया उदीच्यत्वादित्याशयः ॥ **खम्** आकाशम् **उत्पत** उद्गच्छ ॥ अत्रेदमप्यर्थान्तरं ध्वनयति—रसिको निचुलो नाम महाकविः कालिदासस्य सहाध्यायी परापादितानां कालिदासप्रबन्धदूषणानां परिहर्ता यस्मिन्स्थाने तस्मात् स्थानादुदङ्मुखो निर्दोषत्वादुन्नतमुखः सन् पथि सारस्वतमार्गे दिङ्नागानाम् । पूजायां बहुवचनम् । दिङ्नागाचार्यस्य कालिदासप्रतिपक्षस्य हस्तावलेपान्हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् । 'अवलेपस्तु गर्वे स्याल्लेपने दूषणेऽपि च ।' इति विश्वः । अद्रेरद्रिकल्पस्य दिङ्नागाचार्यस्य शृङ्गं प्राधान्यम् । 'शृङ्गं प्राधान्यसान्वोश्च' इत्यमरः । हरति किंस्विदिति हेतुना सिद्धैः सारस्वतसिद्धैर्महाकविभिरङ्गनाभिश्च दृष्टोत्साहः सन्खमुत्पतोच्चैर्भवेति स्वप्रबन्धमात्मानं वा प्रति कवेरुक्तिरिति ॥ 'संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि । स्थित्वाऽनुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात् ॥' इत्येतच्छ्लोकनिर्माणात्तस्य कवेर्निचुलसंज्ञेत्याहुः ॥

---

१ वहति. २ दृष्टोच्छ्राय० ३ ०वलेहान्.

Sl. 14. अद्रेः शृङ्गं—This indicates that the cloud was very large. उन्मुखीभिः—When a Comp. has for its second member a word ending in अ and meaning part of the body, it being a subordinate member of the Comp., and when the final अ is not preceded by a conjunct consonant, the *fem.* is optionally formed by adding ई; as सुकेशी, सुकेशाः but सुगुल्फा; so उन्मुखा also. दृष्टोत्साहः—दृष्ट उत्साहो यस्य, whose enthusiasm in the mission, *i. e.* forcible or sprightly movement is observed or marked by; the reading दृष्टोच्छ्रायः—दृष्ट उच्छ्रायः उन्नतिः (lofty flight) यस्य—is perhaps better, as likely to attract the attention of the Siddha women. चकितचकितं—In great astonishment. मुग्ध—simple, not clever enough to discern things at once, and hence their supposition (अद्रेः शृङ्गं &c.); or innocent, artless. *Cf.* मुग्धासु तपस्विकन्यासु Śāk. I. Valla. explains मुग्ध as षोडशवार्षिकी, a young woman of sixteen, but that is not intended here. सिद्धाङ्गनाभिः—The wives of the Siddhas. सिद्ध—*p. p. p.* of सिध्; the aff. त being added कर्तरि (in the sense of the agent); one who has got superhuman power, or the word may be derived from सिद्धि by adding अ in the sense of 'one who has got that'. The Siddhas are a class of semi-divine beings characterized by great purity and holiness and possessed of the eight superhuman faculties (Siddhis), *viz.* अणिमा महिमा चैव लघिमा गरिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः ॥ Sometimes कामावसायिता is mentioned instead of गरिमा. They are said to inhabit the region between the earth and the sun. See also our notes on Kum. 1. 5. सरसनिचुल—The *Nichula* is a kind of cane growing on watery land. उदङ्मुखः—उदक् मुखं यस्य. दिङ्नागानां—The eight directions are supposed to have each a presiding elephant (with his female) thus mentioned by Amara—ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ As the elephants are of vast proportions, their trunks also must be correspondingly huge, and hence the warning given. According to one supposition, the elephants suck up water from the oceans with their trunk, and give it to the clouds that it should be scattered all round. *Cf.* हस्ती समुद्रादादाय करेण जलमीप्सितम् । दद्याद्घनाय तद्द्याद्वातेन प्रेरितो घनः । स्थाने स्थाने पृथिव्यां च काले काले यथोचितम् ॥ अवलेपान्—Tossing or thrusting them forward. Malli. thinks that this verse contains a covert attack on Dinnāgāchārya, the poet's rival. He probably bases his remarks on some tradition current in his time connecting the name of Kālidāsa with Dinnāga. This is the side-

meaning given by him—" From this place where dwells the poet Nichula, ever ready to appreciate merits (सरस), ascend to heaven, O my Muse, with head gloriously raised up, disproving in the course of thy journey the salient faults indicated by Dinnāga, and with thy vigour marked with great admiration by fair-minded critics and women, with their faces raised up to see whether in thy rapid march the glory of the pedantic Dinnāga is being obscured by thee." [अद्रिः—Mountain-like; only great in appearance without any inward brilliancy. शृङ्गं—a horn which distinguishes an animal, hence his reputation. पवनः—the rapid spread of the poet's fame. मुग्ध—fair. सिद्ध—Men of literary attainment. सरस—Highly appreciating or with poetic susceptibilities. उदङ्मुखः—with the head gloriously raised up, the faults being shown to be without foundation. खं—To heaven; *cf.* उज्जिहीते जगज्जित्वा तस्य कीर्तिः सुरालयम् ॥ Kavirahasya. पथि—The path of literature. स्थूल—Broad; not indicating any critical acumen.] About Nichula nothing is known beyond what Malli. says here. Dinnāga, or more properly Dinnāgāchārya, was a pupil of the Buddhist logician Asanga, a celebrated Buddhist writer. He wrote a treatise on Sanskrit logic entitled 'Pramāṇa-Samuchchaya'. Dharma-Kirti, another celebrated Buddhist writer, wrote Vārttikas on his work, and both these writers are attacked by Kumārila. Dinnāga is assigned by some to the 5th and by others to the 6th century A. D, As Kāli. is now shown to belong to the 1st century B. C., it will be seen that Dinnāga was not his contemporary.

रत्नच्छाया[1]व्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात्प्रभवति धनुःखण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते[2] ते ॥
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णोः ॥ १५ ॥

15. Here appears to view in front, from the top of an ant-hill, a fragment of Indra's bow (a fractional rain-bow), attractive like an intermingling of the streaming rays of gems by which your dark body will attain an exceedingly charming splendour, like that of Vishṇu in his cowherd's character (Kṛishṇa) by peacock's features with their glowing splendour.

---

१ ०च्छाय. २ आलप्स्यते.

रत्नेति ॥ [रत्नच्छायाव्यतिकरः] रत्नच्छायानां पद्मरागादिमणिप्रभाणां व्यतिकरो मिश्रणम् इव प्रेक्ष्यं दर्शनीयम् । आखण्डलस्य इन्द्रस्य एतत् धनुःखण्डम् ॥ एतदिति हस्तेन निर्देशो विवक्षितः । पुरस्तात् अग्रे वल्मीकाग्रात् वामलूरविवरात् ॥ 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् ।' इत्यमरः ॥ प्रभवति आविर्भवति । येन धनुःखण्डेन ते तव श्यामं वपुः ॥ स्फुरितरुचिना उज्ज्वलकान्तिना बर्हेण पिच्छेन । 'पिच्छबर्हे नपुंसके' इत्यमरः । गोपवेषस्य विष्णोः गोपालस्य कृष्णस्य श्यामं वपुः इव अतितरां कान्तिं शोभाम् आपत्स्यते प्राप्स्यते ॥

Śl. 15. रत्नच्छाया—the streaming light of gems. व्यतिकर—a mixture of. The reading रत्नच्छायव्य० will also do; for by the rule विभाषा सेनासुराछायाशालानिशानाम्. Pàn. II. 4. 25, a Tat. ending in छाया may optionally be *neuter*. We cannot have recource to 'छाया बाहुल्ये,' as the lustre of each gem is meant here as blending with that of another. वल्मीकाग्रात्—'From the top of an ant-hill' from the gem in the hood of the serpent within it. One of the theories of the formation of the rainbow is that it proceeds from the gems in the hood or hoods of great serpents; *cf.* Varâha-mihira—सूर्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः साभ्रे । वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः । केचिदनन्तकुलोरगनिःश्वासोद्भूतमाहुराचार्याः । Brih. XXV. 1. 2; 'इन्द्रचापं किल वल्मीकान्तर्व्यवस्थितमहानागशिरोमणि-किरणसमूहात्समुत्पद्यते' Sâro.; Vall. and Sâro. also interpret वल्मीकः as सातपो मेघः; but without mentioning particular authorities. धनुःखण्डं—a piece of, or broken rainbow. आखण्डलः—Indra, आखण्डयति भेदयति पर्वतान्; fr. खण्ड् with आ and the Uṇâdi aff. अल (कलच्) or इलच्. बर्ह—a peacock's feather. स्फुरितरुचिना—स्फुरिता throbbing रुचिर्यस्य, of glittering splendour. गोपवेषस्य—गाः पाति इति गोपः fr. पा to protect with aff. अ, (आतोऽनुपसर्गे इति कः); गोपस्येव वेषो यस्य. This refers to Vishnu's appearing on earth as Krishṇa and as a cowherd in his juvenile character. As such he is described as wearing a head-dress of peacocks' feathers. *Cf.* चन्द्रचारु मयूरशिखण्ड-कमण्डलवलयितकेशं प्रचुरपुरंदरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् । Gitagovinda III; also B. P. X. बर्हप्रसूननवधातुविचित्रिताङ्ग &c. Ch. XIV. śl. 47; बर्हापीडं नटवरवपुः कर्णयोः कर्णिकारं &c. Ch. XXI śl. 5.

त्वय्यायत्तं कृषिफलमिति भ्रूविकारानभिज्ञैः
प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः ।
सद्यःसीरोत्कषणसुरभि क्षेत्रमारुह्य मालं
किंचित्पश्चाद्व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥

१ भ्रूविलासानभिज्ञैः २ प्रवलय गतिम्. ३ किंचिदेव.

16. Intently gazed upon by the country-women, since the fruit of husbandry depends upon you, with eyes glistening through joy (*or*, affection) and ignorant of sportive movements, mount the field of Māla, fragrant by the ground being just turned up with the plough, and then having travelled a little westward, proceed again in the northerly direction with a quickened pace.

त्वयीति ।। [कृषिफलं] कृषेर्हलकर्मणः फलं सस्यं त्वयि । अधिकरणविवक्षायां सप्तमी । आयत्तम् अधीनम् । 'अधीनो निघ्न आयत्त' इत्यमरः । इति हेतोः । [प्रीतिस्निग्धैः] प्रीत्या स्निग्धैः । अकृत्रिमप्रेमार्द्रैरित्यर्थः । [भ्रूविकारानभिज्ञैः] भ्रूविकाराणां भ्रुविलासानामनभिज्ञैः । पामरत्वादिति शेषः [जनपदवधूलोचनैः] जनपदवधूनां पल्लीयोषितां लोचनैः पीयमानः सादरं वीक्ष्यमाणः सन् । मालं मालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलम् ।। 'मालमुन्नतभूतलम्' इत्युत्पलमालायाम् [सद्यःसीरोत्कषणसुरभि] सद्यस्तत्कालमेव सीरैर्हलैरुत्कर्षणेन कर्षणेन सुरभि घ्राणतर्पणं यथा तथा आरुह्य । तत्राभिवृष्येत्यर्थः । 'सुरभिर्घ्राणतर्पणः' इत्यमरः । किंचित्पश्चात् लघुगतिः तत्र निर्वृष्टत्वात्क्षिप्रगमनः सन् ।। 'लघु क्षिप्रतरं द्रुतम्' इत्यमरः । भूयः पुनरपि उत्तरेण एव उत्तरमार्गेणैव व्रज गच्छ । 'तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया ।। यथा कश्चिद्बहुवल्लभः पतिः कुत्रचित्क्षेत्रे कलत्रे गूढं विहृत्य । 'क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयोः' इति विश्वः । दाक्षिण्यभङ्गभयान्नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं संचरति तद्वदिति ध्वनिः ।।

Śl. 16. भ्रूविकारा०—भ्रुवोर्विकाराः sportive or coquettish movement भ्रूविकाराः; now see Malli. *Cf.* स्त्रीभूषणं चेष्टितमप्रगल्भं चारूण्यवक्राण्यपि वीक्षितानि । ऋजूंश्च विश्वासकृतः स्वभावान्गोपाङ्गनानां मुमुदे विलोक्य ।। Bhaṭṭi II. 15. सद्यः सीरो०—so as to make it fragrant or sweet-smelling by the earth being turned up by the plough. Malli. takes this as an *adv.* and rightly. For when thus taken the cloud becomes the cause (indirect, of course) of the tilling of the ground; the being fragrant of the ground was the joint result of the ground being tilled and at the same time being sprinkled over with rain-drops from the clouds. If this be taken as an adj., as some commentators do, the meaning will be 'the ground was fragrant by its being tilled merely and that the Cloud had nothing to do with it.' The reading of the Pārśva, according to Wilson, and some commentators, is ०सुरभिक्षेत्रं, a Bah. qualifying Māla. 'The Māla district, the field of which &c.' In this case सद्यः will have to be taken in the sense of 'immediately on your showering water on them. मालं—Malli.

takes Māla to mean 'a plateau or an elevated hilly spot;' while some commentators interpret it as मालाख्यं देशं, the district of that name. Malli.'s sense is better, as the cloud would like to ascend an elevated spot rather than a district. Perhaps no particular district is meant. However, *cf.* Wilson—"It is not easy after the lapse of ages to ascertain precisely the site of several places enumerated in the poem before us. The easterly progress of the cloud, and the subsequent direction by which he is to reach the mountain Āmrakūta, prove that the place here mentioned must be somewhere in the vicinity of Ratanpur, the chief town of the northern half of the province of Chhattisgad * *. The only modern traces that can be found of it are in a place called Malda, a little to the north of Ratanpur, &c., &c." किंचित्पश्चात्—"A little to the west or westward." Some translate पश्चात् by 'afterwards', but then भूयः becomes meaningless.

त्वामासारप्रशमितवनोपप्लवं साधु मूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः ।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किं पुनर्यस्तथोच्चैः ॥ १७ ॥

17. The mountain Āmrakūṭa will gladly bear you, fatigued by the journey, on its peak, you having extinguished its wild-fires with your showers. Even an insignificant man, out of regard to previous favours, turns not his back on (*lit.* his face from) a friend who comes for shelter, much less will one so exalted (noble).

त्वामिति ॥ आम्राश्चूताः कूटेषु शिखरेषु यस्य स आम्रकूटः नाम सानुमान् पर्वतः 'आम्रश्चूतो रसालोऽसौ' इति, 'कूटोऽस्त्री शिखरं शृङ्गम्' इति चामरः । [आसारप्रशमितवनोपप्लवम्] आसारः धारावृष्टिः । 'धारासंपात आसारः' इत्यमरः । तेन प्रशमितः वनोपप्लवो दावाग्निर्येन तम् । कृतोपकारमित्यर्थः । [अध्वश्रमपरिगतं] अध्वश्रमेण परिगतं व्याप्तं त्वां साधु सम्यङ् मूर्ध्ना वक्ष्यति वोढा ॥ वहेः लृट् । तथा हि क्षुद्रः कृपणः अपि । 'क्षुद्रो दरिद्रे कृपणे नृशंसे' इति यादवः । संश्रयाय संश्रयणाय मित्रे सुहृदि ॥ 'अथ मित्रं सखा सुहृत्' इत्यमरः ॥ प्राप्ते आगते सति । प्रथमसुकृतापेक्षया पूर्वोपकारपर्यालोचनया विमुखः न भवति । यः तथा तेन प्रकारेण उच्चैः उन्नतः स आम्रकूटः किं पुनः । विमुखः न भवतीति किमु वक्तव्यमित्यर्थः । एतेन प्रथमावसथे सौख्यलाभात्ते कार्यसिद्धिरस्तीति सूचितम् । तदुक्तं निमित्त-

निदाने—' प्रथमावसथे यस्य सौख्यं तस्याखिलेऽध्वनि । शिवं भवति यात्रायामन्यथा त्वशुभं ध्रुवम् ' ॥ इति ॥

Śl. 17. वनोपप्लव:—wild fire, a forest-conflagration. उपप्लव *lit.* 'what causes destruction, injury; *cf.* Ragh. V. 6 (वाय्वादिरुपप्लव:) आम्रकूट:—Wilson rightly identifies this with the mountain Amarakantaka (a corrupt form of Āmrakūṭa), from which the Narmada and the other rivers spring and which forms the eastern part of the Vindhya mountain. The name means 'whose summits (and the surrounding forests) abound with mango-trees' (आम्रा: कूटेषु यस्य); some derive it as आम्राणां कूटो राशिर्यत्र ०पेक्षया—taking into consideration, having regard for (former favours). उच्चै:—This *indec.* has often the force of an *adj.;* (1) high; (2) noble-minded. *i. e.* lofty in body and mind.

छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-
स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे ।
नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां
[1]मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

18. With you resembling a braid of oiled hair resting on its peak, and with its skirts covered with the groves of wild mango-trees bristling with ripe fruit, the mountain, looking thereby like the breast of the earth dark in its centre (nipple) and white in the rest of its expanse, will certainly attain to a state fit to be gazed at by the pairs of celestials.

छन्नेति ॥ हे मेघ [परिणतफलद्योतिभिः] परिणतैः परिपक्वैः फलैर्द्योतन्त इति तथोक्तैः । आषाढे वनचूताः फलन्ति पच्यन्ते च मेघवातेनेत्याशयः । काननाम्रैः वनचूतैः छन्नोपान्तः आवृतपार्श्वः अचलः आम्रकूटाद्रिः स्निग्धवेणीसवर्णे मसृणकेशबन्धच्छाये । श्यामवर्ण इत्यर्थः ॥ ' वेणी तु केशबन्धे जलस्रुतौ ' इति यादवः । त्वयि शिखरं शृङ्गम् आरूढे सति । ' यस्य च भावेन भावलक्षणम् ' इति सप्तमी ॥ मध्ये श्यामः [शेषविस्तारपाण्डुः] शेषे मध्यादन्यत्र विस्तारे परितः पाण्डुः हरिणः । ' हरिणः पाण्डुरः पाण्डुः ' इत्यमरः । भुवः स्तन इव । [अमरमिथुनप्रेक्षणीयां] अमरमिथुनानाम् खेचराणामिति भावः । प्रेक्षणीयां दर्शनीयाम् अवस्थां नूनं यास्यति । मिथुनग्रहणं कामिनामेव स्तनत्वेनोत्प्रेक्षा संभवतीति कृतम् । यथा परिश्रान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन्स्वपिति तद्वद्भवानपि भुवो नायिकायाः स्तन इति ध्वनिः ॥

---

१ मेघश्यामः.

Sl. 18. काननाम्रैः—कानने भवा आम्राः काननाम्राः तैः. स्निग्धवेणी०—स्निग्धा (oiled and therefore shining) चासौ वेणी तया सवर्णे. मध्ये श्यामः—*i. e.* on account of the dark cloud resting on its peak. शेषविस्तार०—on account of the prominent appearance of the ripe fruit of the mango-trees covering its slopes. स्तन इव—*Cf.* स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ । Ragh. IV. 51. *Additional Śloka between 18-19.* अध्वक्लान्तं—अध्वना (by the journey) क्लान्तः तम्. श्लाघमानः—praising you. नैदाघम्—निदाघस्यायं नैदाघः तम्; relating to the hot season. सद्भावार्द्र—सद्भाव honesty or sincerity of purpose, a disinterested desire to do good, तेन आर्द्रः wet, *i. e.* pleasing. न चिरेण—*i. e.* quickly.

स्थित्वा तस्मिन्वनचरवधूभुक्तकुञ्जे मुहूर्तं
तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।
रेवां द्रक्ष्यस्युपलविषमे विन्ध्यपादे विशीर्णां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १९ ॥

19. Having for a while rested on it (*i. e.* Āmrakūṭa) whose arbours are enjoyed by the wives of the foresters, and thereafter crossed the road beyond it at a pace quicker owing to the discharge of water, you will see the river Revā with its current broken into streams at the foot of the Vindhya, rugged with stones and resembling thereby the decoration on an elephant's body made with ornamental drawings. [Between 18 and 19, the following Śloka is read by some—" The mountain Āmrakūṭa, worthy of praise, will, O cloud, bear you, fatigued by the journey and approaching it, on its lofty peak : you too, should extinguish its summer-fires by your showers; for favour conferred on the great and pleasing by feeling of affection from which it proceeds, bears fruit (brings its reward) quickly ".]

स्थित्वेति ॥ हे मेघ [वनचरवधूभुक्तकुञ्जे] वने चरन्ति ते वनचराः ॥ 'तत्पुरुषे कृति बहुलम्' इति बहुलग्रहणाद् लुग्भवति । तेषां वधूभिर्भुक्ताः कुञ्जा लतागृहा यत्र तस्मिन् । 'निकुञ्जकुञ्जो वा क्लीबे लतादिपिहितोदरे ।' इत्यमरः । तत्र ते नयनविनोदोऽस्तीत्यर्थः । तस्मिन् आम्रकूटे मुहूर्तम् अल्पकालं । न तु चिरम् । स्वकार्यविरोधादिति भावः ॥ 'मुहूर्तमल्पकाले स्याद्घटिकाद्वितयेऽपि च ।' इति शब्दार्णवे । स्थित्वा विश्रम्य । [तोयोत्सर्गद्रुततरगतिः] तोयोत्सर्गेण 'त्वामासार-' इत्युक्त-

१ तोयोत्सर्गात्. २ लघुतर.

वर्षणेन द्रुततरगतिर्लाघवाद्धेतोरतिक्षिप्रगमनः सन् तस्मादाम्रकूटात्परमनन्तरं तत्परं वर्त्म मार्गं तीर्णः अतिक्रान्तः । [उपलविषमे] उपलैः पाषाणैर्विषमे [विन्ध्यपादे] विन्ध्यस्याद्रेः पादे प्रत्यन्तपर्वते । 'पादाः प्रत्यन्तपर्वताः' इत्यमरः ॥ विशीर्णां समन्ततो विसृमराम् ॥ एतेन कस्याश्चित्कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते ॥ रेवां नर्मदाम् ॥ 'रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ।' इत्यमरः ॥ गजस्य अङ्गे शरीरे [भक्तिच्छेदैः] भक्तयो रचनाः । रेखा इति यावत् । 'भक्तिर्निषेवणे भागे रचनायाम्' इति शब्दार्णवे ॥ तासां छेदैर्भङ्गिभिर्भाभिः विरचितां भूतिं शृंगारं इव भसितमिव वा ॥ 'भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि संपदि' इति विश्वः । द्रक्ष्यसि । अयमपि महांस्ते नयनकौतुकलाभ इति भावः ।

१८–१९ श्लोकयोर्मध्ये क्वचित्प्रक्षिप्तोऽयं दृश्यते—

'अध्वक्लान्तं[1] प्रतिमुखगतं सानुमानाम्रकूट-[2]
स्तुङ्गेन त्वां जलद शिरसा वक्ष्यति श्लाघमानः ।[3]
आसारेण त्वमपि शमयेस्तस्य नैदाघमग्निं
सद्भावार्द्रः[4] फलति न चिरेणोपकारो महत्सु ॥'

Sl. 19. वनचर०—See Malli.; here the Loc. termination is dropped by the rule तत्पुरुषे &c. Pān. VI. 3. 14. The कृत् affix ट (अ) is added to the root चर्; it is a comp. of the Upapada Tat. class. In a Tat. of this class, when a *kṛt* termination is added, the case-ending of the Upapada may sometimes be retained, sometimes dropped, or sometimes optionally retained (by the Bāhulaka Pramāṇa). On the strength of the rule the two forms वनचर and वनेचर are available. For वनेचर see Kir. I. 1, and for the operation of the बाहुलक see there our note on that word. मुहूर्त—A *Muhurta* is equal to two *Ghaṭikās* or forty-eight minutes. तोयोत्सर्ग—the discharge or pouring out of water. द्रुततर—greatly quickened, accelerated. रेवां—Revā (or 'Roaring') is another name of the river Narmadā, one of the sacred rivers of India. It rises in the mountain Amarakaṇṭaka, in Goṇdvana, and after a westerly course of about 800 miles, empties itself into the gulf of Cambay below Broach. A bath in the river is as purifying as a bath in the Ganges; *cf.* the verse quoted by some commentators—गङ्गास्नानेन यत्पुण्यं तद्रेवादर्शनेन च । यथा गङ्गा तथा रेवा तथा देवी सरस्वती । समं पुण्यफलं प्रोक्तं स्नानदर्शनचिन्तनैः ॥ उपलविषमे..विशीर्णाम्—The current of

---

१ अध्वश्रान्तम्. २ चित्रकूटः. ३ श्लाघ्यमानः. ४ सत्कारार्द्रः.

the river is often obstructed, as it has to force its way through a range of rocky hills or a tract of elevated ground. विन्ध्यपादे— The Vindhya is one of the seven principal ranges or mountains called 'Kulaparvatas'; they are महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः । विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः ॥ It separates Hindustan proper from the Deccan, and forms the southern limit of Madhyadeśa. See Manu. II. 21. Wilson quotes the following from Captain Blunt's tour—" Bindh, in Sanskrit named Vindhya, constitutes the limit between Hindustān and the Deccan. The most ancient Hindu authors assign it as the southern boundary of the region which they denominate Āryabhūmi or Āryāvarta. Modern authors, in like manner, make this the line which discriminates the northern from the southern nations of India. It reaches almost from the eastern to the western sea, and the highest part of the range deviates little from the line of the tropic. The mountainous tract, however, which retains the appellation, spreads much more widely; it meets the Ganges in several places towards the north, and the Godāvari is held to be its southern limit. " Sanskrit etymologists deduce its name from a circumstance to which I have just now alluded : it is called Bindhya, says the author of a commentary on the Amarakośa, because people think the progress of the Sun is obstructed by it. Suitably to this notion the most elevated ridge of this tropical range of mountains is found to run from a point that lies between Chhotānāgpur and Palamu, to another that is situated in the vicinity of Ujjain. But the course of the Narmadā river better indicates the direction of the principal range of the Vindhya hills. From Āmrakūṭa, where this river has its source, on the same spot with the Soṇe and the Hatsu, to the gulf of Cambay, where it disembogues itself into the sea, the channel of the Narmadā is confined by a range of hills, or by a tract of elevated ground in which numerous rivers take their rise; and by their subsequent course towards the Soṇe and Jamunā on one side, and towards the Tāpi and Godāvari on the other sufficiently indicate the superior elevation of that tract through which the Narmadā has forced its way.". For the legend about Vindhya's being jealous of the height of Meru and demanding the Sun to revolve round him, and his being forced to bend down by Agastya, see our note on Vindhya, at Ragh. VI. 61. भक्तिच्छेदैः–by ornamental drawings. भक्ति—decoration; ornamentation or the paint of ashes. *Cf*

भक्तिभिर्बहुविधाभिरर्पिता भाति भूतिरिव मत्तदन्तिनः Kum. VIII. 69. गृङ्गारितायतमहेभकराभमम्भः Siś. IV. 49.

> तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-
> र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
> अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां
> रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥

20. With your showers poured out, suck up the water of the river, scented with the fragrant ichor of wild elephants, and having its current obstructed by the clumps of *jambu* trees; the wind will not be able, O cloud, to shake you when thus inwardly full of substance. Every one void of substance becomes light, fullness contributes to heaviness (respect).

तस्या इति ।। हे मेघ **वान्तवृष्टिः** उद्गीर्णवर्षः सन् । कृतवमनश्च व्यज्यते । **तिक्तैः** सुगन्धिभिस्तिक्तरसवद्भिश्च ।। 'तिक्तो रसे सुगन्धौ च' इति विश्वः । **वनगजमदैः वासितं** सुरभितं भावितं च । हिमवद्विन्ध्यमलया गजानां प्रभवा इति विन्ध्यस्य गजप्रभवत्वादिति भावः [**जम्बूकुञ्जप्रतिहतरयं**] जम्बूकुञ्जैः प्रतिहतरयं प्रतिबद्धवेगम् । सुखपेयमित्यर्थः । अनेन लघुत्वं कषायभावना च व्यज्यते । तस्याः रेवायाः **तोयमादाय गच्छेः** व्रज । हे **घन** मेघ [**अन्तःसारं**] अन्तः सारः बलं यस्य तं **त्वाम् अनिलः** आकाशवायुः । शरीरस्थश्च गम्यते । **तुलयितुं न शक्ष्यति** शक्तो न भविष्यति । तथा हि । **रिक्तः** अन्तःसारशून्यः **सर्वः** अपि **लघुः भवति** । प्रकम्प्यो भवतीत्यर्थः । **पूर्णता** सारवत्ता **गौरवाय** अप्रकम्प्यत्वाय भवतीत्यर्थः । अयमत्र ध्वनिः- आदौ वमनशोधितस्य पुंसः पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानाल्लब्धबलस्य वातप्रकम्पो न स्यादिति । तथाह वाग्भटः—'कषायाश्च हिमास्तस्य विशुद्धौ श्लेष्मणो हिताः । किमु तिक्तकषाया वा ये निसर्गात्कफापहाः ।। कृतशुद्धेः क्रमात्पीतपेयादेः पथ्यभोजिनः वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिनः ।।' इति ।।

Sj. 20. This verse has a side-meaning also. The words तिक्त' वान्त, &c. have a double meaning. They imply that a man suffering from flatulence (or wind-affection) should have an emetic given to him first to induce vomitting, and then an astringent decoction to prevent the formation of phlegm. **तिक्तः**—(1) fragrant; (2) astringent, bitter. **मद**–an ichorous fluid exuding from the temples of elephants in rut. **वासितं**—(1) scented with; (2) mixed with or having the properties of other things transferred

---

१ तीक्ष्णैः. २ खण्ड.

to it. वान्तवृष्टिः--वान्त discharged, poured out. Words like वान्त (which means 'vomitted'.) are regarded as vulgar, and so constitute the fault called ग्राम्यता; but not when they are used in a metaphorical sense as here. *Cf.* Daṇḍin, Kāvyād. I. (95) (quoted by Malli. in his com. on śl. 26 *infra*). प्रतिहतरयं--(1) प्रतिहतः रयो यस्य whose rapid motion (current) is obstructed, (2) and thereby rendered lighter and astringent (by being dashed against the *kuñjas*). अन्तःसारः--Full of matter, having substance (strength) within by (1) not being empty; (2) not having mere gas or fat. तुलयितुं *Inf.* of तुलय् a denom. from the word तुला with णिच् तुलायति; this is not the root तुल् 10 Conj. which has तोलयति &c.; कथं तुलयति. तुलना इत्यादि । अतुलोपमाभ्यामिति निपातनाद्ङ्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् । Sid.–Kau. रिक्तः--(1) empty; (2) with obnoxious matter expelled. लघुः–(1) light, insignificant, (2) susceptible of change, active. पूर्णता–(1) fullness, (2) overloading of the stomach. गौरव--(1) greatness, (2) fatness. रिक्तः सर्वो–*Cf.* the Subhāshita–गुणयुक्तोऽप्यधो याति रिक्तः कूपे यथा घटः । गुणहीनोऽपि संपूर्णः (निर्गुणोऽपि भृतः पश्य *V. l.*) जनैः शिरसि धार्यते ।।.

नीपं दृष्ट्वा हरितकपिशं केसरैरर्धरूढै-
राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वाऽरण्येष्वधिकसुरभिं[1] गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते [2]जललवमुचः सूचयिष्यन्ति मार्गम् ॥ २१ ॥

21. Seeing the *Kadamba* flowers green and brown on account of half-grown filaments, eating (the leaves of) the *Kandalis* on marshy banks, with the first buds appearing on them, and smelling the strong odour of the ground in forests respectively, the bees, the deer and the elephants will indicate the path of you, showering drops of water.

नीपमिति ।। सारङ्गाः मतङ्गजाः कुरङ्गा भृङ्गा वा [च] ।। 'सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे' इति विश्वः । अर्धरूढैः एकदेशोद्गतैः केसरैः किञ्जल्कैः [हरितकपिशं] हरितं पालाशवर्णं कपिशं कृष्णपीतं च । 'पालाशो हरितो हरित्' इति, 'श्यावः स्यात्कपिशो धूम्रधूमलौ कृष्णलोहिते ।' इति चामरः ।। श्यामवर्णमिति यावत् । 'वर्णो वर्णेन' इति समासः ।। नीपं स्थलकदम्बकुसुमम् ।। 'अथ स्थल-कदम्बके । नीपः स्यात्पुलके' इति शब्दार्णवे । दृष्ट्वा संप्रेक्ष्य । विदित्वेति यावत् ।

---

१ दग्धार०. २ नवजलमुचः.

तथा कच्छेष्वनूपेषु अनुकच्छम् ।। 'अव्ययं विभक्ति–' इत्यादिना विभक्त्यर्थे अव्ययीभावः ।। 'जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः' इत्यमरः [आविर्भूतप्रथम-मुकुलाः] आविर्भूताः प्रथमा प्रथमोत्पन्ना मुकुला यासां ताः कन्दलीः भूमिकदलीः ।। 'द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपि ।' इति शब्दार्णवे। जग्ध्वा भक्षयित्वा ।। 'अदो जग्धिः–' इति जग्ध्यादेशः ।। अरण्येषु अधिकसुरभिम् अतिघ्राणतर्पणम् ।। 'दग्धारण्येषु' इति पाठे 'दग्धम्' इत्यधिकविशेषणम् ।। अर्थवशात्कन्दलीश्च दृष्ट्वैवेत्यन्वयो द्रष्टव्यः । उर्व्या भूमेः गन्धम् आघ्राय जललवमुचः मेघस्य ते तव मार्गं सूचयिष्यन्ति अनुमापयिष्यन्ति । यत्र यत्र वृष्टिकार्यं कन्दलीमुकुलनीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमित्यनुमीयत इति भावः ।

Śl. 21. नीपं *Kadamba* tree, which is said to blossom in the rainy season and put forth buds on being sprinkled over with the first drops of rain-water; *cf.* घनराजिनूतनपयःसमुक्षणक्षणबद्ध. कुडमलकजम्बडम्बरः । Mâl.-Mâdh. III. 7; and *infra*, II. 2 (सीमन्ते च &c.); also नीपः प्रदीपायते Mṛich. V. 14. कपिश–brown. केसर–filaments; the word is also written as केशर in this sense. कन्दलीः––These also flower in the rainy season. See Ragh. XIII. 29; Vik. IV. 5. *Kandali* is not the plantain tree, which never puts forth buds, but a small plant bearing beautiful small flowers of a bright-red colour and having very green leaves. अनुकच्छं––Malli. takes अनु in the sense of the Loc.; it may also be taken in the sense of सामीप्य; कच्छस्य समीपे on the border of कं जलं छयति परिच्छिनत्ति इति कच्छः: *fr.* क + छो + अ by आतोऽनुपसर्गे कः. जग्ध्वा—having eaten, governs कन्दलीः as its object. Messrs. Pathak and Nandargikar prefer the reading दग्धारण्येषु. But they have missed the poet's point. Their first objection is that one more च is wanted, that the three gerunds may be properly connected. But this objection is futile, since the actions performed are not by the same agents; and even supposing they are, the च may be easily supplied; in a verse it is not always possible for a poet to put in everything that is necessary. The word सारङ्ग has three meanings, and the poet has used the word in all the three senses. Malli. says सारङ्गाः (मतङ्गजाः, कुरङ्गा भृङ्गा वा. We should read च for वा here. सारङ्गाः must be interpreted as सारङ्गः (भृङ्गाः) च सारङ्गाः च सारङ्गाः (कुरङ्गाः) च सारङ्गाः (मतङ्गजाः) च सारङ्गाः The cons. is सारङ्गाः (भृङ्गाः) नीपं दृष्ट्वा; सारङ्गाः (कुरङ्गाः) कन्दलीः जग्ध्वा; and सारङ्गाः (मतङ्गजाः) च गन्धमाघ्राय &c. When taken thus, the gerunds become appropriate. The bees on seeing the *Nîpa* flowers flow towards them, and

thus the path of the cloud was indicated by them, the deer were attracted by the freshness of the *Kandali* leaves, while the elephants were drawn by the sweet-smelling earth, being specially fond of the smell of the earth when sprinkled over by water, *cf.* तदाननं मृत्सुरभि क्षितीश्वरो रहस्युपाघ्राय न तृप्तिमाययौ । करीव सिक्तं पृषतैः पयोमुचां शुचिव्यपाये वनराजिपल्वलम् ।। The second objection is that अधिक has no propriety. It has propriety when connected with अरण्येषु; more odoriferous in forests, the ground whereof, not being often wetted, sends forth a greater effusion of vapour when sprinkled over with drops of rain-water. सारङ्गाः– सारमङ्गम् यस्यासौ सारङ्गः, a comp. of the शकन्ध्वादि class, *i. e.* in which there is पररूप संधि, the final vowel of the first being dropped. It means 'an antelope'; *cf.* अमुं सारङ्गमभ्यर्थये । Vik. IV. 32. Some derive it as सारं शीघ्रं गच्छतीति, but this is fanciful. सारङ्ग when meaning an 'elephant' is derived as सारं सलिलं गच्छतीति; when meaning a 'bee,' it is derived as सारं मधुरं गायतीति. Malli., although he notices the reading दग्धा, does not prefer it; for what connexion can the antelopes have with the *Nīpas* or the smell of the ground? If, however, दग्धा० be the original reading, the cons. is नीपं कन्दलीश्च दृष्ट्वा, दग्धा० गन्धं चाघ्राय &c. जललव०—The reading नवजलमुचः is better, being more appropriate here.

प्रक्षिप्तमपि व्याख्यायते—

अम्भोबिन्दुग्रहणचतुरांश्चातकान्वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः ।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि[2] प्रियसहचरीसंभ्रमालिङ्गितानि ।। २२ ।।

22. The Siddhas looking at the *Chātakas* skilled in catching the drops of rain-water, and pointing out the female cranes formed into lines by counting them one by one, will highly respect (welcome) you on getting, at the time of your thunder, the eager and hasty embraces from their beloved consorts.

अम्भ इति । [अम्भोबिन्दुग्रहणचतुरान्] अम्भोबिन्दूनां वर्षोदबिन्दूनां ग्रहणे 'सर्वंसहापतितमम्बु न चातकस्य हितम्' इति शास्त्राद्भूस्पृष्टोदकस्य तेषां रोगहेतुत्वादन्तराल एव स्वीकारे चतुरान् चातकान् वीक्षमाणाः कौतुकात्पश्यन्तः श्रेणी-

---

१ रभसान्. २. सोत्कण्ठानि.

भूताः बद्धपङ्क्तीः ।। अभूततद्भावे च्विः ।। बलाकाः बकपङ्क्तीः परिगणनया एका द्वे तिस्र इति संख्यानेन निर्दिशन्तः हस्तेन दर्शयन्तः सिद्धाः स्तनितसमये त्वद्गर्जितकाले सोत्कम्पानि उत्कम्पपूर्वकाणि [प्रियसहचरीसंभ्रमालिङ्गितानि] प्रियसहचरीणां संभ्रमेणालिङ्गितानि आसाद्य । स्वयंग्रहणाश्लेषसुखमनुभूयेत्यर्थः । त्वां मानयिष्यन्ति । त्वन्निमित्तत्वात्सुखलाभस्येति भावः ।।

Sl. 22. अम्भोबिन्दु &c.—This śl. is regarded by Malli. as an interpolation, and it appears to be so. For, some of the ideas occurring in it have already occurred; besides, the Siddhas cannot be regarded as being so passionate as to covet embraces from their wives. The Pàrśva. also omits this. वीक्षमाणाः— Because they were attracted by the skill with which the birds intercepted the rain-drops. स्तनितसमये &c.–*Cf.* प्रणयकोपभृतोऽपि पराङ्मुखाः सपदि वारिधरारवभीरवः । प्रणयिनः परिरब्धुमथांगना ववलिरे वलिरेचितमध्यमाः ।। Siś. VI. 33; see also Rit. II. 14; Kir. X. 19.

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः [1]सजलनयनैः स्वागतीकृत्य केकाः
[2]प्रत्युद्यातः कथमपि भवान्गन्तुमाशु व्यवस्येत् ।। २३ ।।

23. I foresee, O friend, that though you are desirous of going quickly for doing me an agreeable service (*or*, for the sake of my beloved), there will be delay on your part on every mountain fragrant with the *Kutaja* flowers; greeted by peacocks with eyes full of the tears (of joy) with their cries made to serve as words of welcome, I hope you will somehow try to travel rapidly.

उत्पश्यामीति ।। हे सखे मेघ मत्प्रियार्थं यथा तथा द्रुतं क्षिप्रम् । ' लघु क्षिप्रतरं द्रुतम् ' इत्यमरः । यियासोः यातुमिच्छोः अपि । यातेः सन्नन्तादुप्रत्ययः । ते तव [ककुभसुरभौ] ककुभैः कुटजकुसुमैः सुरभौ सुगन्धिनि । ' ककुभः कुटजेऽर्जुने ' इति शब्दार्णवे । पर्वते पर्वते प्रतिपर्वतम् । वीप्सायां द्विरुक्तिः । कालक्षेपं कालविलम्बम् । ' क्षेपो विलम्बे निन्दायाम् ' इति विश्वः । उत्पश्यामि उत्प्रेक्षे । विलम्बहेतुं दर्शयन्नाशुगमनं प्रार्थयते–शुक्लेति । [सजलनयनैः] सजलानि सानन्दबाष्पाणि नयनानि येषां तैः शुक्लापाङ्गैः मयूरैः । ' मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः । ' इति यादवः । केकाः स्ववाणीः । ' केका वाणी मयूरस्य ' इत्यमरः । स्वागतीकृत्य स्वागतवचनीकृत्य प्रत्युद्यातः प्रत्युद्गतः । मयूरवाणीकृता-

१ सनयनजलैः. २ प्रत्युद्धातः.

तिथ्य इत्यर्थः । भवान् कथमपि यथाकथंचित् आशु गन्तुं व्यवस्येत् उद्युञ्जीत । प्रार्थने लिङ् । शेषे प्रथमः ' इति प्रथमपुरुषः । शेषश्चायं भवच्छब्दो युष्मदस्मच्छब्द-व्यतिरेकात् ॥ ' स्वागतीकृत्य केकाः ' इत्यत्र केकास्वारोप्यमाणस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात्परिणामालंकारः । तदुक्तमलंकारसर्वस्वे—' आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः ' इति ॥

Śl. 23. उत्पश्यामि—' I expect; ' *cf.* उत्पश्यतः सिंहनिपातमुग्रम् । Ragh. II. 60. मत्प्रियार्थं– may have a double meaning–(1) for doing an agreeable service to me (मत्प्रियं तदर्थं); (2) for the sake of my beloved (मम प्रिया तदर्थं), *i. e.* to bear a message to her, शुक्लापाङ्गैः– शुक्लौ अपाङ्गौ येषां तैः peacocks. *Cf.* दीर्घापाङ्गा सितापाङ्ग &c. Vik. IV. 9. " The wild peacock is exceedingly abundant in many parts of Hindustān, and is especially found in marshy places. The habits of this bird are, in a great measure, aquatic; and the setting in of the rains is the season in which they pair. The peacock is, therefore, always introduced in the description of clouds or rainy weather, together with cranes and the *Chātakas*, whom we have already had occasion to notice. " Wilson. स्वागतीकृत्य केकाः– न स्वागतमस्वागतं, अस्वागतं स्वागतं संपद्यमानं कृत्वा स्वागतीकृत्य. The peacoks shriek at the advent of the rains. *Cf.* Ghatakarpara– नवाम्बुमत्ताः शिखिनो नदन्ति मेघागमे कुन्दसमानदन्ति (= O, you with teeth like the *Kunda* buds). The poet fancies that their cries are the words of welcome addressed by them to the cloud. *Cf.* Ragh. II. 9, where Dilipa is similarly greeted by birds with their cries. *Cf.* एह्येहीति शिखण्डिनां पटुतरं केकाभिराक्रन्दितः । Mrich. V. 23. व्यवस्येत्— Pot. of सो with वि and अव; the Pot. here expresses a prayer, ' pray, try to proceed ' &c.

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः ।
संपत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २४ ॥

24. When you will be in the vicinity, the Daśārṇa country will have the hedges of its gardens white-coloured with the *Ketaka* flowers opened at their apexes, the sacred trees of its villages will be greatly disturbed by the nest-making of the domestic birds,

१ नीडारम्भे. २ परिणतिफल; फलपरिणति.

its skirts of *Jambu* forests dark with their ripe fruit, and the swans halting there for some days.

पाण्ड्वति ।। हे मेघ त्वयि आसन्ने संनिकृष्टे सति दशार्णाः नाम जनपदाः सूचिभिन्नैः सूचिषु मुकुलाग्रेषु भिन्नैर्विकसितैः । 'केतकीमुकुलाग्रेषु सूचिः स्यात्' इति शब्दार्णवे । केतकैः केतकीकुसुमैः [पाण्डुच्छायोपवनवृतयः] पाण्डुच्छाया हरितवर्णा उपवनानां वृतयः कण्टकशाखावरणा येषु ते तथोक्ताः । 'प्राकारो वरणः सालः प्राचीरं प्रान्ततो वृतिः' । इत्यमरः । तथा गृहबलिभुजां काकादिग्रामपक्षिणां नीडारम्भैः कुलायनिर्माणैः । 'कुलायो नीडमस्त्रियाम्' इत्यमरः । चित्याया इमानि चैत्यानि रथ्यावृक्षाः । 'चैत्यमायतने बुद्धवन्द्ये चोद्देशपादपे' इति विश्वः । [आकुलग्रामचैत्याः] आकुलानि संकीर्णानि ग्रामेषु चैत्यानि येषु ते तथोक्ताः । तथा [परिणतफलश्यामजम्बूवनान्ताः] परिणतैः पक्वैः फलैः श्यामानि यानि जम्बूवनानि तैरन्ता रम्याः । 'मृतावदवसिते रम्ये समाप्तावन्त इष्यते' इति शब्दार्णवे । तथा [कतिपयदिनस्थायिहंसाः] कतिपयेष्वेव दिनेषु स्थायिनो हंसा येषु ते तथोक्ता एवंविधाः संपत्स्यन्ते भविष्यन्ति । 'पोटायुवतिस्तोककतिपय--' इत्यादिना कतिपयशब्दस्योत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्त्यस्य शास्त्रप्रायिकत्वात् ।।

Sl. 24. पाण्डु०--पाण्डुः छाया यासां ताः; now see Malli. सूचिभिन्नैः--opened or blooming at the apex. गृहबलि०--*Lit.* the eaters of offerings made from a house, crows and such other domestic birds. Some take it in the sense of cranes or sparrows; गृहं कलत्रं तदानीतं बलिं भुञ्जत इति बकाश्चटका वा. Wilson says— "The birds meant here are the cranes. The term signifies 'who eats the food of his female:' गृह commonly a house, meaning in this comp. a wife. At the season of pairing, it is said that the female of this bird assists in feeding the male; and the same circumstance is stated with respect to the crow and the sparrow, whence the same epithet is applied to them also." आकुल--crowded with, चैत्य--The commentators are at variance in interpreting this word. Malli. takes it in the sense of the trees lining the streets. Some understand by it 'sacred trees', some 'temples.' while Vallabha assigns to it the meaning of बुद्धालय. चैत्य is derived from चित्या the burning ground, or a burial place. It was customary with the Hindus to bury a Saṃnyasin by a river-side, or road-side and to plant on the shot a fig-tree or a Pippala. Hence चैत्य means the holy trees; such as Indian fig-tree &c., planted by the road-side. परिणतफल०—Malli. takes अन्त in the sense of 'lovely' or 'charming.' But this sense, though found in lexicons, is unusual. Its natural sense of 'border'

or 'a region, a spot,' is quite appropriate here. Kālidāsa has, in more places than one, used the word वनान्त in the sense of a forest-region, or the border of a forest. *Cf.* आवर्तमानं वनिता वनान्तात् ।; संबन्धमाभाषणपूर्वमाहुर्वृत्तः स तौ संगतयोर्वनान्ते । Ragh. II. 19, 58; भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते । Rit. I. 26; also 22. II. 24. Also *cf.* अन्तः-कूजन्मुखरशकुनो यत्र रम्यो वनान्तः । Uttar. II. 25, where अन्त cannot be taken in the sense of रम्य. Again, if the Comp. be taken as an Inst. Tat., there will be violation of symmetry as the other three epithets are Bahuvrihis. The Comp. must, therefore, be taken as परिणतफलश्यामा जम्बूवनान्ता येषु or ०श्यामा, जम्बवो वनान्ते येषाम्. कतिपय० By the rule पोटायुवति &c. Pan II. 1. 65. कतिपय must come later in a Comp. as in उदश्चित्कतिपयं; but the rule is not universally obligatory, and so we have कतिपय first; see Malli. दशार्णाः—*Lit.* this means 'the country having ten strongholds or citadels (ऋण);' the word occurs in the Vārttika of Kātyāyana प्रवत्सतर &c. It is also the name of a river (ऋण meaning water a river: *lit.* a river into which ten other rivers flow) rising in the Vindhya mountain. Daśārṇa is said to be south-east of Madhyadeśa. It is, as Wilson says, the Dosarene of Ptolemy and the Periplus, and may be identified with the modern Chhattisgad. This forms the eastern part of Mālvā. Vetravati is its chief river.

तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं
गत्वा सद्यः फलमविकलं[1] कामुकत्वस्य लब्धा[2]
तीरोपान्तस्तनितसुभगं पास्यसि स्वादु[3] यस्मा-
त्सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि ॥ २५ ॥

25. On reaching its capital bearing the name Vidiśā famed in all the quarters, you will at once obtain the entire fruit of your love-making, since you will drink the sweet water with its undulating ripples of Vetravati, like its face full of the knitting of eye-brows, in a manner charming on account of your thundering on the border of its bank.

तेषामिति । दिक्षु [प्रथितविदिशालक्षणाम्] प्रथितं प्रसिद्धं विदिशेति लक्षणं नामधेयमस्यास्ताम् । 'लक्षणं नाम्नि चिह्ने च' इति विश्वः । तेषां दशार्णानां संबंधिनीम् धीयन्तेऽस्यामिति धानी । 'करणाधिकरणयोश्च' इति ल्युट् ॥ [राज-

---

१ अतिमहत्. २ लब्ध्वा. ३ स्वादुयुक्तम्.

धानीं] राज्ञां धानी राजधानी । 'कृद्योगलक्षणा षष्ठी समस्यते' इति वक्तव्यत्वात्समासः । तां प्रधाननगरीम् । 'प्रधाननगरी राज्ञां राजधानीति कथ्यते' इति शब्दार्णवे । गत्वा प्राप्य सद्यः कामुकत्वस्य विलासितायाः । 'विलासी कामुकः कामी स्त्रीपरो रतिलम्पटः ।' इति शब्दार्णवे । अविकलं समग्रं फलं प्रयोजनं लब्धा लप्स्यते । त्वयेति शेषः । कर्मणि लुट् । कुतः । यस्मात् कारणात् स्वादु मधुरं चला ऊर्मयो यस्य तत् चलोर्मि तरङ्गितं वेत्रवत्याः नाम नद्याः पयः सभ्रूभङ्गं भ्रुकुटियुक्तम् । दशनपीडयेति भावः । मुखमिव अधरमिवेत्यर्थः । [तीरोपान्तस्तनितसुभगं] तीरोपान्ते तटप्रान्ते यत्स्तनितं गर्जितं तेन सुभगं यथा तथा । स्तनितशब्देन भणितमपि व्यपदिश्यते । 'ऊर्ध्वमुच्चलितकण्ठनासिकं हुङ्कृतं स्तनितमल्पघोषवत् ।' इति लक्षणात् । पास्यसि । पिबतेर्लृट् । 'कामिनीनामधरास्वादः सुरतादतिरिच्यते ।' इति भावः ॥

Sl. 25. विदिशालक्षणां—लक्षयतीति लक्षणा that which indicates a thing: name: fr. लक्ष + अन (ल्युट्). विदिशा–It is the modern Bhilsa situated on the Vetravati, in the province of Mālvā. 'It is still a place of note, and is well-known in India for the superior quality of the tobacco raised in its vicinity. 'Wilson राजधानी—-See Malli. The Comp. with the Gen. is allowed by the Vārttika कृद्योगा &c., *i. e.* a word taking the Gen. case because of its connexion with a word formed by a *kṛt* aff. is compounded with any other word. *Cf.* मज्जन्मालवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत् । Kad. अविकलं—विगता कला यस्य तद्विकलं, न विकलमवि० having all its parts; full. लब्धा–3rd pers. sing. 1st Fut. Parasm. यस्मात्–This is better than यत्र, as it explains how the cloud was to get the fruit. Again, यत्र violates the metre, the last syllable of the 3rd pāda must be long as it is read along with the fourth, whenever there is a short syllabl e at the end of the third pāda, it is followed by a conjunct consonant, *cf* एत्य (12), यत्र (13), &c. सभ्रू०—भ्रुवोर्भङ्गाः भ्रूभङ्गाः the knittings or bendings of eyebrows, तैः सहितम् वेत्रवत्याः—This is the modern Betwah. It rises on the north of the Vindhya chain, and pursuing a north-easterly course of 340 miles traverses the province of Mālvā and the south-west corner of Allahabad and falls into the Yamunā below Kalpee. In the early part of its course it passes through Bhilsa or Vidiśā, (Wilson). चलोर्मि–with its waves in motion. This corresponds to सभ्रूभङ्गं, and is therefore a better reading than चलोर्म्याः.

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्संपर्कात्पुलकितमिव प्रौढपुष्पैः कदम्बैः ।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २६ ॥

26. There you should dwell, with the object of taking rest, on the mountain called Nichais (the low) bristling as it were, at your touch, with the *Kadamba* trees having full blown (prominent with) flowers :—the mountain, which, by means of its stone-caves emitting the (smell of) perfumes used in their sports by harlots, proclaims the unrestrained youth of the townsmen.

नीचैरिति ।। हे मेघ **तत्र** विदिशासमीपे । (**विश्रामहेतोः**) विश्रामो विश्रमः खेदापनयः । भावार्थे घञ्प्रत्ययः । तस्य हेतोः । विश्रामार्थमित्यर्थः । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । विश्रामेत्यत्र 'नोदात्तोपदेशस्य मान्तस्यानाचमेः' इति पाणिनीये वृद्धिप्रतिषेधेऽपि 'विश्रामो वा' इति चन्द्रव्याकरणे विकल्पेन वृद्धिविधानाद्रूपसिद्धिः । **प्रौढपुष्पैः** प्रबुद्धकुसुमैः **कदम्बैः** नीपवृक्षैः **त्वत्संपर्कात्** तव सङ्गात् । पुलका अस्य संजाताः **पुलकितमिव** संजातपुलकमिव स्थितम् । तारकादित्वादितच्प्रत्ययः । नीचैरित्याख्या यस्य तं **नीचैराख्यं गिरिमधिवसेः** । गिरौ वसेरित्यर्थः । 'उपान्वध्याङ्वसः' इति कर्मत्वम् । **यः** नीचैर्गिरिः । (**पण्यस्त्रीरतिपरिमलोद्गारिभिः**) पण्याः क्रेयाः स्त्रियः पण्यस्त्रियो वेश्याः । 'वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनी ।' इति शब्दार्णवे । तासां रतिषु यः परिमलो गन्धविशेषः । 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे ।' इत्यमरः । तमुद्गिरन्त्याविष्कुर्वन्तीति तथोक्तानि तैः । **शिलावेश्मभिः** कन्दरैः **नागराणां** पौराणाम् **उद्दामानि** उत्कटानि **यौवनानि प्रथयति** प्रकटयति । उत्कटयौवनाः क्वचिदनुरक्ता वाराङ्गना विश्रम्भविहाराकाङ्क्षिण्यो मात्रादिभयान्निशीथसमये कंचन विविक्तं देशमाश्रित्य रमन्ते । तच्चात्र वहुलमस्तीति प्रसिद्धिः । अत्रोद्गारशब्दो गौणार्थत्वात् न जुगुप्सावहः । प्रत्युत काव्यस्यातिशोभाकर एव । तदुक्तं दण्डिना— 'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् । अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ।। ' इति ।।

Sl. 26. **नीचैरा०**—A mountain in the vicinity of Vidiśā, so called from its small height. **विश्राम०**—the form विश्राम is condemned by grammarians as wrong according to Pān.'s rule (see VII. 3. 34 quoted by Malli.). 'The penultimate अ of a root ending in म् (and acutely accented in its original pronunciation) does

१ विश्रान्ति.

not take Vriddhi before an affix having an indicatory ञ् (and so on);' so विश्रम is the correct word. But the word विश्राम is freely used by poets, and seems to be a Rudha word with them. It may be defended by adding अण् (अ) स्वार्थे (विश्रम एव विश्रामः) by including it in the प्रज्ञादि group (we have प्रज्ञ एव प्राज्ञः). *Cf.* Śak. II. 6 (विश्रामं लभतां &c. where Rāghavabhaṭṭa proposes the reading विश्रान्ति); विश्रामो हृदयस्य यत्र &c. Uttar. I. 39, where the commentator says विश्राम इत्यपाणिनीयम्। नोदात्तेति वृद्धिप्रतिषेधात्। इति वैयाकरणाः। श्रीहर्षस्तुविश्रामो विश्रमश्चेति द्विरूपकोश उक्तवान्। Kāli. uses विश्रम also, see Śak. V. (अथ वा अविश्रमोऽयं लोकतन्त्राधिकारः). The reading विश्रान्तिहेतोः of the Pārs. is better from a grammatical point of view. ०हेतोः is Gen. and not Abl. पुलकितमिव—The sense is: The mountain on coming in contact with the cloud experiences sudden joy, and manifests horripilation, the *Kadamba* trees standing out as its hair standing on end. But the trees were already there. And usually it is the *Kadamba* trees that are conventionally described by poets as suddenly putting forth buds when sprinkled over with the first drops of rain-water which correspond to hair on end. *Cf.* प्रथमप्रियावचनसंश्रवस्फुरत्पुलकेन संप्रति मया विडम्ब्यते। घनराजि........॥ (see *supra.* Śl. 21) Māl.-Mādh. III. 7; सस्वेदरोमाञ्चितकम्पिताङ्गी जाता प्रियस्पर्शसुखेन बाला। मरुन्नवाम्भःप्रविधूतसिक्ता कदम्बयष्टिः स्फुटकोरकेव॥ Uttar. III. 42. The poet therefore adds the epithet प्रौढपुष्पैः. The idea is this. The *Kadamba* trees, although there, did not prominently attract notice; but being suddenly covered with flowers, they burst upon the view, at once appearing like the hair of the mountain standing on end. This explains the propriety of the word प्रौढ. पण्यस्त्री—See Malli.; *lit.* a woman that can be had for a price; hence, a harlot or concubine. उद्गारिभिः–*lit.* vomiting forth; hence sending forth effusions of, diffusing all round. See Malli.'s remark and our note on वान्त śl. 20 *supra.* उद्दामानि—उद्गतं दाम (a restraining string, hence restraint) येभ्यस्तानि; unbridled, *i. e.* very great. शिला०–caves or rooms (natural or artificial) formed of stone; for the idea *cf.* Kum. 1. 10.

विश्रान्तः सन्व्रज [1]वननदीतीरजानां [2]निषिञ्च-
न्नुद्यानानां नवजलकणैर्यूथिकाजालकानि।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात्क्षणपरिचितः पुष्पलावीमुखानाम्॥ २७॥

---

१ नव, नग. २ जातानि सि०

27. After having taken rest, travel on, sprinkling with drops of fresh water the buds of the Jasmines in the gardens lining (*lit.* grown on) the banks on the Vananadi and coming into contact, for a moment, by giving shade, with the faces of the famales plucking flowers and having the lotuses on their ears faded by the injury caused to them by the wiping off of the perspiration on the cheeks.

विश्रान्त इति। **विश्रान्तः सन्** तत्र नीचैर्गिरौ विनीताध्वश्रमः सन्। अथ विश्रान्तेरनन्तरम् [**वननदीतीरजानां**] वनेऽरण्ये या नद्यस्तासां तीरेषु जातानि स्वयंरूढानि। अकृत्रिमाणीत्यर्थः। 'नदनदी–' इति पाठे 'पुमान्स्त्रिया' इत्येकशेषो दुर्वारः। तेषां **उद्यानानाम्** आरामाणां [संबन्धीनि **यूथिकाजालकानि** मागधीकुसुम-मुकुलानि। 'अथ मागधी। गणिका यूथिका' इत्यमरः। 'कोरकजालककलिका-कुड्मलमुकुलानि। तुल्यानि।' इति हलायुधः। **नवजलकणैः** [**निषिञ्चन्**] सिञ्चन् आर्द्रीकुर्वन्। अत्र सिञ्चतेरार्द्रीकरणार्थत्वाद् द्रवद्रव्यस्य करणत्वम्। यत्र तु क्षरण-मर्थस्तत्र द्रवद्रव्यस्य कर्मत्वम्। तथा 'रेतः सिक्त्वा कुमारीषु,' 'सुखैर्निषिञ्चन्त-मिवामृतं त्वचि' इत्येवमादि। एव किरतीत्यादीनामपि 'रजः किरति मारुतः,' 'अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः' इत्यादिष्वर्थभेदाश्रयणेन रजोलाजादीनां कर्मत्वकरणत्वे गमयितव्ये। तथा [**गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां**] गण्डयोः कपोलयोः स्वेदस्यापनयनेन प्रमार्जनेन या रुजा पीडा। भिदादित्वादङ्प्रत्ययः। तया क्लान्तानि म्लानानि कर्णोत्पलानि येषां तेषां तथोक्तानाम्। [**पुष्पलावीमुखानाम्**] पुष्पाणि लुनन्तीति पुष्पलाव्यः पुष्पावचायिकाः स्त्रियः। 'कर्मण्यण्'। 'टिड्ढाणञ्-' इत्यादिना ङीप्। तासां मुखानि। [**छायादानात्**] छायाया अनातपस्य दानात्। कान्तिदानं च ध्वन्यते॥ 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः। इत्यमरः। कामुकदर्शनात्कामिनीनां मुखविकासो भवतीति भावः। **क्षणपरिचितः** क्षणं संसृष्टः सन्। न तु चिरम्। **व्रज** गच्छ॥

Śl. 27. **वननदी**—Malli. takes this in the sense of 'forest-rivers; but it may be a proper name, as some commentators take it, as Kāli. speaks definitely of the different places, that the cloud may be properly guided. "It is probably one amongst a number of small streams falling from the Vindhya range of hills." Wilson. Other readings noticed by some commentators are नवनदी and नगनदी, the latter is preferred by Wilson who says that it may have been the name of a small river west of the Betwah named Pārbati, which rising in the Vindhya chain runs north-west, till it joins another, called the Siprā; and the two together fall into the Chambal. The words Pārbati and Naganadi bear a similar import and are possib-

ly synonyms of the same stream. नवजलकणैः---see Malli.'s remarks. When आर्द्रीकरण or thorough wetting is the sense of roots like सिच्, कृ, वृष् &c. the liquid substance takes the Instrumental case; when the sense is a mere sprinkling, it is put in the Acc.; thus there is a marked difference between नवजलकणान् ०जालकेषु सिञ्चति and ०कणैः ०जालकानि सिञ्चति *cf.* अभिवर्षति योऽनुपालयन् विधिबीजानि विवेकवारिणा । Kir. II. 31. इति वागमृतेन सः । अभिवृष्य मरुत्सस्यं &c. Ragh. X. 48, and the instances given by Malli. यूथिका---a kind of jasmine (Mar. *Jui*) having very beautiful flowers much liked by women. *Cf.* यूथिकाशबलकेशी Vik. IV. 24. जालक--buds. रुजा---Fr. रुज् + अ (अङ्) which forms *fem.* nouns and is added to भिद्, छिद् and other roots of that group; भिदा (विदारणे भित्तिरन्या); छिदा (द्वैधीकरणे, छित्तिरन्या); &c. See Pān. III. 3. 104. Some take रुजा at the Instr. sing. of रुज्; but it is not a good way, as it is necessary that the word रुज् should be compounded with क्लान्त; it must therefore be taken as रुजा as Malli. does. कर्णोत्पला०---कर्णेषु उत्पलानि कर्णोत्पलानि; the lotuses placed on their ears and not ' lotus-like ears ' as the Nir. Ed. has it. The ear is never compared to a lotus; *cf.* स्वयमुरसि श्रवणोत्पलेन जघ्ने। Kir. X. 56. पुष्पलावि०---see Malli.; *lit.* those who pluck flowers; hence a class of men whose profession it is to pluck and deal in flowers. to prepare garlands &c. The females of this class are meant here.

वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म[1] भूरुज्जयिन्याः ।
विद्युद्दामस्फुरित[2]चकितैस्तत्र[3] पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥ २८ ॥

28. Though the road will be circuitous for you, set out for the north, do not be averse to forming the acquaintance of the upper vaults of the   of Ujjayini; and if you will not be delighted (charmed) there with the eyes of the town's fair, with their outer corners tremulous and dazzled by the flashes of the streaks of lightning, you will be deceived (*i. e.* will have missed the fruit of existence).

वक्र इति ॥ उत्तराशाम् उदीचीं दिशं प्रति प्रस्थितस्य भवतः पन्था उज्जयिनीमार्गो वक्रः यदपि दूरो यद्यपीत्यर्थः । विन्ध्यादुत्तरवाहिन्या निर्विन्ध्यायाः प्राग्भागे कियत्यपि दूरे स्थितोज्जयिनी । उत्तरपथस्तु निर्विन्ध्यायाः पश्चिम इति वक्रत्वम् ।

१ च. २ स्फुरण. ३ यत्र.

तथाऽपि **उज्जयिन्याः** विशालानगरस्य । 'विशालोज्जयिनी समा' इत्युत्पलः । [**सौधोत्सङ्गप्रणयविमुखः**] सौधानामुत्सङ्गेषु परिभागेषु प्रणयः परिचयः । 'प्रणयः स्यात्परिचये याच्ञायां सौहृदेऽपि च ।' इति यादवः । तस्य विमुखः पराङ्मुखः **मा स्म भूः** । न भवेत्यर्थः । 'स्मोत्तरे लङ् च इति चकारादाशीरर्थे लुङ् । 'न माङ्योगे' इत्यडागमप्रतिषेधः । **तत्र** उज्जयिन्यां [**विद्युद्दामस्फुरितचकितैः**] विद्युद्दाम्नो विद्युल्लतानां स्फुरितेभ्यः स्फुरणेभ्यश्चकितैः **लोलापाङ्गैः** चञ्चलकटाक्षैः **पौराङ्गनानां लोचनैः न रमसे यदि** तर्हि त्वं **वञ्चितः** प्रतारितः **असि** । जन्मनैष्फल्यं भवेदित्यर्थः ॥

Śl. 28. **पन्था** *i. e.* the road to Ujjain. **सौध–**सुधा chunam लेपः अस्यास्ति इति सौधः (also *neu.*); a white-washed mansion. **प्रणय–** friendly acquaintance with. **उज्जयिन्याः**—*Cf.* अस्तीहोज्जयिनी नाम नगरी भूषणं भुवः । हसन्तीव सुधाधौतैः प्रासादैरमरावतीम् ॥ यस्यां वसति विश्वेशो महाकालवपुः स्वयम् । शिथिलीकृतकैलासनिवासव्यसनो हरः ॥ Kathās XI. 31. 32. Ujjayini or Ujjain situated on the Sipra, was the capital of the country called Avanti. It was also called Viśālā Avantikā (or Avanti) and Pushpakarandini; (उज्जायनी स्याद्विशालाऽवन्ती पुष्पकरण्डिनी । Hemachandra). It is supposed to have been the residence of our poet and the capital of his well-known patron, Vikramāditya. "Few cities," remarks Wilson, "perhaps, can boast of a more continuous reputation, as it has been a place of great note from the earliest periods of Hindu tradition down to the present day." It is one of the seven sacred cities in India visited by numerous pilgrims. These are–आयोध्या मथुरा माया काशी काञ्ची अवन्तिका । पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः । Hindu geographers calculate their longitude from this city, taking it as their first meridian. The modern Ujjain is about a mile south of the ancient city. "It is mentioned in the Nasik cave-inscriptions. Ptolemy mentions it as the capital of King *Chashtana* (A. D. 150)." K. B. Pathak. **मा स्म भूः**––see Malli.; when स्म is used with the particle मा, the Imperfect or Aorist may be used. **विद्युद्दाम**—continuous streaks of lightning. **चकित**—dazzled, startled. **वञ्चितोऽसि**—'you are deceived as to the fruit (object) of your existence.' That is, you will have got eyes in vain, or have existed for nothing.

संप्रत्युज्जयिनीं गच्छतस्तस्य मध्येमार्गं निर्विन्ध्यासंबन्धमाह—

वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः
संसर्पन्त्याः स्खलितसुभगं दर्शितावर्तनाभेः ।
निर्विन्ध्यायाः पथि भव रसाभ्यन्तरः संनिपत्य
स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २९ ॥

१ क्वणित. २ रसाभ्यन्तरम. ३ प्रणयि.

29. Having come in contact, on your way, with the Nirvindhyā, having for her waist-band the row of birds noisy on account of the turbulence of the waves, moving on (gliding) in a manner graceful by her stumblings and manifesting her navel in the form of the eddies, do you become the enjoyer of the flavour (of her love, water); for, with regard to their lovers, amorous gestures are women's first expressions of love.

वीचीति ।। हे सखे **पथि** उज्जयिनीपथे [**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणाया:**] वीचिक्षोभेण तरङ्गचलनेन स्तनितानां मुखराणाम् । कर्तरि क्तः । विहगानां हंसानां श्रेणिः पङ्क्तिरेव काञ्चीगुणो यस्यास्तस्याः । [**स्खलितसुभगं**] स्खलितेनोपस्खलनेन मदस्खलितेन च सुभगं यथा तथा **संसर्पन्त्याः** प्रवहन्त्या गच्छन्त्याश्च तथा [**दर्शितावर्तनाभेः**] दर्शितः प्रकटित आवर्तोऽम्भसां भ्रम एव नाभिर्यया 'स्यादावर्तोऽम्भसां भ्रमः' इत्यमरः । [**निर्विन्ध्यायाः**] निष्क्रान्ता विन्ध्यान्निर्विन्ध्या नाम नदी । 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति समासः । 'द्विगुप्राप्तापन्नालम्–' इत्यादिना परवल्लिङ्गताप्रतिषेधः । तस्या **नद्याः संनिपत्य** संगत्य । [**रसाभ्यन्तरः**] रसो जलमभ्यन्तरे यस्य सः । अन्यत्र रसेन शृङ्गारेणाभ्यन्तरोऽन्तरङ्गः **भव** । सर्वथा तस्या रसमनुभवेत्यर्थः । 'शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः । तिक्तादावमृते चैव निर्यासे पारदे ध्वनौ ।। आस्वादे च रसं प्राहुः' इति शब्दार्णवे । ननु तत्प्रार्थनामन्तरेण कथं तत्रानुभवो युज्यतउच्यत आह स्त्रीणामिति । **स्त्रीणां प्रियेषु** विषये **विभ्रमः** विलास एव **आद्यं प्रणयवचनं** प्रार्थनावाक्यं **हि** । स्त्रीणामेष स्वभावो यद्विलासैरेव रागप्रकाशनम् न तु कण्ठत इति भावः । विभ्रमश्चात्र नाभिसंदर्शनादिरुक्त एव ।।

Śl. 29. Now he describes the river Nirvindhyā as a lady that will attract the cloud by her amorous blandishments. **वीचिक्षोभ०**–स्तनित made noisy; probably a misprint for स्वनित; क्वणित *v. l.* is better. It means the jingling of bells or tinkling of ornaments, and better suits काञ्चीगुण. It is also applied to the gentle notes of birds and is fit with विहग also, *Cf.* Rit. III. 24, **Amarus'**. 28, Uttar. III. 24 (क्वणन्तु शकुन्तयः) &c. **काञ्चीगुणायाः**— *Cf.* क्षुभितविहगश्रेणिरशना Vik. IV. 24. **स्खलित**––stumbling (due to **intoxication**). **दर्शिता०**–this is done to stir up passion. *Cf.* for **a** similar idea व्याजार्धसंदर्शितमेखलानि । Ragh. XIII. 42. Mr. Nandargi**kar** quotes–' स्निग्धं दृष्टिपथं विभूषिततनुः कर्णस्य कण्डूयनं नाभेर्दर्शनमुत्पथं च गमनं बालस्य चालिङ्गनम् । केशानां च मुहुर्मुहुर्विवरणं वार्ता च सख्या सह (*V. I.* निःश्वस्य चालापनं) कुर्युः प्रीतिवशात् स्त्रियः समदना दृष्ट्वा नरं वाञ्छितम् स्त्री कान्तं वीक्ष्य नाभिं प्रकटयति मुहुर्विक्षिपन्ती कटाक्षान् दोर्मूलं दर्शयन्ती

रचयति कुसुमापीडमुत्क्षिप्तपाणिम्। रोमाञ्चस्वेदजम्भाः श्रयति कुचतटभ्रंशि वस्त्र विधत्ते सोत्कण्ठं वक्ति नीवीं शिथिलयति दशत्योष्ठमङ्गं भुनक्ति ॥' from the com. of Mahimasiṃhagaṇi. *Cf.* also वाससां शिथिलतामुपनाभि &c. Kir. IV. 65. and Malli. on it. **निर्विन्ध्या**—This must be one of the smaller streams between the Pârvati (Naganadi) mentioned above and the Siprâ mentioned below, sprung from the Vindhya mountain and flowing northward. **रसाभ्यन्तरः**—(1) one that has drawn water in, (2) one that has enjoyed her love.

निर्विन्ध्याया विरहावस्थां वर्णयंस्तन्निराकरणं प्रार्थयते--

वेणीभूतप्रतनुसलिला[1] तामतीतस्य[2] सिन्धुः[3]
पाण्डुच्छाया तटरुहतरुभ्रंशिभि[4]र्जीर्णपर्णैः ।
सौभाग्यं ते सुभग[5] विरहावस्थया व्यञ्जयन्ती[6]
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः ॥ ३० ॥

30. When you will have crossed that you yourself will have to adopt the measures by which the river Sindhu, who has been indicating your good fortune, O fortunate one, by her love-lorn condition (pining for you), having the thin current of water for her single braid and a pale complexion owing to the old (dried) leaves dropping down from the trees growing on the banks, well give up her emaciation (be replenished with water again).

वेणीति ॥ [**वेणीभूतप्रतनुसलिला**] अवेणि वेणीभूतं वेण्याकारं प्रतनु स्तोकं च सलिलं यस्याः सा तथोक्ता। अन्यत्र वेणीभूतकेशपाशेति च ध्वन्यते। रुहन्तीति रुहाः। इगुपधलक्षणः कप्रत्ययः। [**तटरुहतरुभ्रंशिभिः**] तटयो रुहा ये तरवस्तेभ्यो भ्रश्यन्तीति तथोक्तैः **जीर्णपर्णैः** शुष्कपत्रैः **पाण्डुच्छाया** पाण्डुवर्णा। अतएव हे **सुभग विरहावस्थया** पूर्वोक्तप्रकारया करणेन [**तां निर्विन्ध्याम्**] **अतीतस्य** एतावन्तं कालमतीत्य गतस्य प्रोषितस्येत्यर्थः। **ते** तव **सौभाग्यं** सुभगत्वम्। 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः। **व्यञ्जयन्ती** प्रकाशयन्ती। स खलु सुभगो यमङ्गनाः कामयन्त इति भावः। असौ पूर्वोक्ता **सिन्धुः** नदी निर्विन्ध्या। 'स्त्री नद्यां ना नदे सिन्धुर्देशभेदेऽम्बुधौ गजे', इति वैजयन्ती। **येन विधिना** व्यापारेण **कार्श्यं त्यजति स** विधिः **त्वया एव उपपाद्यः** कर्तव्य इत्यर्थः। स च विधिरेकत्र वृष्टिरन्यत्र संभोगस्तदभावनिबन्धनत्वात्कार्श्यस्येति भावः। इयं पञ्चमी मदनावस्था

---

१ सलिलाऽसावती० २ सा तु. ३ सिन्धुम्. ४ शीर्ण. ५ असुभग ६ व्यञ्जयन्तीम्.

तदुक्तं रतिरहस्ये—' नयनप्रीतिः प्रथमं [चित्तासङ्गस्ततोऽथ संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः ॥ ' इति । ' सावतीतस्य ' इति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यातम् । किं तु सिन्धुर्नाम कश्चिन्नदः काश्मीरदेशेऽस्ति नदी तु कुत्रापि नास्तीत्युपेक्ष्यमित्याचक्षते ॥

Śl. 30. वेणीभूत०--न वेणी अवेणी अवेणी वेणी संपन्नं वेणीभूत; now see Malli. by वेणीभूत is to be understood एकवेणीभूत; *Cf.* Śak. VII. 21. नियमक्षाममुखी धृतैकवेणिः। (शकुन्तला). "The river having been diminished by the previous hot weather, the poet compares it to a long, single braid of hair. " **तामतीतस्य**--you gone beyond the river (Nirv.) Malli. reads असावतीतस्य and assigns a far-fetched meaning to अतीतस्य, having somehow to find a meaning for it. He also notices the reading तामतीतस्त, but states the opinion of some that it should be rejected, as no river of that name (सिन्धु) is known, except the Indus. But this is wrong. There is a river in Mālvā, called Kālisindhu, which springs from Bangi and falls into the Chambal; or it may be, as Mr. Nandargikar says, "the little Sindhu which springing from Devas and passing along with many other minor streams, by Ujjain, falls into the Chambal." **सौभाग्यं**—' Good fortune,' for the river-lady pines so much for the cloud. सुभग—' O fortunate one.' This is superfluous after सौभाग्यं. So, to avoid tautology, it is better to adopt the reading असुभग०, connecting it with विरहावस्था; असुभगा graceless, pitiable चासौ विरहावस्था तया.

प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धा-
न्पूर्वोद्दिष्टामुपसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥ ३१ ॥

31. On reaching the country of Avanti, the old villagers in which are conversant with the stories about Udayana, repair to the city of Viśālā, great by its opulence already mentioned to you—the city which is as it were a bright part of heaven borne down (to the earth) by the remaining merit of those, who, after having lived in heaven, have come down to the earth, (the stock of) the fruits of their virtuous deeds having run short.

१ वन्तीम्. २ ज्ञान. ३ अनुसर. ४ कृत.

प्राप्येति ॥ [उदयनकथाकोविदग्रामवृद्धान्] विदन्तीति विदाः । इगुपधलक्षणः कः । ओकसो वेद्यस्थानस्य विदाः कोविदाः । ओकारलुप्ते पृषोदरादित्वात्साधुः । उदयनस्य वत्सराजस्य कथानां वासवदत्ताहरणाद्यद्भुतोपाख्यानानां कोविदास्तत्त्वज्ञा ग्रामेषु ये वृद्धास्ते सन्ति येषु तान् । अवन्तीन् तन्नामजनपदान् प्राप्य । तव पूर्वोद्दिष्टां पूर्वोक्तां 'सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः' इत्युक्तां श्रीविशालां संपत्तिमतीम् । 'शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते' इति शाश्वतः । विशालां पुरीम् उज्जयिनीम् उपसर व्रज । कथमिव स्थितान् । सुचरितफले पुण्यफले स्वर्गोपभोगलक्षणे स्वल्पीभूते । अत्यल्पावशिष्टे सतीत्यर्थः । गां भूमिं गतानाम् । 'गौरिला कुम्भिनी क्षमा' इत्यमरः । पुनरपि भूलोकगतानामित्यर्थः । स्वर्गिणां स्वर्गवतां जनानां शेषैः भुक्तशिष्टैः पुण्यैः सुकृतैः हृतम् आनीतम् । स्वर्गार्थानुष्ठितकर्मशेषाणां स्वर्गदानावश्यंभावादिति भावः । कान्तिरस्यास्तीति कान्तिमत् उज्ज्वलं सारभूतमित्यर्थः एकं भुक्तादन्यत् । 'एके मुख्यान्यकेवला' इत्यमरः । दिवः स्वर्गस्य खण्डम् इव स्थितामित्युत्प्रेक्षा । एतेनातिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वमुज्जयिन्या व्यज्यते ॥

Śl. 31. अवन्तीन्—The name of a country north of the Narmadā, and forming the eastern part of Mālvā. It was about 900 miles in circuit. उदयन—was a prince of the Lunar race and son of Sahasrānika. He was also called Vatsarāja, being the King of the Vatsa country. His capital was Kauśambi, the modern Kosam, situated on the Yamunā and about thirty miles above Allahabad. Kauśambi, as Gen. Cunningham remarks, was one of the most celebrated cities in ancient India. It was founded by Kauśumba, who was tenth in descent from Purūravas. The Kingdom of Kauśāmbi (कोशम्बमण्डल) is mentioned in an inscription taken from the gateway of the fort of Khara, dated Samvat 1092 (A. D. 1035). कथा—the story of Udayana is given in Guṇādhya's बृहत्कथा, a work written in the Paiśāchi dialect. This work has been translated into Sanskrit by Kshemendra (his work being called बृहत्कथामञ्जरी) and Somadeva. The work of Somadeva is known as Kathāsaritsāgara, and the story of Udayana is given in that work in Tarangas 11-16 (and the following Tarangas). It has also been referred to by Bhāsa in his newly-discovered play Svapnavāsavadattā. It is briefly thus—Chaṇḍamahāsena, called Pradyota further on, was a king of Ujjayini. He had a daughter named Vāsavadattā whom he wished to bestow in marriage upon a king named Saṃjaya. In the meantime, Vāsavadattā saw Udayana in a dream; and becom-

ing enamoured of him, contrived to inform him of her love. Chaṇḍamahāsena, on knowing this, decoyed the prince to his city and kept him in captivity there. But when he was set at liberty by the minister, he carried off Vāsavadattā from her father and the rival suitor. कोविद—Malli. takes this as a Comp. of the पृषोदरादि class formed from ओकस् (ओ being dropped) and विद 'one who knows,' derived from विद् by affixing अ (कः) which is added to roots having a penultimate इ, उ or ऋ and to the roots ज्ञा and प्री; as क्षिपः, ज्ञः, प्रियः, Bhānuji Dikshita derives it as कोर्वेदस्य विदाः or कवि (Loc. sing. of को) विदा ज्ञानं येषां ते उपसर–is the reading of the Pārśva. Malli. reads अनुसर; but अनु has no propriety here, as the cloud is not asked to go any city previously to Viśālā. विशालां—Another name of Ujjayini; see note on उज्जयिन्याः *supra* śl. 27. It is derived as विशिष्टाः शालाः (mansions or big houses of a particular structure) यस्याम्. If, however, Viśālā is the same as Viśāli, mentioned in the Bhāg,–P., it is so called after Viśāla, son of तृणबिन्दु of the Solar race, who founded it; विशाला वंशकृद्राजा वैशालीं निर्ममे पुरीम् । Bhag.–P. IX. 2. 33. स्वल्पीभूते &c.—According to the Vedānta philosophy, the souls of those who here perform meritorious deeds go to heaven to enjoy their fruit; and when the stock of their religious merit is exhausted, they come down to this world again; *cf.* कर्मभूमिरियं ब्रह्मन्फलभूमिरसौ मता । and ते पुण्यमासाद्य सुरेंद्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥ २० ॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति । Bhagav. XI. हृतमिव—the general prosperity and wealth of Ujjain were so great and its people so pure and happy, that the poet regards it as a portion of Heaven transplanted; *Cf.* ननु वक्तव्यं स्थानान्तरगतः स्वर्ग इति । Vik. II. p. The idea implied here is this—Men perform religious actions to be able to enjoy their fruit in heaven alone. Now, for those who were sent down while yet a small portion of their stock of religious merit remained unenjoyed, a portion of Heaven had to be provided: and the poet thinks that the city of Ujjayini was that spot. See com. (स्वर्गार्थानुष्ठित &c).

दीर्घीकुर्वन्पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः ॥ ३२ ॥

32. Wherein in the early mornings, the breeze from the Siprā, prolonging the loud cooing of the cranes indistinctly sweet through intoxication, fragrant being charged with the extremely pleasing smell of blown lotuses, and agreeable to the body, removes the languor of women brought on by enjoyment, like a lover using coaxing words when soliciting enjoyment.

दीर्घीकुर्वन्निति ।। यत्र विशालायां प्रत्यूषेषु अहर्मुखेषु । 'प्रत्यूषोऽहर्मुखं कल्यम्' इत्यमरः । पटु प्रस्फुटम् । मदकलं मदेनाव्यक्तमधुरम् । 'ध्वनौ तु मधुरास्फुटे । कलः' इत्यमरः । सारसानां पक्षिविशेषाणाम् । 'सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः ।' इति यादवः । सारसानां हंसानाम् । 'चक्राङ्गः सारसो हंसः' इति शब्दार्णवे । कूजितं रुतं दीर्घीकुर्वन् । विस्तारयन्नित्यर्थः यावद्वातं शब्दावृत्तेरिति भावः । एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीडापक्षिकूजितमविच्छिन्नीकुर्वन्निति च गम्यते । [स्फुटितकमलामोदमैत्रीकषायः] स्फुटितानां विकसितानां कमलानामामोदेन परिमलेन सह या मैत्री संसर्गस्तेन कषायः सुरभिः । 'रागद्रव्ये कषायोऽस्त्री निर्यासे सौरभे रसे ।' इति यादवः । अन्यत्र विमर्दगन्धीत्यर्थः । 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे । आमोदः सोऽतिनिर्हारी' इत्यमरः । अङ्गानुकूलः गात्रसुखस्पर्शः । अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहन इत्यर्थः । भवभूतिना चोक्तम्--'अशिथिलपरिरम्भैर्दत्तसंवाहनानि' इति । संवाह्यन्ते च सुरतश्रान्ताः प्रियैर्युवतयः । एतत्कविरेव वक्ष्यति--'संभोगान्ते मम समुचितो हस्तसंवाहनानाम् ।' इति । शिप्रा नाम काचित्तत्रत्या नदी तस्या वातः शिप्रावातः । शिप्राग्रहणं शैत्यद्योतनार्थम् । [प्रार्थनाचाटुकारः] प्रार्थना सुरतस्य याच्ञा तत्र चाटु करोतीति तथोक्तः । पुनः सुरतार्थं प्रियवचनप्रयोक्तेत्यर्थः कर्मण्यण्प्रत्ययः । प्रियतमः वल्लभः इव स्त्रीणां सुरतग्लानिं संभोगखेदं हरति नुदति । चाटूक्तिभिर्विस्मृतपूर्वरतिखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः । 'प्रार्थनाचाटुकारः' इत्यत्र 'खण्डितनायिकाऽनुनीता' इति व्याख्याने सुरतग्लानिहरणं न संभवति । तस्याः पूर्वं सुरताभावात्पश्चात्तत्सुरतग्लानिहरणं तु नेदानींतनकोपशमनार्थचाटुवचनसाध्यमित्युत्प्रेक्षैवोचिता विवेकिनाम् । 'ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता' इति दशरूपके ।।

Śl. 32. **पटु**—Clearly uttered, distinct. **आमोद**--an extremely pleasant smell. **मैत्री**—means here 'coming in contact with'. *Cf.* the similar use of बन्धु in मकरन्दगन्धबन्धो and उन्नालबालकमलाकरगन्धबन्धुः । Māl.-Mādh. I. 38 and IX. 13. **यत्र स्त्रीणां** &c.—*Cf.* प्रातर्वाति मधौ प्रकाशविकसद्राजीवराजीरजोजालामोदमनोहरो रतिरसग्लानिं हरन्मारुतः ।। Amaruś. 58; see also Kir. IX. 76. **शिप्रा**--(also written **सिप्रा**) is the well-known river on the bank of which stands Ujjain. *Cf.*

सिप्रातरङ्गानिलकम्पितासु विहर्तुमुद्यानपरंपरासु Ragh. VI. 35. **चाटु**—*neu.* flattery, coaxing words. This śloka is quoted in the *Dhvanyāloka* as an instance of पदापेक्षया वाच्यालंकारसंसृष्टत्वं; यत्र हि कानिचित्पदानि वाच्यालंकारभाञ्जि कानिचिच्च ध्वनिप्रभेदयुक्तानि ।

हारांस्तारांस्तरलगुटिकान्कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान् ।
दृष्ट्वा यस्यां विपणिरचितान्विद्रुमाणां च भङ्गा-
न्संलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः ॥ ३३ ॥

33. And on seeing in crores pearl-necklaces with precious stones forming their central gems; couches, pearl-shells, emerald gems, dark-green like young grass, with their shooting rays spread upwards, and pieces of corals, arranged (for sale) in the market-places whereof, the oceans appear (to be so despoiled of their treasures as) to have only water left in them.

हारानिति ॥ **यस्यां** विशालायां **कोटिशः** [**विपणिरचितान्**] विपणिषु पण्यवीथिकासु ॥ 'विपणिः पण्यवीथिका' इत्यमरः । रचितान्प्रसारितान् । इदं विशेषणं यथालिङ्गं सर्वत्र संबध्यते । **तारान्** शुद्धान् । 'तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके' इति विश्वः । **तरलगुटिकान्** मध्यमणीभूतमहारत्नान् । 'तरलो हारमध्यगः' इत्यमरः । 'पिण्डे मनौ महारत्ने गुटिका बद्धपारदे' इति शब्दार्णवे । **हारान्** मुक्तावलीः । तथा कोटिशः [**शङ्खशुक्तीः**] शङ्खांश्च शुक्तींश्च मुक्तास्फोटांश्च । 'मुक्तास्फोटः स्त्रियां शुक्तिः शंखः स्यात्कम्बुरस्त्रियाम् ।' इत्यमरः । [**शष्पश्यामान्**] शष्पं बालतृणं तद्वच्छ्यामान् 'शष्पं बालतृणं घासो यवसं तृणमर्जुनम् ।' इत्यमरः । **उन्मयूखप्ररोहान्** उद्गतरम्याङ्कुरान् **मरकतमणीन्** गारुडरत्नानि तथा **विद्रुमाणां भङ्गान्** प्रवालखण्डान् **च दृष्ट्वा सलिलनिधयः** समुद्राः [**तोयमात्रावशेषाः**] तोयमात्रमवशषो येषां ते तादृशाः **संलक्ष्यन्ते** । तथाऽनुमीयन्त इत्यर्थः । रत्नाकरादप्यतिरिच्यते रत्नसंपद्भिरिति भावः ॥

Śl. 33. **तार**—bright; or big **तरल०**—तरलभूता गुटिका येषां तान् **तरल** is the central gem of a necklace. **गुटिका**—a large precious stone or gem. **शष्प०**—usually tender grass is compared to emerald; *cf.* मरकतसदृशशष्पप्रायो रम्यतरः प्रदेशः (Tantra IV. p. 10.) **उन्मयूख०**—उद्गता मयूखा येषां ते उन्मयूखाः प्ररोहा येषां ते उन्मयूखप्ररोहास्तान्. **भङ्गान्**—pieces. **सलिल**—the seas are the store-houses of gems; **from the vast stores of jewels and jewel-ornaments exposed for sale in the markets of Ujj., it appeared that the seas were deprived of all their jewels, their waters only being left to them.**

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून्रमयति जनो यत्र बन्धूनभिज्ञः ॥ ३४ ॥

34. And where the people, versed in folk-lore, amuse their relations coming on a visit to a place with such stories as :—"Here did the king of the Vatsa country (Udayana) carry away the beloved daughter of Pradyota; and here there was the golden garden of the *Tāla* trees, belonging to the same monarch, and here also roamed, as they say, (his elephant) Nalagiri, having uprooted the tie-post in his fury".

प्रद्योतस्येति ॥ अत्र प्रदेशे वत्सराजः वत्सदेशाधीश्वर उदयनः । प्रद्योतस्य नामोज्जयिनीनायकस्य राज्ञः प्रियदुहितरं वासवदत्तां जह्रे जहार । अत्र स्थले तस्य एव राज्ञः प्रद्योतस्य हैमं सौवर्णं तालद्रुमवनम् अभूत् । अत्र नलगिरिः नामेन्द्रदत्त-स्तदीयो गजः दर्पात् मदात् स्तम्भम् आलानम् उत्पाट्य उद्धृत्य भ्रमणं कृतवान् इति इत्थंभूताभिः कथाभिरित्यर्थः । अभिज्ञः पूर्वोक्तकथाभिज्ञः कोविदो जनः आगन्तून् देशान्तरादागतान् । औणादिकस्तुन्प्रत्ययः । बन्धून् यत्र विशालायां रमयति विनोदयति ; अत्र भाविकालंकारः । तदुक्तम्—'अतीतानागते यत्र प्रत्यक्षत्वेन लक्षिते । अत्यद्भुतार्थकथनाद्भाविकं तदुदाहृतम् ॥' इति ॥

Sl. 34. प्रद्योतस्य—Another name of Chaṇḍamahāsena. So say the commentators; and this is correct according to Bhāsa's Svapna. The Kathās., however, says that प्रद्योत was the king of Magadha and a person different from Mahāsena. His daughter's name also was Padmāvati and she was given to Udayana of his own free will by her father. *Cf*. परिपन्थी च तत्रैकः प्रद्योतो मगधेश्वरः । तत्तस्य कन्यकारत्नमस्ति पद्मावतीति यत् ॥ Kathās. XV. 19, 20 &c. But here the author is accurate. The late Mr. Vāman Sāstri Islāmpurkar says in his ed. of the Megh that he found the reading चण्डस्यात्र in an old MS. (dated Karttika 1st Saṃvat 1527) which also confirms the above. प्रियदुहि०—that is Vāsavadattā. अत्र—' in this place '. For the story see note on उदयनकथा, śl. 31. हैमं-golden in hue. ०द्रुमवनं—Chaṇḍamahāsena was fond of hunting and had a forest for that purpose in Ujjain, which seems to be referred to here. निर्लगिरिः—Or Nadagiri, was the name of a powerful elephant in Mahāsena's possession. आगन्तून्—गन्तु fr. गम् + तु (Uṇādi aff. तुन्). The account of Chaṇḍa-

mahāsena, as given in the Kathās., is briefly this :—There is a city, Ujjayini by name, which is an ornament of the earth and which, with its white mansions, laughs as it were at Amarāvati. In it dwells the Lord of the Universe in his actual presence, as Mahākāla, disdaining the mountain Kailāsa. In that city lived a king named Mahendravarman. He had a son, worthy of himself, named Jayasena, and his son was Mahāsena, matchless in strength of arm and the best of kings. Not having a sword worthy of his strength and a wife of good family, he propitiated the goddess Chandi by offering oblations of his flesh, when the goddess appeared befor him and said—' I am pleased with thee ; take from me this excellent sword, by the power of which thou shalt be invincible to all thy foes, thou shalt also obtain for wife, Angāravati, the daughter of the Daitya Angāraka, the most beautiful maiden in the three worlds. Since thou hast done this extremely fierce act, thy appellation shall be Chandamahāsena '. With these words the goddess disappeared. The king now had two jewels in his possession, his sword and a furious elephant, Nadagiri by name, as Indra had his thunderbolt and Airāvaṇa. (IX. 31-42). Happy by his possession of these two, the king one day went to hunt in a forest. There he beheld a wild boar of gigantic proportions, like a mass of nocturnal darkness rolled into a body. Struck by the king's arrows, which had no effect on him, the monster fled after having smashed the king's chariot, and entered a cavern. The king pursued him, and came across a city where he sat, astonished, by the side of a woll. There he beheld a maiden of exquisite loveliness attended upon by a levy of beauteous damsels. Questioned by him, she told him that she was Angāravati, daughter of the Daitya Angāraka, formidable to the gods and endowed with an adamantine frame, impervious to hostile weapons, and expressed great concern as to his safety. After some talk, the king asked the maiden, if she loved him at all, to learn from her father in which part of his body he was vulnerable. This done, he attacked the demon as he sat down to address his prayer to Sona. The Daitya raising his left hand made a sign to him to wait for some time. Chandamahāsena seized the opportunity, and while the palm of his left hand was turned towards him, he shot an arrow at it. Pierced by it the Daitya fell down dead. The king married Angāravati and returned to Ujjayini. In the course of time he got two sons—one named Gopālaka, and the other Pālaka. When they were born, the king held

a festival in honour of Indra. The deity, pleased with him, told him in a dream that he would get a matchless daughter by his favour. And in course of time a graceful daughter was born to the king. At the same time a heavenly voice declared–' She shall give birth to a son, an incarnation of Kāma, who will be the king of the Vidyādharas'. The daughter was named Vāsavadattā, being a girl from Indra or Vāsava. See Kathāsaritsāgara, Taranga II.

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै[1]-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः[2] ।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं[3] नयेथा
[4]लक्ष्मीं पश्यंल्ललितवनितापादरागाङ्कितेषु ॥ ३५ ॥

35. With your form (size) augmented by the (smoke of the) incense used for perfuming the hair and escaping through the lattices of the windows, and welcomed with presents in the form of their dancing by the domestic peacocks through fraternal affection, do you dispel the fatigue of your journey enjoying the beauty therein, in its mansions, sweet-smelling with flowers and marked with red lac of (applied to) the feet of graceful ladies.

जालोद्गीर्णैरिति । जालोद्गीर्णैः गवाक्षमार्गनिर्गतैः । 'जालं गवाक्ष आनाये जालके कपटे गणे ।' इति यादवः । केशसंस्कारधूपैः । वनिताकेशवासनार्थैर्गन्धद्रव्यधूपैरित्यर्थः।अत्र संस्कारधूपयोस्तादर्थ्येऽपि यूपदार्वादिवत्प्रकृतिविकारत्वाभावादश्वघासादिवत्षष्ठीसमासो न चतुर्थीसमासः । उपचितवपुः परिपुष्टशरीरः [बन्धुप्रीत्या] बन्धौ बन्धुरिति वा प्रीत्या भवनशिखिभिः गृहमयूरैः [दत्तनृत्योपहारः] दत्तः नृत्यमेवोपहार उपायनं यस्मै स तथोक्तः । 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः । [कुसुमसुरभिषु] कुसुमैः सुरभिषु सुगन्धिषु । [ललितवनितापादरागाङ्कितेषु] ललितवनिताः सुन्दरस्त्रियः । 'ललितं त्रिषु सुन्दरम्' इति शब्दार्णवे । तासां पादरागेण लाक्षारसेनाङ्कितेषु चिह्नितेषु हर्म्येषु धनिकभवनेषु अस्याः उज्जयिन्याः लक्ष्मीं पश्यन् [अध्वखेदं] अध्वगमनेन खेदं क्लेशं नयेथाः अपनय ॥

Śl. 35. केशसंस्कार०—केशानां संस्कारः imparting fragrance to drying up, &c. of the hair (by fumigating it with incense) तस्य धूपैः, the Comp. must be taken as a Gen. Tat. like अश्वघास, and not as a Dat. Tat., as there is no प्रकृतिविकारभाव (the relation of

---

१ धूमैः २ नृत्तोपचारः. ३ अध्वखिन्नान्तरात्मा. ४ मुक्त्वा खेदं, त्यक्त्वा खेदम्; रात्रिं नीत्वा.

material and the thing made of it) between the two as there is between यूप and दारु; see Malli.'s remark. *Cf.* धूमोष्मणा त्याजितमार्द्र-भावं केशान्तमन्तःकुसमं तदीयम्। Kum. VII; 14; स्नानार्द्रमुक्तेष्वनुधूपवासं.. केशेषु लेभे वलमङ्गनानाम्। Ragh. XVI. 50. उपचितवपुः—The students will remember that smoke is regarded as one of the ingredients that swell the bulk of a cloud; see *supra.* śl. 5. बन्धुप्रीत्या—since the peacocks manifest joy at the appearance of clouds, poets think there is a sort of brotherly relation between the two. For the poetic convention which regards a cloud and a peacock as natural friends, see *supra,* notes on śl. 12, and Malli.'s remark on śl: 55 *infra.* पादरागा०—It is customary with Hindu ladies to dye the nails of the hands, the feet &c. with *Mendi,* red lac, etc. *Cf.* अलक्तकाङ्कां पदवीं ततान। Ragh. VII. 7; Kum. VII 58. With the reading अध्वखिन्नान्तरात्मा नीत्वा खेदं, this śl. must be taken along with the following, the two thus forming a *Yugma.*

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः[1]
पुण्यं यायास्त्रिभुवनगुरोर्धाम [2]चण्डीश्वरस्य।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरत[3]युवतिस्नानतिक्तैर्मरुद्भिः ॥ ३६ ॥

36. Ardently (*or,* respectfully) gazed upon by the Gaṇas (the attendants of Śiva) as one possessed of the complexion of their master's neck, you should visit the holy abode of the husband of Chaṇḍi, Lord of the three worlds, the gardens of which are shaken by the breezes from Gandhavati, redolent of lotus-pollen and scented with the perfumes used at the time of bathing by young ladies enjoying their water-sports.

भर्तुरिति॥ **भर्तुः** स्वामिनो नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्यासौ **कण्ठच्छविः इति** हेतोः **गणैः** प्रमथैः। 'गणस्तु गणनायां स्याद्गणेशे प्रमथे चये।' इति शब्दार्णवे। **सादरं** यथा तथा **वीक्ष्यमाणः** सन्। प्रियवस्तुसादृश्यादतिप्रियत्वं भवेदिति भावः। [**त्रिभुवनगुरोः**] त्रयाणां भुवनानां समाहारस्त्रिभुवनम्। 'तद्धितार्थ–' इत्यादिना समासः। तस्य गुरोस्त्रैलोक्यनाथस्य **चण्डीश्वरस्य** कात्यायनीवल्लभस्य **पुण्यं** पावनं **धाम** महाकालाख्यं स्थानं **यायाः** गच्छेः। 'विध्यर्थे लिङ्। श्रेयस्करत्वात्सर्वथा यातव्यमिति भावः। उक्तं च स्कान्दे–' आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम्।

---

१ दृश्यमानः. २ चण्डेश्वरस्य. ३ विरत.

मर्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयात् ॥' इति ॥ न केवलं मुक्तिस्थानमिदं किं तु विलासस्थानमपीत्याह–धूतेति । कुवलयरजोगन्धिभिः उत्पलपरागगन्धवद्भिः [तोयक्रीडानिरतयुवतिस्नानतिक्तैः] तोयक्रीडासु निरतानामासक्तानां युवतीनां स्नानं स्नानीयं चन्दनादि । करणे ल्युट् । 'स्नानीयेऽभिषवे स्नानम्' इति यादवः । तेन तिक्तैः सुरभिभिः । 'कटुतिक्तकषायास्तु सौरभे च प्रकीर्तिताः ।' इति हलायुधः । सौगन्ध्यातिशयार्थं विशेषणद्वयम् । गन्धवत्याः नाम नद्याः तत्रत्यायाः मरुद्भिः मारुतैः धूतोद्यानं कम्पिताक्रीडमिति धाम्नो विशेषणम् ॥

Śl. 36. कण्ठच्छविः—Of a colour similar to that of their master's neck. Śiva's neck turned black by the effect of deadly poison (Kālakūṭa) he drank when it was produced at the churning of the milky ocean. Akāśa being one of the eight forms of Śiva (see Śāk. I. 1), the Gaṇas naturally mistook the dark rain-cloud for the neck of Śiva. त्रिभुवन०—' the lord of three world'; an epithet that belongs to the Supreme Being; in Ragh. XVI. 88. Rāma is so called. Or गुरु may mean the fatheŕ; because Śiva is the father of the three worlds; *cf.* Ragh. I. 1. चण्डीश्वरस्य— the reading चण्डेश्व० is not good. It means the Lord of Chaṇḍa (a *gaṇa* of that name); or the fierce Lord (चण्डश्चासौ ईश्वरश्च), Chandi is Pārvati in her fierce form, and the name is aptly used here to indicate Mahākāla. ०गन्धिभिः—Mark the change of गन्ध to गन्धि at the end of a Bah. Comp. 'Impregnated or charged with the smell' &c. गन्धवती—a small stream near Ujjain. युवति —also written as युवती. स्नान—here used by Lakshanā in the sense of 'washing materials such as sandal or perfumed powder for rubbing the body with'. See com. According to some commentators, the fig. in this śl. is *Udātta*—आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् । उदात्तं नाम तं प्राहुरलंकारं मनीषिणः ॥

अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
　स्थातव्यं ते नयनविषयं यावदत्येति[1] भानुः ।
कुर्वन्संध्याबलिपटहतां शूलिनः श्लाघनीया-
　मामन्द्राणां[2] फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३७ ॥

37. On arrival at Mahākāla, even though it be at another time (than the evening) you should stay there, O cloud, till the sun passes beyond the range of sight; (there) serving the noble

१ अभ्येति. २ आमन्त्राणाम्.

मे..५

purpose of a drum at the evening workshop of Śiva, you will obtain the full fruit of your moderately deep thunderings.

अपीति ।। युग्मम् ।। हे **जलधर महाकालं** नाम पूर्वोक्तं चण्डीश्वरस्थानम् **अन्यस्मिन्** संध्यातिरिक्ते **अपि काले आसाद्य** प्राप्य **ते** तव **स्थातव्यं** त्वया स्थातव्यमित्यर्थः । 'कृत्यानां कर्तरि वा' इति षष्ठी । **यावत्** यावता कालेन **भानुः** सूर्यः **नयनविषयं** दृष्टिपथम् **अत्येति** अतिक्रामति । अस्तमयकालपर्यन्तं स्थातव्यमित्यर्थः । यावदित्येतदवधारणार्थे । 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे ।' इत्यमरः । किमर्थमत आह—कुर्वन्निति । **श्लाघनीयां** प्रशस्यां **शूलिनः** शिवस्य [**संध्याबलिपटहतां**] संध्यायां बलिः पूजा तत्र पटहतां **कुर्वन्** संपादयन् **आमन्द्राणाम्** ईषद्गम्भीराणां **गर्जितानाम् अविकलम्** अखण्डं **फलं लप्स्यसे** प्राप्स्यसि । लभेः कर्तरि लृट् । महाकालनाथबलिपटहत्वेन विनियोगात्ते गर्जितसाफल्यं स्यादित्यर्थः ।।

Śl. 37. **महाकालं**—This is the name of the famous temple or place, as well as the image, or Śiva in Ujjain. (It is one of the 12 *Jyotirlingas*; their names are—**सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनम् । उज्जयिन्यां महाकालमोंकारपरमेश्वरं** (आकारपरमेश्वरं इ. पा.) । **केदारं हिमवत्पृष्ठे डाकिन्यां भीमशंकरम् ।** वाराणस्यां च विश्वेशं त्र्यम्बकं गौतमीतटे ।। **वैद्यनाथं चिताभूमौ ('परली' इति प्रसिद्धपुरे)** नागेशं दारुकावने । सेतुबन्धे च रामेशं घुश्मेशं (घृणेशं) च शिवालये ।। एतेषां दर्शनादेव पातकं नैव तिष्ठति । Śiva-P. *Cf.* Ragh. असौ महाकालनिकेतनस्य &c. VI. 34, यस्यां.....भगवानुत्सृष्टकैलासवासप्रीतिर्महाकालाभिधः स्वयं निवसति । Kād. **ते**—for the Gen. see Malli. and note on गन्तव्या ते śl. 7, *supra*. **अत्येति**—some commentators read अभ्येति, which they interpret as 'till the sun rises to your view'. But this is meaningless. For the sun is already visible when the cloud comes to Ujjayini. Again, the cloud is asked to wait at the temple till sunset to witness the evening worship of Śiva there, and then to depart from it to enjoy the other scenes presented by the city, and to rest there (and not in the temple) during the night, and then to resume its journey after sunrise on the following day. See śl. 40. **संध्या०**—Wilson has the following note on this—" There are three daily and essential ceremonies performed by the Brāhmanas, termed Saṃdhyās, either from the word Samdhi (संधि) 'junction', because they take place at the joining of the day as it were, that is, at dawn, noon and twilight; or as the term is otherwise derived from सम् 'with' and ध्यै 'to meditate religiously'. When the ceremonies of the Samdhyā are of a public nature, they comprehend the ringing of

bells, blowing the conch, beating a tabor &c. (a kettle-drum), and this kind of sound the cloud is directed by the Yaksha to excite, as an act of devotion. बलि--evening worship. आमन्द्र--moderately grave or deep.

[1]पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छाया[2]खचितवलिभिश्चामरैः [3]क्लान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान्प्राप्य वर्षाग्रबिन्दू -
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान्कटाक्षान् ।। ३८ ।।

38. There on receiving from you the first drops of rain-water shooting to their nail-marks, the dancing girls, with their waist-zones jingling at the planting of their feet (in the act of dancing) and with their hands fatigued by the Chowries gracefully waved and having their handles covered with their lustre of gems, will cast at you side-glances long like rows of bees.

पादन्यासैरिति ।। तत्र संध्याकाले । पादन्यासैः चरणनिक्षेपैर्नृत्याङ्गैः [क्वणितरशनाः] क्वणिताः शब्दायमाना रशना यासां तास्तथोक्ताः । क्वणतेरकर्मकत्वात् 'गत्यर्थाकर्मक--' इत्यादिना कर्तरि क्तः । [लीलावधूतैः] लीलया विलासेनावधूतैः कम्पितैः । [रत्नच्छायाखचितवलिभिः] रत्नानां कङ्कणमणीनां छायया कान्त्या खचिता रूषिता वलयश्चामरदण्डा येषां तैः । 'वलिश्चामरदण्डे च जराविश्लथचर्मणि ।' इति विश्वः । चामरैः बालव्यजनैः क्लान्तहस्ताः । एतेन दैशिकं नृत्यं सूचितम् । तदुक्तं नृत्यसर्वस्वे— खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः । वीणां च धृत्वा यत्कुर्युर्नृत्यं तद्दैशिकं भवेत् ।। इति । वेश्याः महाकालनाथमुपेत्य नृत्यन्त्यो गणिकाः त्वत्तः [नखपदसुखान्] नखपदेषु नखक्षतेषु सुखान्सुखकरान् । 'सुखहेतौ सुखे सुखम्' इति शब्दार्णवे । [वर्षाग्रबिन्दून्] वर्षस्याग्रबिन्दून्प्रथमबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् अपाङ्गान् आमोक्ष्यन्ते । 'परैरुपकृताः सन्तः सद्यः प्रत्युपकुर्वते' इति भावः । कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यस इति ध्वनिः ।

Śl. 38. पादन्यास—The placings or settings of the feet. This refers to a kind of dance called देशिक in which dancing girls, with their loins girded up with jingling zones, and having on their feet anklets furnished with tinkling bells, dance with measured steps set down at stated intervals, holding in their hands a scimitar or a ball, or the hem of their garment, *Chauries* &c. (see com.),

१ पादन्यास०. २ रचित. ३ कान्त.

लीलावधूत--gracefully shaken or moved. रत्नछाया--the glittering rays or sparkling lustre of the gems (set in their bracelets; or forming the ornamental hook of the handles). खचित--inlaid, intermixed. वलि--handles; some take this in the sense of 'the folds of the skin of the belly', but that is not satisfactory. चामरैः--the *Chāmara* or *Chauri* is made of the bushy tail of the *Chamara* or a kind of cow, or of a bundle of peacock's feathers, generally set in a handle of silver and waved before kings or the images of gods to keep off flies and other insects, or to serve as a fan. *Cf.* व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि । Vik. IV. 4 वेश्या—May be derived as वेशे (the residence of harlots) भवा; from वेश + य (दिगादिभ्यो यत्); वेश may mean dress, or finery (कृत्रिमः आकारः)--वेशेन शोभते, by adding य by कर्मवेशाद्यत् Pāṅ. V. 1. 100. 'One who puts on a fine dress and artificially improves her form'. It is customary to engage courtesans for dancing or singing in temples before the images of gods in the morning as well as in the evening. नखपद०--nail-marks made on their persons by their lovers, or similar wounds caused by lutes &c. *Cf.* प्रणयिनीव नखक्षतमण्डलं (उपहितं) &c. Ragh. IX. 31; सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम् । Kum. III. 29; वेणुना दशनपीडिताधरा वीणया नखपदाङ्कितोरवः । Ragh. XIX. 35; नखपदलिपयोऽपिद्दीपितार्थाः &c. Siś. VII. 39. Some commentators take the Comp. as नखपदवत्सुखान्. मधुकरश्रेणि०—the long-stretching glance is sometimes compared by Sanskrit poets to a row of bees, on account of the dark colour of the pupil of the eye. *Cf.* विलोलनेत्रभ्रमरैर्गवाक्षाः । Ragh. VII. 11. "Although this allusion", remarks Wilson, "may be new to European imagery, it is just and pleasing. The consequence of the glance is well conveyed by the sting of the bee, while its poetically radiating nature is not unaptly compared to the long flight of a line of these insects. The lengthened light of a glance is familiar to us; for Shakespeare speaks of 'eyes streaming through the airy region;' and the continuous flight of bees was noticed so long back as the time of Homer, who describes them as proceeding in branches".

पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः
सांध्यं तेजः प्रतिनवजपापुष्परक्तं दधानः ।
[1]नृत्तारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां
शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या ॥ ३९ ॥

---

१ नृत्ता.

39. Thereafter, at the commencement of Śiva's dance, resting in a round form on the lofty forests of his arms, possessing the twilight lustre as red as the fresh-blown *japa* flower, do you remove the desire for the wet elephant's hide of the Lord of creatures, your devotion being marked by Bhavāni with her eyes steady owing to her inward agitation being calmed down (allayed).

पश्चादिति ।। पश्चात् संध्यावल्यनन्तरं **पशुपतेः** शिवस्य **नृत्तारम्भे** ताण्डवप्रारम्भे **प्रतिनवजपापुष्परक्तं** प्रत्यग्रजपाकुसुमारुणं संध्यायां भवं **सांध्यं तेजः दधानः** । **उच्चैः** उन्नतं [**भुजतरुवनं**] भुजा एव तरवस्तेषां वनं **मण्डलेन** मण्डलाकारेण **अभिलीनः** अभिव्याप्तः सन् । कर्तरि क्तः । **भवान्या** भवपत्न्या ।। 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवनमातुलाचार्याणामानुक्' इति ङीप् । आनुगाषमश्च ।। [**शान्तोद्वेगस्तिमितनयनं**] शान्त उद्वेगः गजाजिनदर्शनभयं ययोस्ते अत एव स्तिमिते निश्चले नयने यस्मिन्कर्मणि तत्तथोक्तम् । 'उद्वेगस्त्वरिते क्लेशे भये मन्थरगामिनि' इति शब्दार्णवे । भक्तिः पूज्येष्वनुरागः । भावार्थे क्तिन्प्रत्ययः । दृष्टा भक्तिर्यस्य स **दृष्टभक्तिः** सन् **पशुपतेः** [**आर्द्रनागाजिनेच्छां**] आर्द्रं शोणितार्द्रं यन्नागाजिनं गजचर्म ।। 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः ।। तत्रेच्छां **हर** निवर्तय । त्वमेव तत्स्थाने भवेत्यर्थः । गजासुरमर्दनानन्तरं भगवान्महादेवस्तदीयमार्द्राजिनं भुजमण्डलेन बिभ्रत्ताण्डवं चकारेति प्रसिद्धिः ।। दृष्टभक्तिरिति कथं रूपसिद्धिः । दृष्टशब्दस्य 'स्त्रियाः पुंवत्–' इत्यादिना पुंवद्भावस्य दुर्घटत्वादपूरणीप्रियादिष्विति निषेधात् । भक्तिशब्दस्य प्रियादिषु पाठादिति । तदेतच्चोद्यं दृढभक्तिरिति शब्दमाश्रित्य प्रतिविहितं गणव्याख्याने दृढं भक्तिरस्येति । नपुंसकं पूर्वपदम् । अदाढर्च्यनिवृत्तिपरत्वे दृढशब्दाल्लिङ्गविशेषस्यानुपकारित्वात्स्त्रीत्वमविवक्षितमिति ।। भोजराजस्तु–– 'भक्तो च कर्मसाधनायामित्यनेन सूत्रेण भज्यते सेव्यत' इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति । भावसाधनायां तु स्थिरभक्तिर्भवान्यामित्यादि भवति इत्याह । तदेतत्सर्वं सम्यग्विवेचितं रघुवंशसंजीवन्यां 'दृढभक्तिरिति ज्येष्ठे' इत्यत्र । तस्माद् दृष्टभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम् ।।

Śl. 39. भुजतरु०—Siva's long and numerous arms, (ten, or twenty according to some) are fitly compared to a forest of trees. *Cf.* विस्तारिदोःखण्डपर्यासितक्ष्माधरम् । Māl.–Mādh, V. 23. **नृत्तारम्भे**—नृत्त is a mere dance to the accompaniment of *Tāla* and *Laya*, while नृत्य is a dance accompanied by the manifestation of feelings by means of gesturse; अन्यद्भावाश्रयं नृत्यं नृत्तंताललयाश्रयम् । D. R. **पशुपतेः**— the Lord of creatures (or of the Pramathas–Gaṇas). पशूनां जीवानां प्रमथानां वा पतिः. **आर्द्रनागा०**—When Śiva killed Gajāsura, he wore

his skin dripping with blood, and danced about and wore it afterwards as a trophy. "The elephant's skin belonged to an Asura, named Gaja, who acquired such power that he would have conquered the gods and would have destroyed the *Munis*, had they not fled to Benares and taken refuge in the temple of Śiva, who then destroyed the Asura, and ripping up his body, stripped off the (elephant's) hide, which he cast over his shoulders for a cloak" Monier Williams. Śiva is described as wearing this skin whenever he has his Tandava dance; *cf.* प्रचलितकरिकृत्तिपर्यन्तचन्चन्नखाघात &c. Māl.–Mādh. V. 23; गजाजिनं शोणितबिन्दुवर्षि च, and गजाजिनालम्बि दुकूलधारि वा। Kum. V. 67, 78. The cloud, on account of its resemblance to an elephant's skin, is asked to remove Śiva's desire for the elephant's hide at the time of his evening dance by clinging to his neck so that he might mistake it for the skin and begin his dance. शान्तोद्वेग०—उद्वेग uneasiness or agitation, horror at. Pārvati, as a woman, would feel disgust and horror at the sight of the bloody skin, but her agitation would be allayed on finding that it was not the hide but the cloud round Śiva's neck. दृष्टभक्तिः—according to Pān, VI. 3. 34. the sūtra is (स्त्रियाःपुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु) the Comp. should be दृष्टाभक्तिः; for the rule says—For a *fem.* word there is substituted its *mas.* form when it is a word which has an actual corresponding *mas.* form and does not end in the *fem.* aff. ऊङ् (ऊ) and is followed by another *fem.* word in apposition to it; but not when the subsequent word is an ordinal numeral or a word included in the प्रियादि group: Now the word भक्ति is in the list प्रियादि and so the substitution of the *mas.* दृष्ट is impossible. But grammarians explain away the anomaly by saying that here (in the similar case of the word दृढभक्ति) the *fem.* nature of the *fem.* is not intended; or that the first word may be taken to be of the *neuter* gender, the aff. त being added भावे; see Malli.'s remarks.

इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसंचारप्रकारमाह—

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं[1]
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामन्या कनकनिकषस्निग्धया[2] दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो[3] मा च[4] भूर्विक्लवास्ताः ॥ ४० ॥

१ रात्रौ. २ ०च्छायया. ३ विमख. ४ स्म.

Neena

40. There, when the sight will be obstructed by pitchy darkness on the high road, show the ground (path) by flashes of lightning charming like a streak of gold on a touch-stone, to the women going at night to the dwellings of their lovers; water but don't you be resounding with thunder and the downpour for they are timid (easily frightened).

गच्छन्तीनामिति ॥ तत्र उज्जयिन्यां **नक्तं** रात्रौ **रमणवसतिं** प्रियभवनं प्रति **गच्छन्तीनां योषिताम्** । अभिसारिकाणामित्यर्थः । [सूचिभेद्यैः] सूचिभिर्भेद्यैः अतिसान्द्रैरित्यर्थः । **तमोभिः** रुद्धालोके निरुद्धदृष्टिप्रसारे **नरपतिपथे** राजमार्गे [**कनकनिकषस्निग्धया**] कनकस्य निकषो निकष्यत इति व्युत्पत्त्या निकष उपलगतरेखा तस्येव स्निग्धं तेजो यस्यास्तया । ' स्निग्धं तु मसृणे सान्द्रे रम्ये क्लीबे च तेजसि ' इति शब्दार्णवे । [**सौदामन्या**] सुदाम्नाऽद्रिणैकदिक्सौदामनी विद्युत् । ' तेनैकदिक्—'इत्यण्प्रत्ययः । तया **उर्वीम्** मार्गं **दर्शय** । किं च [**तोयोत्सर्गस्तनितमुखरः**] तोयोत्सर्गस्तनिताभ्यां वृष्टिगर्जिताभ्यां मुखरः शब्दायमानः **मा च भूः** । कुतः । **ताः** योषितः **विक्लवाः** भीरवः । ततो वृष्टिगर्जिते न कार्ये इत्यर्थः । नात्र तोयोत्सर्गसहितं स्तनितमिति विग्रहः । विशिष्टस्यैव केवलस्तनितस्याप्यनिष्टत्वात् । न च द्वन्द्वपक्षेऽल्पाच्तरपूर्वनिपातशास्त्रविरोधः । ' लक्षणहेत्वोः क्रियायाः ' इति सूत्र एव विपरीतनिर्देशेन पूर्वनिपातशास्त्रस्यानित्यत्वज्ञापनादिति ॥

Sl. 40. Now he says—' Having served Mahākāla you should proceed to see the scenes in the city. ' **योषितां**–the women meant here are अभिसारिकाः *i. e.* women, who, being goaded on by passion and covered with a blue veil, go out at night to meet their lovers at the appointed places; कान्तार्थिनी तु या याति संकेतं साऽभिसारिका । Amara.; see also S.—D. 115. **रुद्धालोके**–&c. *Cf* रजनीतिमिरावगुण्ठिते पुरमार्गे घनशब्दविक्लवा । वसतिं प्रिय कामिनां प्रियास्त्वदृते प्रापयितुं क ईश्वरः Kum. IV. 11. **सूचिभेद्य**–*lit.* so thick that it can be pierced only by the point of a needle; dense a poetic way to express density of darkness; अतिनिबिडत्वात्तमसां कविसमयेसूचिभेद्यत्वमिष्यते Sārod. **सौदामनी**–See Malli ; also सुदाम्नि मेघे भवा. सुदामन् is a mountain or a name of Airāvata. The word is fromed from सुदामन्, and अण् (अ) added in the sense of ' in the same direction with that, ' in the same (common) direction with the hill सुदामन्. See Pan. IV. 3. 112. **निकषस्निग्धया**—निकष a streak or line of gold on a touchstone, तद्वत्स्निग्धा shining or bright. *Cf.* कनकनिकषस्निग्धा विद्युत् (प्रिया न ममोर्वशी). Vik. IV. 1. Malli. takes स्निग्ध as a noun in the sense of ' lustre, ' which though unusual is not bad. A streak of

gold on the black touchstone has peculiar brightness, and so has lightning and flashing across a black cloud, दर्शय &c.–Poets represent *Abhisārikās* as knowing their way by the flashes of lightning. *Cf.* सुतिक्ष्णमुच्चैर्ध्वनतां पयोमुचां घनान्धकारावृतशर्वरीष्वपि । तडिप्रभादर्शितमार्गभूमयः प्रयान्ति रागादभिसारिकाः स्त्रियः ॥ Rit. II. 10; (इयं विद्युत्) आख्याति ते प्रियतमस्य हि संनिवेशम् । Mrich. V. 33. तोयोत्सर्ग०—as heavy showers and thunder both contribute to the women's fear, Malli. takes तोयोत्सर्गस्तनित as a Dvandva and not as a Madhy. Tat; for then the meaning will be तोयोत्सर्गसहितेन स्तनितेन मुखरो मा भूः *i. e.* केवलेन स्तनितेन मुखरो भूः but as both are not desirable—thunder, or thunder accompanied by showers—Dvandva is necessary see com. *Cf.* जलधर निर्लज्जस्त्वं यन्मां दयितस्य वेश्म गच्छन्तीम् । स्तनितेन भीषयित्वा धाराहस्तैः परामृशसि । Mrich. V. 28. See also 29. See com. The other point discussed by Malli. is this:—The Comp. should be स्तनिततोयो० by the rule—'The word having fewer syllables must precede in a Dvandva'. But this rule is not meant to be absolute by Pāṇ. as he himself uses the Comp. लक्षणहेत्वोः instead of हेतुलक्षणयोः (See Malli.) and so the Comp. तोयो० is justifiable. **मा च भूः**–is preferable to मा स्म भूः, as the particle च is necessary to connect the two previous clauses. **विक्लवा**:–fr. क्लु 1. A. to go, and the aff. अ (अच्). *Cf.* the quotation from Kum. given above. In one MS the reading is—विमुखो यद्भवेथास्तदानीम्.

तां कस्यांचिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात्खिन्नविद्युत्कलत्रः ।
दृष्टे सूर्ये पुनरपि भवान्वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४१ ॥

41. Having passed that night on the top-terrace of some house with the pigeons roosting within. with lighting, your consort, fatigued on account of flashing for a long time, you should proceed to accomplish the rest of your journey when the sun rises again. Indeed, those who have undertaken to execute (*lit* the execution of) their friend's business do not grow remiss.

तामिति ॥ [**चिरविलसनात्**] चिरं विलसनात् स्फुरणात् [**खिन्नविद्युत्कलत्रः**] खिन्नं विद्युदेव कलत्रं यस्य स भवान् [**सुप्तपारावतायां**] सुप्ताः पारावताः कलरवा यस्यां तस्याम् । विविक्तायामित्यर्थः ॥ 'पारावतः कलरवः कपोतः' इत्यमरः ॥ जनसंचारस्तत्रासंभावित एवेति भावः । **कस्यांचित् भवनवलभौ** । गृहाच्छादनोपरिभाग इत्यर्थः ॥ '**आच्छादनं स्याद्वलभी गृहाणाम्**' इति हलायुधः । **तां रात्रिं**

नीत्वा सूर्ये दृष्टे सवि उदिते सतीत्यर्थः । पुनरपि अध्वशेषं वाहयेत् । तथा हि । सुहृदां मित्राणां [अभ्युपेतार्थकृत्याः] अभ्युपेता अङ्गीकृताऽर्थस्य प्रयोजनस्य कृत्या क्रिया यैस्ते: । अभ्युपेतसुहृदर्था इत्यर्थः । सापेक्षत्वेपि गमकत्वात्समासः । 'कृत्या क्रियादेवतयोः कार्ये स्त्री कुपिते त्रिषु ।' इति यादवः । 'कृञः श च' इति चकारात्क्यप् । न मन्दायन्ते खलु न मन्दा भवन्ति हि । न विलम्बन्त इत्यर्थः । 'लोहितादिडाज्भ्यः क्यष्' इति क्यष् । 'वा क्यषः' इत्यात्मनेपदम् ॥

Sl. 41. वलभौ—वलभि-भी (also written as वडभि-भी is the sloping roof or the wooden frame of a thatch; it also means the topmost part of a house or upper terrace. पारावतायां०—the pigeons are always connected by poets with eaves of house; *cf.* धूपैर्जालविनिःसृतैर्वलभयः संदिग्धपारावताः । Vik. III. 2, सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि । Mālav. II. 12. विलसनात्—विलसन sport, playing, flashing (also amorous sporting). ०विद्युत्कलत्रः—lightning is poetically regarded as the wife of the cloud, the two being associated. सुहृदां–शोभनं हृदयं यस्यासौ सुहृद्; हृदय is changed to हृद् after सु or दुर् when the sense is a friend or foe respectively, so दुहृद्; otherwise सुहृदयः *Cf.* सुहृद्दुर्हृदौ मित्रामित्रयोः । Pān. V. 4. 150. This should have formed part of the Comp. अभ्युपेता०; but as the connexion is easily known, it is not compounded; see Malli's remark सापेक्षत्वेऽपि &c. वाहयेत्—*caus.* of वह् *intrans.* to move or walk on; *cf.* उत्थाय पुनरवहत् Kād., and स वाह्यते राजपथः शिवाभिः Ragh. XVI. 12 where Malli remarks वहेरन्यो वहिधातुरस्तीति उपदेशः अभ्युपेता०—कृत्या finishing or carrying to its completion a thing. *Cf.* for the same idea more forcibly expressed, किं त्वङ्गीकृतमुत्सृजन्कृपणवच्छ्लाघ्यो जनो लज्जते । निर्वाहः प्रतिपन्नवस्तुषु सतामेकं हि (मेतद्धि *v. l.*) गोत्रव्रतम् । Mudr. II. 18. मन्दायते—Denom. verb from मन्द by adding य (क्यष्) which forms Parasm. or Atm. verbs.

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु ।
प्रालेयास्रं कमलवदनात्सोऽपि हर्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः ॥ ४२ ॥

42. That is the time when the tears of offended women are to be wiped off by lovers; quit, therefore, the path of the sun quickly: for he, too, returning to remove the tears in the shape

१ नयनात्.

of the dew from the lotus-face of the lotus-plant, will be not a little worth with you obstructing his *Karas* (beams, hands).

तस्मिन्निति ।। तस्मिन् काले पूर्वोक्ते सूर्योदयकाले **प्रणयिभिः** प्रियतमैः **खण्डितानां योषितां** नायिकाविशेषाणाम् 'ज्ञातोऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता' इति दशरूपके । नयनसलिलं शान्ति नेयं नेतव्यम् । नयतिर्द्विकर्मकः । अतः हेतोः **भानोः वर्त्म आशु** शीघ्रं **त्यज** । तस्यावरको माभूरित्यर्थः। विपक्षेऽनिष्टमाचष्टे–**सः अपि** भानुः । [**नलिन्याः**] नलिनान्यम्बुजानि यस्याः सन्तीति नलिनी पद्मिनी । 'तृणेऽम्बुजे नलं ना तु राशि नाले तु न स्त्रियाम् ।' इति शब्दार्णवे । तस्याः स्वकान्तायाः [**कमलवदनात्**] कमलं स्वकुसुममेव वदनं तस्मात् [**प्रालेयास्रं**] प्रालेयं हिममेवाऽस्रमश्रु हर्तुं शमयितुं **प्रत्यावृत्तः** प्रत्यागतः । नलिन्याश्च भर्तुर्भानोर्देशान्तरे नलिन्यन्तरगमनात्खण्डितात्वमित्याशयः । ततः **त्वयि** । करानंशून्रुणद्धीति कररुत् । क्विप् । तस्मिन् **कररुधि** सति । हस्तरोधिनि सतीति च गम्यते । 'बलिहस्तांशवः कराः' इत्यमरः [**अनल्पाभ्यसूयः** अधिकविद्वेषः स्यात् । प्रायेणेच्छाविशेषविघाताद्द्वेषो रोषविशेषश्च कामिनां भवतीति भावः । किं च–'आत्मानं चार्कमीशानं विष्णुं वा द्वेष्टि यो जनः । श्रेयांसि तस्य नश्यन्ति ·· च भवेद्ध्रुवम् ।।' इति निषेधात्कार्यहानिर्भविष्यतीति ध्वनिः ।।

Sl. 42. **खण्डिता**—or an 'injured woman' is one who is affected by jealousy on knowing that her husband or lover had met with and passed his time in company with some other woman or mistress. According to the S. D., she is one of the eight Nāyikās who is defined as–पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः । सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ।। 'whose lover approaches her, bearing marks of his having been toying with another—this one affected by jealousy is called, by the learned, the offended one'. Vallabha commenting on Ragh. V. 67. (अबला निशि खण्डितेव) quotes–निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रिताङ्गः । यस्याः कुतोऽपि गृहमेति पतिः प्रभाते सा खण्डितेति कथिता कविभिः पुराणैः **प्रालेय**—The morning dew. **नलिनी**—a lotus-plant. Words like नलिनी, कमलिनी generally mean a lotus plant; sometimes "a pond in which lotuses grow". *Cf.* नलिनीदलगतजलमतितरलं Mohamudgara. **कमलवदन**—a Karm.; the sun is regarded as the lover or husband of the Nalini; the lotus is her face. Sometimes the lotus is regarded as her eye; *cf.* भानुमानपरदिग्वनितायाश्चुम्बति स्म मुखमुद्रतरागः । पद्मिनी किमु करोति वराकी मीलिताम्बुरुहनेत्रपुटाऽभूत् ।। *i. e.* (when the पद्मिनी saw the sun courting the प्रतीची directian in the evening) Vikram. Ch. XI. 9. *Cf.* Ratnā. III. 6. **यातोऽस्मि पद्मवदने समयो ममैष सुप्ता मयैव भवति प्रतिबोधनीया । प्रत्यावृत्तः**—returned from his nightly

travel. करहधि--Obstructing his rays (*also*, hands)-अभ्यसूया--here means jealousy, anger or resentment. *Cf.* शक्राभ्यसूयानिवृत्तये यः । Ragh. VI. 74; Kum. III. 4.

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्माऽपि प्रकृतिसुभगो लप्स्यते ते प्रवेशम् ।
तस्मादस्याः[1] कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्तुं चटुलशफरोद्वर्तनप्रेक्षितानि ॥ ४३ ॥

43. Your reflected form also, naturally graceful, will find entranee into the limpid water of the Gambhirā as into her pure (well-pleased) heart; it will not then behove you to render fruitless through rudeness (Malli.) her glances in the form of the quick gambols of the *Śaphara* fish, white like lotuses (*or* you will therefore not render vain, being firm-minded, the lotus-white glances of the *Saphara*, &c).

गम्भीरायाः इति ॥ गम्भीरा नाम सरित् । उदात्तनायिका च ध्वन्यते । तस्याः [गम्भीरायाः सरितः] प्रसन्ने अनुरक्तत्वाद्दोषरहिते चेतसि इव प्रसन्नेऽतिनिर्मले पयसि । [प्रकृतिसुभगः] प्रकृत्या स्वभावेनैव सुभगः सुन्दरः । 'सुन्दरेऽधिकभाग्ये च दुर्दिनेतरवासरे । तुरीयांशे श्रीमति च सुभगः' इति शब्दार्णवे । ते तव [छायात्मा] छाया चासावात्मा च । सः अपि प्रतिबिम्बशरीरं वा प्रवेशं लप्स्यते । अपिशब्दात्प्रवेशमनिच्छोरपीति भावः । तस्मात् छायाद्वाराऽपि प्रवेशावश्यंभावित्वात् अस्याः गम्भीरायाः [कुमुदविशदानि] कुमुदवद्विशदानि धवलानि [चटुलशफरोद्वर्तनप्रेक्षितानि] चटुलानि शीघ्राणि शफराणां मीनानामुद्वर्तनान्युल्लुण्ठनान्येव प्रेक्षितान्यवलोकनानि । 'त्रिषु स्याच्चटुलं शीघ्रम्' इति विश्वः । एतावदेव गम्भीराया अनुरागलिङ्गम् । धैर्यात् धाष्टर्यात् । वैयात्यादिति यावत् । मोघीकर्तुं विफलीकर्तुं [त्वं] न अर्हसि । नानुरक्ता विप्रलब्धव्येत्यर्थः । धूर्तलक्षणं तु—'क्लिश्नाति नित्यं गमितां कामिनीमिति सुन्दरः । उपैत्यरक्तां यत्नेन रक्तां धूर्तो विमुञ्चति ॥' इति ॥

Śl. 43. गम्भीरा—like the गन्धवती, is a small river in Mālvā, mentioned by Jinasena in his Ādipurāṇa, Ch. XXIX. Also, a woman of sublime qualities who does not easily disclose her love. प्रसन्न—(1) clear, pellucid (being free from dust), transparent; *cf.* एषा प्रसन्नपुण्यसलिला भगवती भागीरथी Uttar. I.; (2) pleased, propitiated; *cf.* प्रसन्नचेतः सलिलाः शिवोऽभूत् । Kum. VII. 74. छायात्मा—

[1] तस्याः.

Yourself in the form of your shadow; or, your image in the shape of the reflection (Malli.). अपि—The force of अपि is—'Though you may be unwilling to enter the heart of the river-lady for fear of delay, your reflection, at any rate, will enter her water'. धैर्यात्—Through firmness of mind or gravity (not being affected by the manifestation of her love). Malli. explains this by धाष्टर्यात् 'through impudence or rudeness;' but from his words धूर्तलक्षणं तु he seems to have read धौर्त्यात् instead of धैर्यात्. चटुलशफर०—*Cf.* स ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः। ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः ॥ Kir. VI. 16. "The Saphara is described as a small white glistening fish, which, darting rapidly through the water, is not unaptly compared to the twinkling glances of a sparkling eye. Assigning the attributes of female beauty to a stream ceases to be incongruous when we advert to its constant personification by the Hindus; and it is as philosophical as it is poetical to affiance a river and a cloud. The smiles of rivers, nay, of the ocean itself, have often been distributed by poetical imagination". Wilson.

तस्याः किंचित्करधृतमिव प्राप्तवानीरशाखं
[1]हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।
प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि
ज्ञातास्वादो [2]विवृतजघनां को विहातुं समर्थः ॥ ४४ ॥

44. After you will have removed her blue garment in the shape of the water, slipped down from her hips in the form of the bank and appearing to be clutched up by the hand on account of the branches of the canes touching it (the garment in the form of water), it will be with considerable difficulty that the departure of you hanging obliquely, will take place: who that has experienced the pleasure is able to leave a women with loins uncovered (*lit*, exposed to view)?

तस्या इति ॥ हे सखे [प्राप्तवानीरशाखं] प्राप्ता वानीरशाखा ये तत्तथोक्तमत एव किंचित् ईषत् करधृतम् हस्तावलम्बितम् इव स्थितम्। [मुक्तरोधोनितम्बम्] मुक्तस्त्यक्तो रोधस्तटमेव नितम्बः कटिर्येन तत्तथोक्तम् ॥ 'नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटौ।' इति यादवः ॥ नीलं कृष्णवर्णं तस्याः गम्भीरायाः [सलिलवसनं] सलिलमेव वसनं हृत्वा अपनीय। प्रस्थानसमये

---

१ नीत्वा. २ पुलिन–विपुल–जघनाम्.

प्रेयसीवसनग्रहणं विरहतापविनोदनार्थमिति प्रसिद्धम् । लम्बमानस्य पीतसलिलभराल्लम्बमानस्य । अन्यत्र जघनारूढस्य । ते तव प्रस्थानं प्रयाणं कथमपि कृच्छ्रेण भावि । कृच्छ्रत्वे हेतुमाह–ज्ञातेति । ज्ञातास्वादः अनुभूतरसः कः पुमान् [विवृतजघनां] विवृतं प्रकटीकृतं जघनं कटिस्तत्पूर्वभागो वा यस्यास्ताम् ॥ 'जघनं स्यात्कटौ पूर्वश्रोणिभागापरांशयोः ।' इति यादवः । विहातुं त्यक्तुं समर्थः । न कोऽपीत्यर्थः ॥

Śl. 44. तस्याः &c.—The idea in the first two lines is this—The water of the river, being reduced in summer (being as it were sucked up by the cloud), had receded from the banks while the branches of the canes just touched it. This the poet fancies as the garment of the river snatched away by the cloud which having slipped from the hips was held up by the hand. किंचित्—A little, just. वानीर—वां शुष्कं आ समन्तान्नीरमस्य; a kind of cane growing by the river-side and often referred to by the poets; *cf.* अत्रानुगोदं मृगयानिवृत्तः......स्मरामि वानीरगृहेषु सुप्तः । Ragh. XIII. 35; इह समदशकुन्ताक्रान्तवानीरवीरुत् &c. Uttar. II. 20. लम्बमानस्य—Hanging down (to the current of the river): see Malli. विवृतजघनाम्—the reading पुलिनजघनां (पुलिनं the sandy bank एव जघनं यस्यास्तां) is more decent, but does not agree with the context. The fig. in this śl, according to Sārod is रूपकोत्प्रेक्षार्थान्तरन्यासानां संकरः; according to Sumati., रूपोत्प्रेक्षालंकारः ।

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः[1]
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४५ ॥

45. A cool breeze, delightful on account of its contact with the odour of the (crust of the) earth swollen by your showers, inhaled by elephants in a manner charming on account of their snorting sounds, and causing the wild figs to ripen, will gently blow (*or*, will blow beneath you) as you will proceed (*lit.* desire to go) to Devagiri.

त्वदिति ॥ [त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसंपर्करम्यः] त्वन्निष्यन्देन तव वृष्ट्योच्छ्वसिताया उपबृंहिताया वसुधाया भूमेर्गन्धस्य संपर्केण रम्यः । सुरभिरित्यर्थः । स्रोतःशब्देनेन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते । 'स्रोतोऽम्बुवेगेन्द्रिययोः'

१ पुण्यः.

इत्यमरः। [स्रोतोरन्ध्रध्वनितसुभगं] स्रोतोरन्ध्रेषु नासाग्रकुहरेषु यद्ध्वनितं शब्दस्तेनं सुभगं। यथा तथा दन्तिभिः गजैः पीयमानः। वसुधागन्धलोभादाघ्रायमाण इत्यर्थः। अनेन मान्द्यमुच्यते। [काननोदुम्बराणाम्] काननेषु वनेषूदुम्बराणां जन्तुफलानाम्। 'उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः॥' इत्यमरः। परिणमयिता परिपाकयिता। 'मितां ह्रस्वः' इति ह्रस्वः। शीतो वायुः। देवपूर्वं देवशब्दपूर्वं गिरिम् देवगिरिमित्यर्थः। उपजिगमिषोः उपगन्तुमिच्छोः। गमेः सन्नन्तादुप्रत्ययः। ते तव नीचैः शनैः वास्यति। त्वां वीजयिष्यतीत्यर्थः। संबन्धमात्रविवक्षायां षष्ठी। 'देवपूर्वं गिरिम्' इत्यत्र देवपूर्वत्वं गिरिशब्दस्य। न तु संज्ञिनस्तदर्थस्येति संज्ञायाः संज्ञित्वाभावादवाच्यवचनं दोषमाहुरालंकारिकाः। तदुक्तमेकावल्याम्–'यदवाच्यस्य वचनमवाच्यवचनं हि तत्।' इति। समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण मेघोपगमनयोग्यो देवगिरिर्लक्ष्यत इति कथंचित्संपाद्यम्॥

Śl. 45. **निष्यन्द**—gentle showers. **उच्छ्वसित**--swollen; delighted : sending forth vapour (*lit.* breath of relief) **रम्यः**—**पुण्यः** *v. l.* which also means beautiful, charming; *cf.* प्रकृत्या पुण्यलक्ष्मीकौ। Mv. I. 16. **स्त्रोतोरन्ध्र०**—Malli. takes स्त्रोतस् in the sense of 'an organ of sense' hence, here the nose, *i. e.* the tip of the trunk. Or it may be taken in the sense of 'the trunk' itself. **ध्वनित**—p. p. p. used as a noun; 'sound'. **०सुभगं**—Avya. Comp. **दन्तिन्**—अतिशयितौ huge दन्तावस्य. **नीचैः**—gently; some take it to mean 'below you'. **देवपूर्वं गिरिं**--*i. e.* Devagiri. This, as Wilson thinks, may be the same as the place called Devagad, situated south of the Chambal, in the centre of the province of Mālvā, and precisely in the line of the cloud's progress. According to Dr. Fleet the village of Devagad is situated about sixty miles to the south-west of Jhansi. This hill is the site of a temple of Kārttikeya; see next Śloka. For a similar periphrasis, *cf.* दशपूर्वरथं यमाख्यया &c. Ragh. VIII. 29; हिरण्यपूर्वं कशिपुं प्रचक्षते। Siś. I. 42; धनुरुपपदमस्मै वेदमभ्यादिदेश। Kir. XVIII. 44. This is an instance of the rhetorical fault called 'inexpressiveness'; for the comp. word देवपूर्वं is an attribute of the word गिरि and not of the संज्ञिन् *i. e.* the object (here the hill Devagiri) indicated by the name (संज्ञा). So this means 'the *word* गिरि which has Deva preceding it', and does not denote Devagiri. It is only by Lakshaṇā that the meaning Devagiri is obtained from the word गिरि qualified by देवपूर्वं; see Malli.'s remarks. **परिणमयिता**—The अ of नम् with a prep. does not take Vriddhi in the Causal.

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान्व्योमगङ्गाजलार्द्रैः ।
रक्षाहेतोर्नवशशिभृता वासवीनां [1]चमूना-
मत्यादित्यं हुतवहमुखे संभृतं तद्धि तेजः ॥ ४६ ॥

46. Your form changed into a cloud of flowers, you should bathe Skanda, who has taken permanent abode there, with shower of flowers wet, with the water of the heavenly Ganges . For he is (none other than) his own energy, surpassing the son in brightness that was placed by the bearer of the young moon (Siva) in the mouth of Agni (God of fire) for the protection of the armies of Indra.

तत्रेति ॥ तत्र देवगिरौ (नियतवसतिं) नियता वसतिर्यस्य तम् । नित्यसंनिहितमित्यर्थः । पुरा किल तारकाख्यासुरविजयसंतुष्टः सुरप्रार्थनावशाद्भगवान्भवानीनन्दनः स्कन्दो नित्यमहमिह सह शिवाभ्यां वसामीत्युक्त्वा तत्र वसतीति प्रसिद्धिः । स्कन्दं कुमारं स्वामिनम् । पुष्पाणां मेघः पुष्पमेघः । पुष्पमेघीकृतात्मा कामरूपत्वात्पुष्पवर्षुकमेघीकृतविग्रहः सन् । व्योमगङ्गाजलार्द्रैः पुष्पासारैः पुष्पसंपातैः । 'धारासंपात आसारः' इत्यमरः । भवान् स्वयमेव स्नपयतु अभिषिञ्चतु । स्वयंपूजाया उत्तमत्वादिति भावः । तथा च शंभुरहस्ये–'स्वयं यजति चेद्देवमुत्तमा सोदरात्मजैः । मध्यमा या यजेद्भृत्यैरधमा याजनक्रिया ॥ ' इति स्कन्दस्य पूज्यत्वसमर्थनेनार्थेनार्थान्तिरं न्यस्यति—रक्षेति ॥ तत् भगवान् स्कन्द इत्यर्थः । विधेयप्राधान्यान्नपुंसकनिर्देशः । वासवस्येमा वासव्यः । 'तस्येदम् इत्यण् । तासां वासवीनाम् ऐन्द्रीणां चमूनां सेनानां रक्षाहेतोः रक्षया कारणेन । रक्षार्थमित्यर्थः । 'षष्ठी हेतुप्रयोगे ' इति षष्ठी । नवशशिभृता भगवता चन्द्रशेखरेण [हुतवहमुखे] वहतीति वहः । पचाद्यच् । हुतस्य वहो हुतवहो वह्निस्तस्य मुखे संभृतं संचितम् । आदित्यमतिक्रान्तम् अत्यादित्यम् ॥ 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया ' इति समासः । तेजः हि साक्षाद्भगवतो हरस्यैव मूर्त्यन्तरमित्यर्थः । अतः पूज्यमिति भावः । मुखग्रहणं तु शुद्धत्वसूचनार्थम् तदुक्तं शंभुरहस्ये—गवां पश्चाद्द्विजस्याङ्घ्रियोगिनां हृत्कवेर्वचः । परं शुचितमं विद्यान्मुखं स्त्रीवह्निवाजिनाम् ॥ ' इति ॥

Śl. 46. स्कन्दं Kārttikeya; the Mahābhārata thus accounts for the name—स्कन्नत्वात्स्कन्दतां प्राप्तो गुहावासाद्गुहोऽभवत् । See below śl. 45, नियतवसतिं—whose residence there is fixed, *i. e.* who has taken his abode permanently there. पुष्पमेघी०—yourself turned into a cloud (mass) of flowers. The cloud had the power to

---

[1] वसूनाम्.

assume any form at will; see *supra*, ṡl. 6. स्नपयतु—also स्नापयतु. व्योमगङ्गा—the heavenly Ganges, also called Mandākini. The Ganges is supposed to flow in three courses, in the three worlds, and is hence called Tripathagā. It is really the galaxy or the Milky Way mistaken for Gangā on account of the white colour of its water. रक्षाहेतोः वासवीनां &c.—वासवी is fr. वासव meaning Indra. The birth of Skanda was for the purpose of protecting the gods from the oppression of Tāraka, an *Asura* who, by the performance of severe austerities, had acquired formidable powers and was not to be destroyed except by an infant seven days old. नवशशिभृत्—Śiva, the wear of (the digit of) the new moon. अत्यादित्यं—a Prādi Tat.; see the Vārttika quoted by Malli. हुतवहमुखे संभृतं-वहतीति वहः हुतस्य वहः हुतवहः। Agni, so called because he *carries* the oblations offered to the respective gods. मुखे-because the mouth of fire is considered holy : see com. From his birth from fire, Kārttikeya is also called अग्निभूः; पावकिः (see next ṡl.) &c. *Cf.* सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्। Ragh. II. 75. This is put in to show that Skanda is as worthy of worship at the hands of the cloud as Śiva himself. Allusion—The gods, harassed by Taraka applied to Śiva for begetting a son who would destroy the demon. The story is given in the Kumārasambhava. Śiva married Pārvati and remained secluded in her company for many months, The gods, weary of waiting, sent Agni to break their privacy. Agni, in the form of a dove, approached them. (see Kum, IX. 1–4). *Cf.* ते गत्वा पर्वतं..कैलासं धातुमण्डितम्। अग्निं नियोजयामासुः पुत्रार्थं सर्वदेवताः॥ देवकार्यमिदं देव समाधत्स्व हुताशन। शैलपुत्र्या महातेजो गङ्गायां तेज उत्सृज॥ देवतानां प्रतिज्ञाय गङ्गामभ्येत्य पावकः। गर्भं धारय वै देवि देवतानामिदं प्रियम्॥ इत्येतद्वचनं श्रुत्वा दिव्यं रूपमधारयत्। स तस्या महिमां दृष्ट्वा समन्तादवशीर्यत॥ समन्ततस्तदा देवीमभ्यषिञ्चत् पावकः। सर्वस्रोतांसि पूर्णानि गङ्गाया रघुनन्दन॥ Rāmā. Bāla-K. Canto XXXVII. He was recognized. But Śiva relented and cast his seed that had escaped from his body (स्कन्न,—hence the name) into Agni's mouth. Agni unable to bear it threw it into the Ganges. Thence it found its way to the six Krittikās (Pleiades) who in their turn cast it into a thicket of Sara reeds (see Kum. X. 43–59), where the son was born. [According to another account, each of the six Krittikas brought forth a male child. But these six sons were afterwards mysteriously combined into one with six heads and twelve hands.] Hence Skanda is

also called Kārttikeya, Sarajanmā, &c. Thus he was born without the intervention of a woman. [On this Wilson remarks—" Several instances of the solitary production of offspring occur in the Hindu as well as in the Grecian mythology. Thus, as Pallas sprang from the brow of Jupiter, we have Skanda generated solely. See also Apte's Dic. under Kārttikeya by the deity Śiva. "] Karttikeya is the Mars of the Hindus, the god of war. He is represented as riding on peacock called Paravāni, holding a bow in one hand and an arrow in another. His wife is called Kaumari, Senā or Devasenā. As a warrior he is called Mahāsena, Senāpati, Siddhasena &c. He is also called कुमार the young, गुह the mysterious one, Saktidhara, and in the South he is called Subrahmaṇya. He is also called Kraunchadārana or ' the Splitter of the mountain Krauncha. " The Vāyu-purāṇa attributes the splitting of the mountain to Kārttikeya. Indra and Kārttikeya had a dispute about their respective powers. and they agreed to decide it by running a race round the mountain. They disagreed as to the result and therefore appealed to the mountain who untruly decided in favour of Indra. Kārttikeya hurled his lance at the mountain and at once pierced it and the demon Mahisha."—Dowson. According to Sumati., the fig. in this śl. is जाति or स्वभावोक्ति which he thus defines :-नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती । स्वभावोक्तिश्च जातिश्चेत्याद्या साऽलंकृतिर्यथा ॥

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा[1] कुवलयदल[2]प्रापि[3] कर्णे करोति ।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिर्गर्जितैर्नर्तयेथाः[4] ॥ ४७ ॥

47. Thereafter, with your thunderings prolonged by their being echoed (*lit*, caught up) by the mountain, do you make that Skanda's peacock dance, the outer corners of whose eyes are brightened by the lustre of Siva's moon, and whose moulted feather, bearing circles of streaks of lustre. Bhavāni, out of affection for her son, places on her ear, usually the seat of a blue lotus-petal (*or* so as to make it come in contact with the lotus-petal resting there).

---

१ प्रीत्या. २ पद. ३ स्पर्धि. ४ आप्याययेः.

ज्योतिरिति ।। [ज्योतिर्लेखावलयि] ज्योतिषस्तेजसो लेखा राजयस्तासां वलयं मण्डलं यस्यास्तीति तथोक्तम् । गलितं भ्रष्टम् न तु लौल्यात्स्वयं छिन्नमिति भाव: । यस्य मयूरस्य बर्हं पिच्छम् । 'पिच्छबर्हे नपुंसके' इत्यमर: । भवानी गौरी । पुत्रप्रेम्णा पुत्रस्नेहेन । कुवलयदलप्रापि । कुवलयस्य दलं पत्रं तत्प्रापि तद्योगि यथा तथा कर्णे करोति । दलेन सह धारयतीत्यर्थ: । यद्वा कुवलयस्य दलप्रापि दलभाजि दलार्हे कर्णे करोति । क्विबन्तात्सप्तमी । दलं परिहृत्य तत्स्थाने बर्हं धत्त इत्यर्थ: । नाथस्तु 'कुवलयदलक्षेपि' इति पाठमनुसृत्य 'क्षेपो निन्दाऽपसारणं वा' इति व्याख्यातवान् । हरशशिरुचा । हरशिरश्चन्द्रिकया धौतापाङ्गं स्वतोऽपि शौक्ल्यादतिधवलितनेत्रान्तम् । 'अपाङ्गौ नेत्रयोरन्तौ' इत्यमर: । [पावके:] पावकस्याग्नेरपत्यं पावकि: स्कन्द: । 'अत इञ्' । तस्य तं पूर्वोक्तं मयूरं पश्चात् पुष्पाभिषेचनानन्तरम् [अद्रिग्रहणगुरुभि:] अद्रेर्देवगिरे: कर्तु: ग्रहणेन गुहासंक्रमणेन गुरुभि: । प्रतिध्वानमहद्भिरित्यर्थ: । गर्जितै: नर्तयेथा: नृत्यं कारय । मार्दङ्गिकभावेन भगवन्तं कुमारमुपास्वेति भाव: । 'नर्तयेथा:' इत्यत्र 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इत्यात्मनेपदापवाद: । 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदं न भवति तस्य 'न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवस:' इति प्रतिषेधात् ।।

Śl. 47. **ज्योतिर्लेखा०**—The circles of the bright lines (on a peacock's feather) **भवानी**—mark the *fem.*; आन् is inserted in the case of the words इंद्र, वरुण, शर्व, &c. before the fem. affix ई, see Pān. IV. 1. 49. **कुवलय०**—Malli. interprets this in two ways :— (1) दलं प्राप्नोतीति प्रापि *adj.* to बर्हं (getting close to or coming in contact with the lotus-petal) *i. e.* places it on her ear along with the lotus-petal. (2) ०दलं प्राप्नोतीति प्राप् तस्मिन् ०दलप्रापि कर्णे, on the ear which usually holds the petal of a blue lotus. **धौता०**—धौतौ अपाङ्गौ यस्य तम्. **पावके** :–see com.; the son of Agni; see notes on the previous Śl. **अप्याययेः** :—*v. l.* you should regale or please. **मयूरं**—who is his vehicle. **०गुरु**—Deepened or prolonged by being caught up by (*i. e.* by their reverberations in) the caves of the mountain. **नर्तयेथा** :—peacocks are often represented as dancing when they hear the thunder of clouds : *cf.* जलदपङ्क्तिरनर्तयदुन्मदं कलविलापि कलापिकदम्बकम् । Siś. VI. 30. मेघध्वानेषु नृत्तं भवति च शिखिनां नाप्यशोके फलं स्यात्. The root नृत् takes Atm. in the Causal by the rule " The Causals of the verbs पा to drink, दम् to tame &c. (see com.) ऋच् to shine, नृत् to dance, वद् and वस्, take the Atm. termination." This rule debars the action of the Sūtra निगरण &c.— *i. e.* in the Causatives of verbs having the sense of eating or swallowing and shaking or moving, the Parasm-Pada is employed

even when the fruit of the action goes to the agent, and of अणाव०,— *i. e.* the Parasm. is employed in the causal of a verb which, in its non-causal state, was intransitive and had a being endowed with reasoning for its agent, even though the fruit of the action accrues to the agent. नृत् being a चलनार्थक root and also चित्तवत्कर्तृक, those two Sūtras would otherwise have been applicable. See Malli.

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः[1] ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्य-
न्स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्तिम् ॥ ४८ ॥

48. When you will go over some distance, after having waited on the god born of Sara reeds, your path being left by the pairs of Siddhas bearing lutes (in their hands) from fear of the drops of water, do you hang down (and stop there) to do honour to the glory of Rantideva, sprung from his slaughter (in sacrifices) of cows (*lit.* daughter of Surabhi) and appearing on earth in the form of a river.

आराध्येति ॥ एनं पूर्वोक्तं [शरवणभवं] शरा बाणतृणानि ॥ 'शरो बाणे बाणतृणे' इति शब्दार्णवे ॥ तेषां वनं शरवणम् ॥ 'प्रनिरन्तःशरे–' इत्यादिना-णत्वम् । तत्र भवो जन्म यस्य तं शरवणभवम् ॥ 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः ।' इति वामनः । अवर्ज्योऽगतिकत्वादाश्रयणीय इत्यर्थः । देवं स्कन्दम् ॥ 'शरजन्मा षडाननः' इत्यमरः आराध्य उपास्य वीणिभिः वीणावद्भिः ॥ व्रीह्यादित्वादिनिः ॥ सिद्धद्वन्द्वैः सिद्धमिथुनैः भगवन्तं स्कन्दमुपवीणयितुमागतैरिति भावः । जलकणभयात् । जलसेकस्य वीणाक्वणप्रतिबन्धकत्वादिति भावः । मुक्तमार्गः त्यक्तवर्त्मा सन् उलङ्घिताध्वा । कियन्तमध्वानं गत इत्यर्थः । [सुरभितनयालम्भजा] सुरभितनयानां गवामालम्भेन संज्ञपनेन जायत इति तथोक्ताम् । भुवि लोके स्रोतोमूर्त्या प्रवाहरूपेण परिणतां रूपविशेषमापन्नां रन्तिदेवस्य दशपुरपतेर्महाराजस्य कीर्तिम् । चर्मण्वत्याख्यां नदीमित्यर्थः । मानयिष्यन् सत्कारष्यन् व्यालम्बेथा- । आलम्ब्यावतरेरित्यर्थः । पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेष्वेकत्र संभृताद्रक्त-निष्यन्दाच्चर्मराशेः काचिन्नदी सस्यन्दे । सा चर्मण्वतीत्याख्यायत इति ॥

Śl. 48. **शरवणभवं**—see notes on śl. 45 above. The न of वन is changed to ण, even when the comp. is not a name, when it is

---

[1] दत्तमार्गः; दत्तवर्त्मा.

precceded by प्र, निर्, अन्तर्, and the words शर, इक्षु &c. See Pān. VIII. 4. 5. ०भवं—a Vyadhikarana Bah.; such a Bah. is allowed when words like जन्म (भव) &c. form its latter part, see Malli. जलकण--० for the lutes or the strings get out of tune when wet with water. वीणिभि.-वीणा एषां विद्यते इति वीणीनि तैः. सुराभि०--आलम्भ means killing (as an animal at a sacrifice). The reference is to the river called Charmanvati, the modern Chambal, formed of the blood flowing from the skins of numorous cows killed by Rantideva in his sacrifices (called *Gosava.*) रन्तिदेव—King of दशपुर, was the younger of the two sons of संस्कृति and sixth in descent from Bharata. "He is mentioned in the Mahābhārata and the Purāṇas as being enormouely rich, very religious, charitable, and profuse in his sacrifices."—Dowson.

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात्प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥ ४९ ॥

49. When you, the robber of Krishna's complexion (resembling Krishna in colour), will bend down to drink its water the sky-rangers will surely turn their eyes and look at the current of that river appearing slender owing to the distance, though large, as if it were a one-stringed necklace of the earth having a big sapphire for its central gem.

त्वयीति ॥ शार्ङ्गिणः कृष्णस्य वर्णस्य कान्तेश्चौरे वर्णचौरे। तत्तुल्यवर्ण इत्यर्थः । त्वयि जलमादातुं अवनते सति पृथुमपि [दूरभावात्] दूरत्वात् तनुं सूक्ष्मतया प्रतीयमानं तस्याः सिन्धोः चर्मण्वत्याख्यायाः प्रवाहम् । गगने गतिर्येषां ते गगनगतयः खेचराः सिद्धगन्धर्वादयः । अयमपि बहुव्रीहिः पूर्ववज्जन्माद्युत्तरपदेषु द्रष्टव्यः । नूनं सत्यं दृष्टीः आवर्ज्य नियम्य एकं एकयष्टिकं [स्थूलमध्येन्द्रनीलम्] स्थूलो महान्मध्यो मध्यमणीभूत इन्द्रनीलो यस्य तं भुवः भूमेः मुक्तागुणं मुक्ताहारम् इव प्रेक्षिष्यन्ते । अत्रात्यन्तनीलमेघसंगतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेनोत्प्रेक्षणादुत्प्रेक्षैवेयमितीवशब्देन व्यज्यते । निरुक्तकारस्तु 'तत्र तत्रोपमा यत्र इवशब्दस्य दर्शनम् । ' इतीवशब्ददर्शनादत्राप्युपमैवेति बभ्राम ॥

Sl. 49. जलमादातुं--to take up; *i. e.* to drink. *Cf.* जलाभिलाषी जलमाददानां Ragh. II. 6. शार्ङ्गिन्—Vishnu or Krishna. *lit.* the

१ दूरम्.

wielder of Sāranga, the name of Vishnu's bow made of horn. शृङ्गस्य विकारः शाङ्गं धनुरस्यास्तीति शाङ्र्गी. वर्णचौरे--a poetic way of saying-who resemble Vishnu in colour. गगनगतयः--those moving in the sky, gods and demi-gods. आवर्ज्य--turning and fixing on it, एकं मुक्तागुणमिव &c.--The current of the river is compared to a pearl necklace consisting of one string, while the cloud hanging over it in close conformity is likened to a huge sapphire forming its central gem. Such an appearance the river would present to a beholder from the sky from a great distance. For a similar idea, *cf.* एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी । मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ।। Ragh. XIII. 48.

तामुत्तीर्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णशारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं[1]
पात्रीकुर्वन्दशपुरवधूनेत्रकौतूहलानाम् ।। ५० ।।

50. Having crossed that river, proceed, making your form an object of curiosity to the eyes of the ladies of Dasapura, which are well-acquainted with the sportive movements of the bushy eye-brows, whose dark and variegated lustres flash up owing to the eye-lashes being lifted up, and which rival with the beauty of the bees following the *Kunda* flowers as they are tossed about.

तामिति ।। तां चर्मण्वतीम् उत्तीर्य [**परिचितभ्रूलताविभ्रमाणां**] भ्रुवो लता इव भ्रूलताः । उपमितसमासः । तासां विभ्रमा विलासाः परिचिताः क्लृप्ता येषु तेषां [**पक्ष्मोत्क्षेपात्**] पक्ष्माणि नेत्रलोमानि । 'पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनि ।' इति विश्वः । तेषामुत्क्षेपादुन्नमनाद्धेतोः । [**उपरिविलसत्कृष्णशारप्रभाणां**] कृष्णाश्च ताः शाराश्च कृष्णशारा नीलशबलाः । 'वर्णो वर्णेन' इति समासः । 'कृष्णरक्तसिताः शाराः' इति यादवः । ततश्च शारशब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थम् । रक्तत्वे तु न विवक्षितमुपमानानुसारात्तस्य स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधादितरस्याप्रसङ्गात् । क्वचिद्भावकथनं तूपपत्तिविषयम् । उपरि विलसन्त्यः कृष्णशाराः प्रभा येषां तेषाम् । [**कुन्दक्षेपानुगमधुकरश्रीमुषाम्**] कुन्दानि माध्यकुसुमानि । 'माध्यं कुन्दम्' इत्यमरः । तेषां क्षेप इतस्ततश्चलनं तस्यानुगा अनुसारिणो ये मधुकरास्तेषां श्रियं मुष्णन्तीति तथोक्तानाम् । क्षिप्यमाणकुन्दानुविधायिमधुकरकल्पनामित्यर्थः [**दशपुरवधूनेत्रकौतूहलानाम्**]

[1] युषाम्.

दशपुरं रन्तिदेवस्य नगरं तस्य वध्वः स्त्रियः। 'वधूर्जाया स्नुषा च' इत्यमरः। तासां नेत्रकौतूहलानां नेत्राभिलाषाणाम्। साभिलाषदृष्टीनामित्यर्थः। आत्मबिम्बं स्वमूर्ति पात्रीकुर्वन् विषयीकुर्वन् व्रज गच्छ ॥

Śl. 50. **परिचित..णां**–qualifies नेत्रकौतूहलानाम्. परिचित––acquainted with, *i. e.* versed in. **भ्रूलता**––long and bushy eyebrows. **विभ्रम**—graceful movements. *Cf.* हावो मुखविकारः स्याद्भावश्चित्तसमुद्भवः विलासो नेत्रयोर्ज्ञेयो विभ्रमो भ्रूसमुद्भवः ॥ उत्क्षेप––their being turned or lifted up. शार–variegated. कृष्ण is added to show that the dark colour was more prominent. *Cf.* कृष्णशारच्छविर्योऽसौ..कटाक्ष इव पातितः। Vik. IV. 31. कुन्दक्षेपा०––" The Kunda (*Jasminum pubecens*) bears a beautiful white flower, and the large black bee being seated in the centre of its cup, they afford a very delicate and truly poetical resemblance to the dark iris and white ball of a full black eye. " Wilson. **श्रीमुषां**–resembling in beauty. *Cf.* वर्णचौरे in the last śl. **दशपुर०**—*lit.* ' the province of ten. ' It was also the name of a city, the capital of Rantideva, and may possibly be, says Wilson, the modern Rantipore or Rantampore, especially as that town, lying a little to the north of the Chambal, and in the line from उज्जयिनी to ठाणेश्वर, is consequently in the course of the cloud's progress, and the probable position of Daśapura. It is identified with the modern Dasor of Mandasor on the north or left bank of the Sivanā, and is the chief town of the Mandasor district in Scindia's dominions in the Western Mālvā division of Central India. It must have been an important city in ancient times as it is mentioned in the Mahābhārata, the Nasik inscription and the Gupta inscriptions. **नेत्रकौतूहलानां**––is equivalent to कुतूहलपूर्णनयनानां, of the eyes full of curiosity.

ब्रह्मावर्तं जनपदमथ¹च्छायया गाहमानः
क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः।
राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा
धारापातैस्त्वमिव कमलान्य²भ्यवर्षन्मुखानि ॥ ५१ ॥

51. Then entering (crossing) the country of Brahmāvarta by your shadow, repair to that field of the Kurus. memorable for (indicative of) the war between the Kshatriyas, where Arjuna

---

१ अधः, अदः. २ अभ्यषिञ्चत्.

(the wielder of the bow Gāṇḍīva) poured a rain (*lit.* hundreds) of arrows on the heads of the Kshatriya warriors, as you do heavy showers on the lotuses.

ब्रह्मावर्तमिति ।। अथ अनन्तरं **ब्रह्मावर्तं** नाम **जनपदं** देशम् । अत्र मनुः 'सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते' ।। इति छायया अनातपमण्डलेन **गाहमानः** प्रविशन्न तु स्वरूपेण । 'पीठक्षेत्राश्रमादीनि परिवृत्यान्यतो व्रजेत् ।' इति वचनात् । **क्षत्रप्रधनपिशुनम्** । अद्यापि शिरःकपाल- दिमत्तया कुरुपाण्डवयुद्धसूचकमित्यर्थः । 'युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ।' इत्यमरः । तत् प्रसिद्धं कुरूणामिदं **कौरवं क्षेत्रं भजेथाः** । कुरुक्षेत्रं व्रजेत्यर्थः । **यत्र** कुरुक्षेत्रे । गाण्डचस्यास्तीति गाण्डीवं धनुर्विशेषः । 'गाण्डचजगात्संज्ञायाम्' इति मत्वर्थीयो वप्रत्ययः । 'कपिध्वजस्य गाण्डीवगाण्डीवौ पुंनपुंसकौ ।' इत्यमरः । तद्धनुर्यस्य स **गाण्डीवधन्वा** अर्जुनः । 'वा संज्ञायाम्' इत्यनङादेशः । **शितशरशतैः** निशितबाणसहस्रैः **राजन्यानां** 'राज्ञां **मुखानि** [**धारापातैः**] धाराणामुदकधाराणां पातैः **कमलानि त्वं इव अभ्यवर्षत्** अभिमुखं वृष्टवान् । शरवर्षेण शिरांसि चिच्छेदेत्यर्थः ।।

Śl. 51. **ब्रह्मावर्त**—or the Holy Land, is the name of a country north-west of Hastināpura and contiguous to Kurukshetra. It is mentioned by Manu as situated between the divine rivers Sarasvati and Drishadvati. See Manu. II. 17. **क्षत्रप्रधन०**–क्षत्राणां प्रधनं तस्य पिशुनं indicative of the battle between the Khastriyas. **क्षेत्रं कौरवं**–*i. e.* Kurukshetra, one of the sacred places of India and the scene of the great war between the Pāndavas and the Kauravas. It lies a little to the south-east of Thaneshvar and is watered by the river Sarasvati. It is thus described by Manu along with other districts :–कुरुक्षेत्रं च मत्स्याश्च पञ्चालाः शूरसेनकाः । एष ब्रह्मर्षिदेशो वै ब्रह्मा- वर्तादनंतरः ।। Manu,–S.II.19. " To the south-east of Kuluta beyond Trigarta, lay the district of Kurukshetra, the residents of whlch were styled Śarasvatas from the river Sarasvati, and misnamed Vikarnikas or " having small ears " (सारस्वता विकर्णिकाः Hema- chandra IV. 24). In its limited sense, it is the tract near the holy lake still known by the same name to the south of स्थानेश्वर. In the larger sense it extended from the south of Sarasvati to the north of the **दृषद्वती**. (दक्षिणेन सरस्वत्या दृषद्वत्योत्तरेण च । ये वसन्ति कुरुक्षेत्रं ते वसन्ति त्रिविष्टपे ।। Vanaparvan 83. 4). "—Anandoram Borooah, as quoted by Mr. Nandargikar. See his note for further information on the same. **राजन्यानां**—of Kashtriyas or kings, fr राजन् + य (अपत्यार्थे, राज्ञोऽपत्यं; or राजतीति fr. राज् to shine the Unādi aff. अन्य

गाण्डीव–गाण्डिः ग्रन्थिरस्यास्तीति गाण्डीवं (possessive aff. व), name of Arjuna's bow. Mark the change of धनुस धन्वन् at the end of a Bah. compound Fig. *Upama*.

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामधिगममपां सौम्य सारस्वतीना-
मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥ ५२ ॥

52. Having made use, O gentle one, of those waters of the Sarasvati, which the plough-holder (Balarāma), refusing to take part in the war out of his affection of his kinsmen, used, leaving off liquor, of flavour so agreeable to him and marked by (the reflection of) Revati's eyes, you will be purified internally, remaining black only in colour.

हित्वेति ॥ बन्धुप्रीत्या कुरुपाण्डवस्नेहेन। न तु भयेन। समरविमुखः युद्धनिःस्पृहः लाङ्गलमस्यास्तीति लाङ्गली हलधरः। अभिमतरसाम् अभीष्टस्वादां तथा [रेवतीलोचनाङ्कां] रेवत्याः स्वप्रियाया लोचने एवाङ्कः प्रतिबिम्बितत्वचिह्नं यस्यास्तां हालां सुराम् 'सुरा हलिप्रिया हाला' इत्यमरः। 'अभिप्रयुक्तं देशभाषापदमित्यत्र सूत्रे हालेति देशभाषापदमप्यतीव कविप्रयोगात्साधु' इत्युदाजहार वामनः। हित्वा त्यक्त्वा। दुस्त्यजामपीति भावः। याः सारस्वतीरपः सिषेवे हे सौम्य सुभग त्वं तासां [सारस्वतीनाम्] सरस्वत्या नद्या इमाः सारस्वत्यस्तासाम् [अपां] अभिगमम् सेवां कृत्वा अन्तः अन्तरात्मनि शुद्धः निर्मलो निर्दोषो भविता। 'ण्वुल्तृचौ' इति तृच्। अपि सद्य एव पूतो भविष्यसीत्यर्थः। 'वर्तमानसामीप्ये वर्तमानवद्वा' इति वर्तमानप्रत्ययः। वर्णमात्रेण वर्णेनैव कृष्णः श्यामः। न तु पापेनेत्यर्थः। अन्तःशुद्धिरेव संपाद्या न तु बाह्या। बहिःशुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्र भगवान्बलभद्र एव निदर्शनम्। अतो भवताऽपि सरस्वती सर्वथा सेवितव्येति भावः॥

Sl. 52. हालां–हाला, although originally a Prakrit word, has been Sanskritized, and used by great poets in their works. अभिमत०–अभिमतः रसो यस्याः तां; of agreeable flavour. Balarāma was so fond of wine that हलिप्रिया came to be one of its synonyms. रेवती०–Bearing the mark of the reflection of Revati's eyes and therefore dearer to him. As Revati looked into the sparkling wine while filling the cups for him, her eyes were reflected in it. *Cf.* प्रियामुखोच्छ्वासविकम्पितं मधु। Rit. I. 3. This epithet is added to

---

१ भूत्वा, कृत्वा, छित्त्वा. २ अभिगमम्.

show how difficult it was for him to give up drinking wine, and yet he did it. Balarāma, like other lovers or husbands, used to drink wine in company with his wife. *Cf.* घूर्णयन्मदिरास्वादमदपाटलितद्युती रेवतीवदनोच्छिष्टपरिपूतपुटे दृशौ॥ Sis. II. 16. *Cf.* Raghu. IX. 36. Revati, the daughter of king रेवत, was Belarāma's wife and was devoted to her husband. According to the Bhāg.-P., she was the daughter of Kakudmi, son of Revata, son of Anarta, who founded Kuśasthali, Revati was exceptionally beautiful, and her father went to Brahmā to ask him on whom to bestow her in marriage. Brahmā advised him to give her to Balarāma, who was an incarnation of the Supreme Being. तद्गच्छ देवदेवांशो बलदेवो महाबलः। कन्यारत्नमिदं राजन् नररत्नाय देहि भो॥ See Bhāg.-P. IX. 3. 28–35. बन्धुप्रीत्या—Although Krishna sided with the Pāndavas when war broke out between them and the Kauravas, Balarāma, not wishing to join either side, went on a pilgrimage to Sarasvati and other *tirthas. Cf.* श्रुत्वा युद्धोद्यमं रामः कुरूणां सह पाण्डवैः। तीर्थाभिषेकव्याजेन मध्यस्थः प्रययौ किल॥ सरस्वतीं प्रतिस्रोतं ययौ ब्राह्मणसंवृतः॥ Bhag.-P. XII. latter half, 75, 17. 18. When Balarāma visited the Naimisha forest in the course of his wanderings, he was received with due honour by the Rishis who were engaged in *Satra*. Sūta only did not rise to receive him. Angry at this he killed the sage with a blade of *kus'a* grass, he had in his hand. He thus incurred the sin of Brāhmaṇa murder, and for its expiation he was advised by the Rishis to go round Bhāratavarsha, visting all the holy places. It was probably on accouut of his *Prāyaschitta* that Balarāma had to give up drinking wine. See *Ibid,* ślokas 20–40 लाङ्गली—Balarāma, so called because his principal weapon was a Lāngala or a plough-share with which he dragged his enemies. He was the elder brother of Krishna, and is supposed to be an incarnation of Śesha, the serpent-king. *Cf.* Tis. II. 68. (निशम्य ताः शेशगवीः &c.) He was the seventh son of Vasudeva and Devaki, but was transferred to the womb of Rohini (another wife of Vasudeva) to be saved from the cruelty of Kaṁsa. When quite young, he killed the powerful demons. Dhenuka (in the form of an ass) and Pralamba. Once, when under the influence of wine, he called upon the river Yamunā to come to him that he might bathe; but his command not being heeded, he plunged his plough-share into the river and dragged the waters after him until the river assumed a human form and besought his forgiveness. He thus came to be called कालिन्दी-भेदन-

कर्षण &c. He taught both, Bhīma and Duryodhana, the use of the Mace or the Gadā. Sometimes he is regarded as an incarnation of Vishṇu. *Cf.* केशव धृतहलधररूप जय जगदीश हरे । Gīt. I. It is related in the Mahābhārata that Vishnu took two hairs—a white and a black one—and these became Balarāma and Krishna, the sons of Devaki–one of fair complexion, the other dark. He is also संकर्षण 'ploughman,' मुसली, the pestle-holder, कामपाल &c. From his wearing black garments he was called नीलाम्बर, नीलवस्त्र &c. See *infra*, the quotions given under śl. 62. अधिगम—This is the reading of the Pārsva., Valla. and some other commentators, and is preferable to अभिगम found in Malli.'s commentary. For, the former directly means सेवन which is the sense required by the context, while अभिगम means 'approaching contact'. Malli., too, seems to have read अधिगम as he interprets it as सेवा, अभि being probably a mislection for अधि. We have, therefore, changed अभि into अधि. सारस्वतीनां—*i.e.* of the river Sarasvati. Sarasvati, one of the holy rivers of India, falls from the southern portion of the Himālayas and runs into the great desert where it is lost in the sands. "It flows a little to the north-west of Kurukshetra and though rather out of the line of the cloud's progress, not sufficiently so to prevent the introduction into the poem of a stream so celebrated and so holy."—Wilson. Sarasvati is said to be particularly holy in Kurukshetra. *Cf.* गङ्गा कनखले पुण्या कुरुक्षेत्रे सरस्वती । ग्रामे वा यदि वाऽरण्ये पुण्या सर्वत्र नर्मदा ।। त्वमपि—You, too, like Balarāma. Balarāma was sent to the Sarasvati for a time for the expiation of the sin he had incurred by killing a charioteer at Krishna's instance. भविता—Nom. sing. of the verbal noun in तृ: or it may be the 2nd per. sing. of the Peri, Fut. of भू (भवितासि) भविता and असि (read त्वमसि which is the reading of the Vāṇi-Vilāsa ed) being transposed for the exigencies of metre. Such instances are not rare; *cf.* तं पातयां प्रथममास. Ragh. IX. 61; प्रभ्रंशयां यो नहुषं चकार । *Ibid* XIII. 36; संयोजयां विधिवदास XVI. 86; उक्षां प्रचक्रुर्नगरस्य मार्गान् । Bhaṭṭi. III. 5. According to Sārasvataṭikākaras, these forms are justifiable.

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जाह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव[1] फेनैः
शंभोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ।। ५३ ।।

---

१ एव उच्च.

53. Thence you should go to Jahnu's daughter (the Ganges) descending from the lord of mountains (Himālaya) near mount Kanakhala, who served as the flight of the steps to heaven to Sagara's sons, and who, laughing as it were by her form at the frown on Gauri's face, seized the hair of Śiva, her hands in the form of waves stretching to the moon (on his crest).

तस्मादिति ।। तस्मात् कुरुक्षेत्रात्कनखलस्याद्रेः समीपे **अनुकनखलम्** । 'अनुर्यत्समया' इत्यव्ययीभावः [**शैलराजावतीर्णां**] शैलराजाद्धिमवतोऽवतीर्णां [**सगरतनयस्वर्गसोपानपङ्क्तिम्**] सगरतनयानां स्वर्गसोपानपङ्क्तिम् । स्वर्गप्राप्तिसाधनभूतामित्यर्थः।जह्नोः नाम राज्ञः **कन्यां** जाह्नवीं **गच्छेः** गच्छ । विध्यर्थे लिङ् । या जाह्नवी [**गौरीवक्त्रभ्रुकुटिरचनां**] गौर्या वक्त्रे या भ्रुकुटिरचना सापत्न्यरोषाद् भ्रूभङ्गकरणं तां **फेनैः विहस्य** अवहस्य इव । धावल्यात्फेनानां हासत्वेनोत्प्रेक्षा । इन्दौ शिरोमाणिक्यभूते लग्ना ऊर्मय एव हस्ता यस्याः सा **इन्दुलग्नोर्मिहस्ता** सती **शंभोः केशग्रहणं अकरोत्** । यथा काचित् प्रौढा नायिका सपत्नीमसहमाना स्ववाल्लभ्यं प्रकटयन्ती स्वभर्तारं सह शिरोरत्नेन केशेष्वाकर्षति तद्वदिति भावः । इदं च पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात्पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राहेति कथामुपजीव्योक्तम् ।।

Śl. 53. अनुकनखलं--Kanakhala is the name of a *Tirtha* or holy place (still retained) near Haridwār where the Ganges descends into the low ground of Hindustan. The village is situated on the west bank of the Ganges. "The meaning of the word," says Wilson, "agreeably to a forcep etymology, is thus explained in the Gangāmahatmya-Section of the Skanda-Purāṇa-खलः को नात्र मुक्तिं वै भजते तत्र मज्जनात् । अतः कनखलं तीर्थं नाम्ना चक्रुर्मुनीश्वराः ।। "What man (कः) so wicked (खलः) as not (न) to obtain future happiness from bathing there ? Thence &c." It is also mentioned in the following passages of the Harivamśa गङ्गाद्वारं कनखलं सोमो वै तत्र संस्थितः and स्नात्वा कनखले तीर्थे पुनर्जन्म न विद्यते ।। Malli. takes *Kanakhala* to refer to the mountain there through the gorge of which the Ganges descends. This is supported by the following Śl. from the Mahābhārata- एते कनखला राजन् ऋषीणां दयिता नगाः ।। Vanap. CXXXV. 5 The place was probably so called on account of gold being found there (कनकखलं being corrupted into कनखल afterwards): *Cf.* तीर्थं कनखलं नाम गङ्गाद्वारेऽस्ति पावनम् । यत्र काञ्चनपातेन जाह्नवी देवदन्तिना । उशीनरगिरिप्रस्थाद्भित्त्वा तमवतारिता ।। Kathas. III. 4-5. जह्नोः कन्यां--When Bhagiratha brought down Gangā, the river in its course swept the sacrificial grounds of the sage Jahnu,

who being disturbed in his devotions drank up its water, but let it off from his ears on relenting at the importunity of Bhagīratha. Gangā thus came to be called his daughter. Wilson remarks—"Jahnu's daughter is Gangā or the Ganges, which river, after forcing its way through an extensive tract of mountainous country, here first enters on the plains. It is rather extraordinary that Kālidāsa should have omitted the name of Haridwār and preferred Kanakhala, especially as the former occurs in the Purāṇas...... and in this passage from the Matsya. P. cited in the Purāṇasarvasva–सर्वत्र सुलभा (easily accessible) गङ्गा त्रिषु स्थानेषु दुर्लभा । हरिद्वारे प्रयागे च गङ्गासागरसंगमे ।। सगरतनय०—Sagara was a king of the solar race, so called because when born he was affected with the poison (गर) administered to his mother when pregnant by his father's other wife. When he began his hundredth horse-sacrifice, Indra, fearing he might lose his place in case the sacrifice was concluded, stole away the horse, and carrying it to Pātala placed it by the side of the sage Kapila, who was practising penance there. The 60,000 sons of Sagara, who were appointed the guardians of the horse, dug the earth in the course of their search for the animal (see Ragh. XIII. 3), and finding the horse grazing near Kapila, they insulted him, calling him the thief; whereupon the sage, highly incensed, reduced them to ashes by the flame of fire that flashed forth from his person. There they remained unsaved for hundreds of years for their souls could be conveyed to heaven only if their ashes were washed by the waters of the celestial river Ganges. Neither Sagara nor his son Aṃśumān, nor his grandson Dilīpa, was able to effect the descent of the heavenly river; his great-grandson Bhagīratha, however, succeeded, by his long-continued austerities, in causing the descent of Gangā to the nether world; the ashes of his forefathers were then washed with its waters and their souls raised to heaven. To reward Bhagīratha's labours Brahmā ordained that Gangā should thenceforth be called Bhāgīrathī. For the full story see Rāmā. Bāla-K. Cantos. XXXV.-XLIV. गौरीवक्त्र &c.—As the fall from heaven of such a great river as the Ganges would have washed off the earth, Brahmā asked Bhagīratha to request Śiva to bear Gangā first on his head. Bhagīratha was then obliged to practise penance.. Śiva was pleased after a year, and granted his request. Gangā in her pride thought that she might bear away Śiva also to the nether world, and fell upon his head with great violence.

The god's. head, however, assumed immense proportions, and Gangā wandered and wandered in the tresses of his matted hair for years.together without finding a passage out. Bhagīratha then had to propitiate Śiva again, who at his instance let off the river which descended from his head in seven streams (four according to some and ten according to others) known as the Sapta Sindhus. Hence Śiva came to be called Gangādhara, This incident has also furnished poets with a theme to represent Gangā and Pārvati as co-wives. *Cf.* धन्या केयं स्थिता ते शिरसि.... देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ।। Mudrā. I. 1; तदुक्तं वहुमार्गगां मम पुरो निर्लज्ज वोढुस्तव &c. Ratn. I. 3. ०भृकुटिरचनां—Pārvati bent her eye-brow in jealous indignation at the thought that Śiva had honoured Gangā her co-wife, with a seat on his head. विहस्येव फेनैः—the foam being white is looked upon as the laugh of Gangā; see com.; *cf.* जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम् । (गङ्गा ददर्श) Rāmā. Ayodh. Canto L 16. फेनैः &c.—The foam is made to take the place of a laugh, the moon of a crest-jewel, and the waves, of hands. See com. Fig. *Utprekshā* according to some.

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्धलम्बी[1]
त्वं चेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः ।
संसर्पन्त्या[2] सपदि भवतः स्रोतसि च्छाययाऽसौ[3]
स्यादस्थानोपगत[4]यमुनासंगमेवाभिरामा[5] ।। ५४ ।।

54. Should you think of drinking her water, clear like transparent crystal, obliquely and remaining suspended from the sky by your hinder part, like a quarter-elephant, then by yonr image mirrored in the stream moving along, the river will at once appear as beautiful as if it were united with the Yamunā at a place other than Prayāga.

तस्या इति ।। सुरगज इव । कश्चिद्दिग्गज इव व्योम्नि पश्चादर्धं पश्चार्धम् । पश्चिमार्धमि त्यर्थः । पृषोदरादित्वात्साधुः । तेन लम्बत इति पश्चार्धलम्बी सन्पश्चार्धभागेन व्योम्नि स्थित्वा । पूर्वार्धेन जलोन्मुख इत्यर्थः अच्छस्फटिकविशदं निर्मलस्फटिकावदातं तस्याः गङ्गायाः अम्भः तिर्यक् तिरश्चीनं तथा यथा पातुं त्वं तर्कयेः विचारयेः चेत् । सपदि स्रोतसि प्रवाहे । संसर्पन्त्या संक्रामन्त्या भवतः छायया

१ पूर्वार्धलम्बी. २ संतर्प्यन्त्या. ३ सा. ४ उपनत. ५ संगमेन.

प्रतिबिम्बेन असौ गङ्गा [अस्थानोपगतयमुनासंगमा] अस्थाने प्रयागादन्यत्रोपगतः प्राप्तो यमुनासंगमो यथा सा तथाभूता इव अभिरामा स्यात् ॥

Śl. 54. सुरगज:—here means a quarter-elephant or दिग्गज. The eight quarters have each their presiding deities called 'Dikpālas,' and each of these deities has a male and female elephant assigned to each direction. The names of the deities are इन्द्रो वह्निः पितृपतिर्नैर्ऋतो वरुणो मरुत् । कुबेर ईशः पतयः पूर्वादीनां दिशां क्रमात् ॥ Amara.; for the names of the elephants see *supra*, śl 14. Some take सुरगज to mean ऐरावत. पश्चार्ध०—Hanging by the hinder part; *i. e.* the hinder part resting in the sky. The word पश्चाद् is changed to पश्च irregularly, and so the comp. is classed as पृषोदरादि. The comp. may also be solved as अपर; अर्धः पश्चार्धः by the Vārttika अपरस्यार्धे पश्चभावो वक्तव्यः–'अपर becomes पश्च when followed by अर्ध in a Tat.'; see also Rāghavabhatta on पश्चार्धेन. Śak. I. 9. पूर्वार्धलम्बी *v. l.* —will have to be taken in the sense of 'hanging down by the forehalf.' अच्छस्फ०—अच्छश्चासौ स्फटिकश्च तद्वद्विशदम्. तर्कयेः—should expect to find. तिर्यक्:—slantingly. This is necessary to give the shadow of the cloud the appearance of the Yamunā converging to meet the Ganges. अस्थानोपगत०—here the sense of the negative particle अ is तदन्यत्व. The proper place of the confluence of the two rivers is Prayāga or Allahabad, which is considered very sacred (also by the subterraneous meeting of the Sarasvati); see Ragh. XIII. 58. For the idea, *cf.* कलिन्दकन्या मथुरां गताऽपि गङ्गोर्मिसंसक्तजलेव भाति । Ragh. VI. 48. अभिरामा—The mingling of the white and darkish waters of the two rivers must indeed be very charming : this has been beautifully described by Kālidāsa at Ragh. XIII. 54–57.

आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां
तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।
वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः
शोभां शुभ्र[1]त्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५५ ॥

55. On reaching the mountain, the source of that very river (*i. e.* Himālaya), white with snow and having its rocks scented by the musk of the deer squatting thereon, you seated on its peak for the removal of your fatigue, will possess, a beauty comparable to that of (a mass of) mud turned up by the white bull of the three-eyed God (Śiva).

---

१ शुभ्राम् रम्याम्.

आसीनानामिति।। आसीनानाम् उपविष्टानां मृगाणां कस्तूरिकामृगाणाम् अन्यथा नाभिगन्धानुपपत्तेः। नाभिगन्धैः कस्तूरीगन्धैस्तेषां तदुद्भवत्वात्। अत एव मृगनाभिसंज्ञा च। 'मृगनाभिर्मृगमदः कस्तूरी च' इत्यमरः।। अथ वा नाभयः कस्तूर्यः।। 'नाभिः प्रधाने कस्तूरीमदे च क्वचिदीरितः।' इति विश्वः।। तासां गन्धैः [सुरभितशिलं] सुरभिताः सुरभीकृताः शिला यस्य तं तस्याः गङ्गायाः एव [प्रभवम्] प्रभवत्यस्मादिति प्रभवः कारणम्। तुषारैः गौरं सितम्। 'अवदातः सितो गौरः' इत्यमरः। अचलं प्राप्य [अध्वश्रमविनयने] विनीयतेऽनेनेति विनयनम् करणे ल्युट्। अध्वश्रमस्य विनयनेऽपनोदके तस्य हिमाद्रेः शृङ्गे निषण्णः सन्। [शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम्] शुभ्रो यस्त्रिनयनस्य वृषो वृषभः। 'सुकृते वृषभे वृषः' इत्यमरः। तेनोत्खातेन विदारितेन पङ्केन सहोपमेयामुपमातुमर्हां शोभां वक्ष्यसि वोढासि। वहतेर्लृट्। 'त्रिनयन' इत्यत्र 'पूर्वपदात्संज्ञायामगः' इति णत्वं न भवति 'क्षुभ्नादिषु च' इति निषेधात्। तस्याः प्रभवमित्यादिना हिमाद्रौ मेघस्य वदाहिको गृहविहारो ध्वन्यते।।

Sl. 55. मृगाणां—"This animal is what is called the Tibet Musk; but its favourite residence is among the lofty Himālaya mountains which divide Tartary from Hindustan,"—Wilson. *Cf.* प्रस्थं हिमाद्रेर्मृगनाभिगन्धि Kum. I. 54: दृषदो वासितोत्सङ्गानिषण्णमृगनाभिभिः Ragh. IV. 74. तस्याः प्रभवः—Ganga personified is represented as the daughter of Himālaya. शुभ्रत्रिनयनवृष०—Siva's bull is of a white colour. *Cf.* कैलासगौरं वृषमारुरुक्षो Ragh. II 35. also Kum. VII. 27. गिरीशवृषभदेहद्युतिमिव पृथगवस्थितां (महाश्वेतां) Kad. वृषोत्खात—bulls, like elephants, are in the habit of tearing up earth from mounds, the skirts of mountains and &c. See *infra*, II. 53. *Cf.*..... शृङ्गाग्रलग्नाम्बुदवप्रपङ्क वन्धाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः Ragh. XIII. 47. In śl. 2 *supra*, the cloud is compared to an elephant engaged in the sport of butting.

तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै-
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम् ॥ ५६ ॥

56. If, while the wind blows, the wild fire, born of (generated by) the friction of the branches of the *Sarala* trees, which destroys with its sparks the thick tails of the *Chamaris*, should do damage to it, it will be proper for you to extinguish it completely with thousands of water-showers, for the riches of the great

have for their end the alleviation of the affliction of those in distress.

तमिति ॥ वायौ वनवाते सरति वाति सति [सरलस्कन्धसंघट्टजन्मा सरलानां देवदारुद्रुमाणां स्कन्धाः प्रदेशविशेषाः। 'अस्त्री प्रकाण्डः स्कंधः स्यान्मूला-च्छाखावधेस्तरोः।' इत्यमरः। तेषां संघट्टनेन संघर्षणेन जन्म यस्य स तथोक्तः। जन्मोत्तरपदत्वाद्व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम्। [उल्काक्षपितचमरी-बालभारः] उल्काभिः स्फुलिङ्गैः क्षपिता निर्दग्धाश्चमरीणां बालभाराः केशसमूहा येन। दव एवाग्निः दवाग्निः वनवह्निः। 'वने च वनवह्नौ च दवो दाव इतीष्यते।' इति यादवः। तं हिमाद्रिं बाधेत चेत् पीडयेद्यदि। एवं दवाग्निं वारिधारासहस्रैः [अलं साकल्येन] शमयितुम् अर्हसि। युक्तं चैतदित्याह—उत्तमानां महतां संपदः समृद्धयः [आपन्नार्तिप्रशमनफलाः] आपन्नानामार्तानामार्तिप्रशमनमापन्निवारणमेव फलं प्रयोजनं यासां तास्तथोक्ताः हि। अतो हिमाचलस्य दावानलस्त्वया शमयितव्य इति भावः ॥

Śl. 56. सरल—The Himālaya abounds in the *Sarala* trees which form a part of its description: see Kum. I. 9. Ragh. IV. 75. "The conflagration of the woods in India." remarks Wilson, "is of frequent occurrence, and the causes of it are here described by the poet. The interwining branches of the Sarala (Pinus longifolia) of the Bamboo, and other trees, being set in motion by the wind, their mutual friction engenders flame. This, spread abroad by the air, and according to the poet, by the thick tails of the Yak of Taratary or Bos Grunniens (from which Chauries are made), readily communicates to the surrounding foliage, dried up by the heat of the sun, and exceedingly inflammable." *Cf.* for description of a burning forest, Rit. I. 22–27. उल्का—sparks, flames. बाल०—the bushy tails. क्षपित—*p.p.p.* of क्षै Cau., 'destroyed, consumed by.' अर्हसि—you should please, it behoves you to. See *infra,* II. 21. अलं—completely. आपन्न—one in distress. आर्ति—fr. ऋ. with आ + ति. suffering. affliction. ०फला।—*Cf.* पिबन्ति नद्यः स्वयमेव नाम्भः खादन्ति न स्वादुफलानि वृक्षाः। नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः ॥ सा लक्ष्मीरुपकुरुते यया परेषाम्। Kir. VII. 28.

ये संरम्भ[1]ोत्पतनरभसाः [2]स्वाङ्गभङ्गाय तस्मि-
न्मुक्ता[3]ध्वानं सपदि शरभा [4]लङ्घयेयुर्भवन्तम्।
तान्कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णा-
न्के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः ॥ ५७ ॥

१ त्वां मुक्ताध्वनिमसहनाः २ कायभङ्गाय. ३ दर्पोत्सेकादुपरि. ४ लङ्घयिष्यन्त्यलङ्घ्यम्. ५ हासा.

57. Scatter away with heavy showers of hail-stones, those *Sarabhas* there, who, impetuous to jump up in anger, may suddenly attack you, standing out of their path, only to get their bodies shattered : Who, indeed, that direct their efforts to useless undertakings, do not become an object of contempt !

य इति ॥ तस्मिन् हिमाद्रौ [संरम्भोत्पतनरभसाः] संरम्भः कोपः । 'संरम्भः संभ्रमः कोपे ' इति शब्दार्णवे । तेनोत्पतने उत्प्लवने रभसो वेगो येषां ते तथोक्ताः। 'रभसो वेगहर्षयोः ' इत्यमरः । ये शरभाः अष्टापदमृगविशेषाः । 'शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे। ' इति विश्वः । [मुक्ताध्वानं] मुक्तोऽध्वा शरभोत्प्लवनमार्गो येन तं भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः । संभावनायां लिङ् । भवतोऽतिदूरत्वात्स्वाङ्गभङ्गातिरिक्तं फलं नास्ति लङ्घनस्येत्यर्थः । तान् शरभान् [तुमुलकरकावृष्टिपातावकीर्णान्] तुमुलाः संकुलाः कारका वर्षोपलाः। 'वर्षोपलस्तु करका ' इत्यमरः । तासां वृष्टिस्तस्याः पातेनावकीर्णान्विक्षिप्तान् कुर्वीथाः कुरुष्व । विध्यर्थे लिङ् । क्षुद्रोऽप्यधिक्षिपन्प्रतिपक्षः सद्यःप्रतिक्षेप्तव्य इति भावः। तथा हि । [निष्फलारम्भयत्नाः] आरभ्यन्त इत्यारम्भाः कर्माणि तेषु यत्न उद्योगः स निष्फलो येषां ते तथोक्ताः। निष्फलकर्मोपक्रमा इत्यर्थः। अतः के वा परिभवपदं तिरस्कारपदं न स्युः न भवन्ति । सर्व एव भवन्तीत्यर्थः । यदत्र ' घनोपलस्तु करके ' इति यादववचनात्करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण 'करकाणामवृष्टिः' इति केषांचिद्व्याख्यानं तदन्ये नानुमन्यन्ते। ' वर्षोपलस्तु करका ' इत्यमरवचनव्याख्याने क्षीरस्वामिना ' कमण्डलौ च करकः सुगते च विनायकः ' इति नानार्थे पुंस्यपि वक्ष्यतीति वदतोभयलिङ्गताप्रकाशनात् । यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं न तु स्त्रीलिङ्गतानिषेध इति न तद्विरोधोऽपि । 'करकस्तु करङ्के स्याद्दाडिमे च कमण्डलौ । पक्षिभेदे करे चापि करका च घनोपले॥ ' इति विश्वप्रकाशवचने तूभयलिङ्गता व्यक्तैवेति न कुत्रापि विरोधवार्ता। अत एव रुद्रः–' वर्षोपलस्तु करका करकोऽपि च दृश्यते ' इति ॥

Śl. 57. संरम्भो—संरम्भ anger. *Cf.* प्रणिपातप्रतिकारः संरम्भो हि
महात्मनाम् । Ragh. IV. 64. रुद्रसंरम्भभीत्या Kum. III. 76. रभस—im-
petuosity, great haste. स्वाङ्ग०— स्वेषामङ्गानि तेषां भङ्गाय (for
you being far out of their reach they will simply fall down) only
to get their own bodies shattered. This is meant as a compliment
to the cloud. मुक्ताध्वानं—who will have left their way one out of
their way. Another meaning, perhaps a better one, is मुक्तः आ सम-
न्तात् ध्वानः thunder येन. The Sarabha is supposed to be an enemy
of the lion and might be induced to attack the cloud mistaking
its thunder for the roar of a lion. For this reason the readings in
the foot-notes—*viz.* ये त्वां मुक्तध्वनिमसहनाः— । दर्पोत्सेका–(through
excess of vanity) दुपरि शरभा लङ्घयिष्यन्त्यलङ्घ्यम् ।.....हासानकीर्णान् ।

are better. अलङ्घ्य—incapable of being attacked वृष्टि-वृष्टिरेव ह्रासस्तेन &c. शरभाः—The Sarabha is described as an animal (according to some a bird, see Rit.) with eight legs, four of which are said to grow on its back (and hence sometimes called उर्ध्वपाद—see H.-Ch., Introd. Śl. 5). It is of a fierce untractable nature, and is said to kill a lion: *cf.* अष्टपादः शरभः सिंहघाती Maha-bh. तुमुल—in a dense mass; it may also mean 'fierce, heavy', and qualify पातः. करका—*fem.* hail-stone; it is also *mas.;* see com. निश्फला०—exerting themselves in a fruitless undertaking or attempt.

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः
शश्वत्सिद्धैरुपचितबलिं[1] भक्तिनम्रः परीयाः ।
यस्मिन्दृष्टे करणविगमादूर्ध्वमुद्[2]धूतपापाः
कल्पिष्यन्ते[3] स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५८ ॥

58. Bent low (humble) with devotion, go round, keeping it to the right, the foot-print of Śiva, the wearer of the crescent-moon on his forehead, clearly impressed on a stone-slab there and having offerings offered to it constantly by the Siddhas, on seeing which those, who have faith, being absolved from their sins, are able, on the falling-off of the body, to attain to the permanent post of Gaṇas.

तत्रेति ॥ तत्र हिमाद्रौ दृषदि कस्यांचिच्छिलायां व्यक्तं प्रकटं शश्वत् सदा सिद्धैः योगिभिः । 'सिद्धिनिष्पत्तियोगयोः' इति विश्वः ॥ उपचितबलिं रचितपूजा-विधिम् । 'बलिः पूजोपहारयोः' इति यादवः । [अर्धेन्दुमौलेः] अर्धश्चासाविन्दु-श्चेत्यर्धेन्दुः । 'अर्धः खण्डे समेंऽशके' इति विश्वः ॥ स मौलौ यस्य तस्येश्वरस्य चरणन्यासं पादविन्यासम् । [भक्तिनम्रः] भक्तिः पूज्येष्वनुरागस्तया नम्रः सन् परीयाः प्रदक्षिणं कुरु । परिपूर्वादिणो लिङ् । यस्मिन् पादन्यासे दृष्टे सति उद्धूतपापाः निरस्तकल्मषाः सन्तः श्रद्दधानाः विश्वसन्तः पुरुषाः । श्रद्धा विश्वासः । आस्तिक्य-बुद्धिरिति यावत् । 'श्रदन्तरोरुपसर्गवद्वृत्तिर्वक्तव्या' इति श्रत्पूर्वाद्दधातेः शानच् । [करणविगमात्] करणस्य क्षेत्रस्य विगमात् ऊर्ध्वं देहत्यागानन्तरम् । 'करणं साधकतमं क्षेत्रगात्रेन्द्रियेषु च ।' इत्यमरः । [स्थिरगणपदप्राप्तये] स्थिरं शाश्वतं गणानां प्रमथानां पदं स्थानम् । 'गणाः प्रमथसंख्यौघाः' इति वैजयन्ती । तस्य प्राप्तये कल्पिष्यन्ते । समर्था भविष्यन्ति । क्लृपेः पर्याप्तिवचनस्यालमर्थत्वात्तद्योगे 'नमःस्वस्ति–' इत्यादिना चतुर्थी । 'अलमिति पर्याप्त्यर्थग्रहणम्' इति भाष्यकारः । 'अव्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम् ।' हिमाद्रौ शांभवादीनां सिद्धये सर्व-

१ उपहृत, उपहित. २ दूरम्. ३ संकल्पन्ते, कल्पन्तेऽस्य.

कर्पणाम् ॥ दृष्ट्वा श्रीचरणन्यासं साधकः स्थितये 'तनुम् । इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयम् ॥ ' इति शंभुरहस्ये ॥

Śl. 58. चरणन्यास॰—The spot here alluded to may have some connexion with a neighbouring hill at Haridwâr called *Harkā pāiri*—'the foot of Hara.' It is called श्रीचरणन्यास in Sambhurahasya; see the quotation in the com. Wilson remarks—" The fancied or artificial print of some saint or deity on hills or detached stones is a common occurrence in the creeds of the east. The idea is not confined to the inhabitants of Hindustān, but is asserted similarly by those of Nepal, Ceylon, and Avā. The Mussulmans also have the same notion with respect to many of the prophets, &c. &c. " सिद्धैः—Those who are devoted to the practice of Yoga with a view to attain perfection in it and thereby Siddhi or miraculous power; hence *yogins*, devotees. The Himalaya is the favourite abode of the Siddhas; see Kum. 1. 5. उपचित—Malli. has to take this in the sense of उपरचित which is not directly obtained. उपहृत which is, therefore, a better reading. परीयाः—*i. e.* go round it, keeping it to the right side. Circumambulating a deity or a venerable person in this manner has been held in India, from the earlist times to be the mark of profound respect and is enjoined as religious duty. *Cf.* प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचर । Ragh. I. 76; and मृदङ्गं दैवतं विप्रं घृतं मधु चतुष्पथम् प्रदक्षिणानि कुर्वीत विज्ञातांश्च वनस्पतीन् ॥ quoted by Malli. in his com. on प्रदक्षिणीकृत्य हुतं हुताशं &c. Ragh. II. 71. Similarly Kanva also in the Sāk. asks Śakuntalā to go round the sacred fires at the time of her departure to her husband's house; see Sāk. IV. p. Wilson quotes the following ślokas from the Rāmā. in illustration of this :—जनकस्य वचः श्रुत्वा पाणीन् पाणिभिरस्पृशन् । चत्वारस्ते चतसृणां वसिष्ठस्य मते स्थिता ॥ अग्निप्रदक्षिणं कृत्वा वेदिं राजानमेव च । ऋषींश्चापि महात्मानः सहभार्या रघूद्वहाः ॥, and remarks—" A somewhat similar practice seems to have been in use amongst the Celtic nations. कल्पिष्यन्ते—The reading कल्पन्तेऽस्य is evidently better.

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संरक्ताभिस्त्रिपुरविजयो गीयते किंनरीभिः ।
निर्ह्रादस्ते[1] मुरज इव चेत्कंन्दरेषु[2] ध्वनिः स्या-
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः[3] ॥ ५९ ॥

१ निर्ह्रादी. २ कन्दरास. ३ समस्तः.

59. There the bamboos, as they are filled with wind, produce pleasing sounds, while the victory over Tripura is sung in a body (chorus) by the wives of the Kinnaras: if your thunder then, resounding in the caves, will be as deep as the sound of a tabor, the apparatus of Śiva's concert there will surely be complete.

शब्दायन्त इति ।। हे मेघ अनिलैः पूर्यमाणाः कीचकाः वेणुविशेषा । 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः ।' इत्यमरः । 'कीचको दैत्यभेदे स्याच्छुष्कवंशे द्रुमान्तरे ।' इति विश्वः । मधुरं श्रुतिसुखं यथा तथा शब्दायन्ते शब्दं कुर्वन्ति । स्वनन्तीत्यर्थः । 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इत्यादिना क्यङ । अनेन वंशवाद्यसंपत्तिरुक्ता 'संसक्ताभिः संयुक्ताभिर्वंशवाद्यानुषक्ताभिर्वा । 'संसक्ताभिः' इति पाठे संसक्तकण्ठीभिरित्यर्थः । किन्नरीभिः किंनरस्त्रीभिः । [त्रिपुरविजयः] त्रयाणां पुराणां समाहारस्त्रिपुरम् । 'तद्धितार्थोत्तरपद—' इति समासः । पात्रादित्वान्नपुंसकत्वम् । तस्य विजयः गीयते । कन्दरेषु दरीषु । 'दरी तु कन्दरो वा स्त्री' इत्यमरः ।। ते तव निर्ह्रादः मुरजे वाद्यभेदे ध्वनिः इव मुरजध्वनिरिवेत्यर्थः । स्यात् चेत् तर्हि तत्र चरणसमीपे पशुपतेः नित्यसंनिहितस्य शिवस्य । संगीतम् । 'तौर्यत्रिकं तु संगीतं न्यायारम्भे प्रसिद्धके । तूर्याणां त्रितयं च' इति शब्दार्णवे । तदेवार्थः संगीतार्थः संगीतवस्तु । 'अर्थोऽभिधेयैरवस्तुप्रयोजननिवृत्तिषु ।' इत्यमरः । समग्रः संपूर्णः भावी ननु भविष्यति खलु । 'भविष्यति गम्यादयः' इति भविष्यदर्थे णिनिः ।।

Śl. 59. **शब्दायन्ते—A denom. from** शब्द by adding य (क्यङ्) which forms Atm. verbs, **and is added** to शब्द, वैर &c. (see com.), standing as objects; शब्दं करोति शब्दायते so वैरायते &c. कीचकः— singing bamboos; Kālidāsa is fond of describing the music of the bamboos as that of flutes or harps and the sylvan and other deities singing to its accompaniment. *Cf.* यः पूरयन्कीचकरन्ध्रभागान्दरीमुखोत्थेन समीरणेन । उद्गास्यतामिच्छति किंनराणां तानप्रदायित्वमिवोपगन्तुम् ।। Kum. I. 8; स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् । शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ।। Ragh. II.12; see also IV. संसक्ताभिः— 'in a body', or having musical instruments with them. The reading संरक्ताभिः noticed by Malli. is better. It means, having a pleasing or sonorous voice. त्रिपुरविजयः—Mark the Comp. त्रिपुरं, which is neu. by the Vārttika पात्राद्यन्तस्य न, see com. The conquest of Tripura, *i. e.* the destruction of the three cities of gold, silver and iron built in the sky, mid-space and on earth by Maya for the demons, or their chiefs, Vidyunmāli, Raktāksha and Hiraṇyāksha. किन्नरी०—females of the Kinnaras; they are a class of demigods, so called because they have human figures with

horse's heads कुत्सिता नराः किंनराः अश्वमुखत्वात्. निर्ह्रादि—The reading निर्ह्रादि 'resounding,' is better. In this case we shall have to understand by मुरज its sound (by Lakshaṇa) मुरजध्वनिरिव but this is preferable to connecting ध्वनि with the Loc. मुरजे. संगीतार्थः—The materials or apparatus necessary for a musical concert. संगीत means 'the triple symphony of singing, instrumental music and dancing.' समग्रः—अग्रेण सहितः 'with the end', *i. e.* the whole.

प्रालेयाद्रेरुपतटमतिक्रम्य[1] तांस्तान्विशेषा—
न्हंसद्वारं भृगपतियशोवर्त्म यत्क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्यगायामशोभी[2]
श्यामः पादो बलिनियमनाभ्युद्यतस्येव[3] विष्णोः ॥ ६० ॥

60. Having passed beyond (after enjoying the sight of) the various objects of curiosity near the skirt of the Himālaya proceed to the north, looking beautiful by your length extended crosswise like the dark foot of Vishnu when ready to put down Bali, by the opening in (mount) Krauñcha, the gate of flamingos and the very path of glory of the most eminent of the Bhṛigus (Paraśurāma).

प्रालेयेति ॥ प्रालेयाद्रेः हिमाद्रेः उपतट तटसमीपे । 'अव्ययं विभक्ति—' इत्यादिना समीपार्थेऽव्ययीभावः । तांस्तान् । वीप्सायां द्विरुक्तिः । विशेषान् । द्रष्टव्यार्थान् । 'विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनि ।' इति शब्दार्णवे । अतिक्रम्य अनुसरेर्गच्छेरित्यनागतेन संबन्धः । हंसानां द्वारं हंसद्वारम् । मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण संचरन्ते इत्यागमः । [भृगुपतियशोवर्त्म] भृगुपतेर्जामदग्न्यस्य यशोवर्त्म । यशःप्रवृत्तिकारणमित्यर्थः । यत् [क्रौञ्चरन्ध्रम्] क्रौञ्चस्याद्रेः रन्ध्रमस्ति तेन क्रौञ्चबिलेन बलेर्दैत्यस्य नियमने बन्धने अभ्युद्यतस्य प्रवृत्तस्य [बलिनियमनाभ्युद्यतस्य] विष्णोः व्यापकस्य त्रिविक्रमस्य श्यामः कृष्णवर्णः पादः इव [तिर्यगायामशोभी] तिर्यगायामेन क्षिप्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभत इति तथाविधः सन् उदीचीम् उत्तरां दिशम् अनुसरेः अनुगच्छ । पुरा किल भगवतो देवाद्धूर्जटेर्धनुरुपनिषदमधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्धया क्रौञ्चशिखरिणमतिनिशितविशिखमुखेन हेलया मृत्पिण्डभेदं भित्त्वा तत एव क्रौञ्चक्रोडादेव सद्यः समुज्जृम्भिते कस्मिन्नपि यशः"क्षीरनिधौ निखिलमपि जगज्जालमाप्लावितमिति कथा श्रूयते ।

Śl. 60. उपतटं—तटस्य समीपे; Avya. तांस्तान्—various, of different sorts. विशेषान्—wonders, special scenes. हंसद्वारं—which

---

[1] उपक्रम्य. [2] अनुपतेः. [3] बलिनियमनेभ्यु०, नियमनायो०.

serves as a gate, *i. e.* as a passage to flamingos when they go annually to the lake Mānasa. भृगुपति—also called भृगद्वह &c., is Paraśurāma, being the most distinguished of the sons of Jamadagni (Bhrigu). यशोवर्त्म—Paraśurāma was taught *Dhanurveda* by Śiva on mount Kailāsa. One day, being jealous of the fame of Kārttikeya as the piercer of the Krauncha mountain, he also sent an arrow right through the mountain, and the fissure made by it in the mountain ever remained as the monument of this feat of his strength. क्रौञ्चरन्ध्रं—Historically, the fissure is said to be the passage opened by Paraśurāma with his arrows for himself on the occasion of his travelling southwards to destroy the Kshatriyas. " I have not been able, " observes Wilson, " to make anything of this pass or hole. Krauncha is described as a mountain in the Mahābhārata (Hariv. 942), and, being personified, is there called the son of Maināka. It must be at some distance from the plains; and perhaps the poet, by using the term उपतट, implies its relative situation with the loftiest part of the range or proper snow-clad mountains." बलिनियमना०–Bali, the son of Virochana and grandson of Prahlāda, was a powerful demon and oppressed the gods very much. To punish him, Vishṇu appeared as a Dwarf (Vāmana), and putting his foot on his head pressed him down to the nether world. The story is well known to the Hindu students. See Bali in Apte's Dic. विष्णोः—वेवेष्टि व्याप्नोति जगदिति; fr. विष् and Unādi aff. नु.

गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसंधेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ॥ ६१ ॥

61. Soaring still higher, you should be the guest of (the mountain) Kailāsa, the joints of whose peaks were loosened by Rāvaṇa, which serves as a mirror to the females of the gods, and which stands occupying the sky with its peaks white like lotuses, as if it were the loud laugh of Śiva accumulated day by day.

गत्वेति ॥ क्रौञ्चबिलनिर्गमनानन्तरम् ऊर्ध्वं च गत्वा [दशमुखभुजोच्छ्वासितप्रस्थसंधेः] दशमुखस्य रावणस्य भुजैर्बाहुभिरुच्छ्वासिता विश्लेषिताः प्रस्थानां

१ दर्शनस्य. २ तुङ्गाच्छायैः. ३ कुसुम. ४ प्रतिदिवसम्.

सानूनां संघयो यस्य तस्य । एतेन नयनकौतुकसद्भाव उक्तः । त्रिर्दश परिमाण-मेषामस्तीति त्रिदशाः । 'संख्ययाव्यया-' इत्यादिना बहुव्रीहिः । 'बहुव्रीहौ संख्येये डच्' इत्यादिना समासान्तो डचिति क्षीरस्वामी । [त्रिदशवनितादर्पणस्य] त्रिदशानां देवानां वनितास्तासां दर्पणस्य । कैलासस्य स्फटिकत्वाद्रजतत्वाद्वा बिम्ब-ग्राहित्वेनेदमुक्तम् । कैलासस्य अतिथिः स्याः । यः कैलासः कुमुदविशदैः निर्मलैः [शृङ्गोच्छ्रायैः] शृङ्गाणामुच्छ्रायैरौन्नत्यैः खम् आकाशं वितत्य व्याप्य प्रतिदिनं दिने दिने राशीभूतः त्र्यम्बकस्य त्रिलोचनस्य अट्टहासः अतिहास इव स्थितः । अट्टावतिशयक्षौमौ' इति यादवः । धावल्याद्धासत्वेनोत्प्रेक्षा । हासादीनां धावल्यं कविसमयसिद्धम् ॥

Sl. 61. दशमुख०—There is an allusion here to Rāvaṇa's attempt to remove Kailāsa to Lankā. When he tore it off from its foundations, it gave a rude shock to thepeaks and its inhabitants, and Pārvati clung to Śiva in alarm. To quiet her fears Śiva pressed down the mountain, and Rāvaṇa escaped from being crushed under it by pacifying the deity. *Cf.* कैलासश्रियमिव दशमुखोन्मूलनक्षोभ-निपतिताम् कैलासाद्रावुदस्ते परिचलति गणेषूल्लसत्कौतुकेषु । क्रुडेऽप्याश्लिष्ट-मूर्तिर्भयघनमुमया पातु तुष्टः शिवो नः ॥ Priy. 1. 2. समुत्क्षिपन्यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः । त्रसत्तुषाराद्रिसुतासंभ्रमस्वयंग्रहाश्लेषसुखेन निष्क्रयम् ॥ Sis. I. 50. See also Rāmā. Uttara. K. Canto XVI. उच्छ्वासित—Upheaved, pulled up; disunited. प्रस्थसंधेः—the joints of the peaks ०दर्पणस्य—being formed of crystals, it is transparent, and serves as a mirror to the wives of gods. शृङ्गोच्छ्रायैः—उच्छ्राय loftiness, height; श ० is equivalent to उच्छ्रितशृङ्गैः—(भावानयने द्रव्यानयनम्) *lit.* having extended into by the lofty peaks. विशद white, bright. वितत्य—having occupied or filled up. राशीभूतः—For the idea of lustre being stored up in a mass or heap. *Cf.* आशासु राशीभवदङ्गवल्लीभासैव दासीकृतदुग्धसिन्धुम् । Malli , पशुपतिमुखहासच्छविमिव कृतावस्थानाम्; Kād. प्रतिदिनं—प्रतिदिशं *v. l.* 'the reading is better, as it will better correspond with the white peaks (शृङ्गोच्छ्रायैः) all round. त्र्यम्बक त्रीणि अम्बकान्यस्य; 'having three eyes.' This word is variously derived as– त्रयाणां लोकानामम्बकः पिता; त्रीन्वेदानम्बते शब्दायते वा; त्रयः अकारोकारमकारा अम्बा शब्दा वाचका अस्य; तिस्रोऽम्बा द्यौर्भूमिरापो यस्येति तु भारतम् । Bhānuji Dikshita on Amara. अट्टहासः—A smile is represented by Sanskrit poets as white, and a loud laugh is more prominently so : *cf.* गिरिशाट्टाहासकैलासकाशनीकाशमूर्त्यां &c. Daśak. I. 1.

उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे
सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।
शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री-
मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६२ ॥

62. I expect that when you, resembling collyrium powdered and glossy, will be resting on its skirt, the mountain, white like a freshly-cut piece of ivory, will possess a beauty such as fit to be gazed upon with steadfast eyes, like that of the Plough-bearer (Balarāma) when the black garment is thrown over his shoulder.

उत्पश्यामीति ॥ [स्निग्धभिन्नाञ्जनाभे] स्निग्धं मसृणं भिन्नं मर्दितं च यदञ्जनं कज्जलं तस्य आभेवाभा यस्य तस्मिन् त्वयि तटगते सानुगते सति [सद्यःकृत्तद्विरददशनच्छेदगौरस्य] सद्यःकृत्तस्य छिन्नस्य द्विरददशनस्य गजदन्तस्य छेदवद्गौरस्य धवलस्य तस्य अद्रेः कैलासस्य मेचके श्यामले । 'कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।' इत्यमरः । वाससि वस्त्रे अंसन्यस्ते सति हलभृतो बलभद्रस्य इव [स्तिमितनयनप्रेक्षणीयां] स्तिमिताभ्यां नयनाभ्यां प्रेक्षणीयां शोभां भवित्रीं भाविनीम् उत्पश्यामि । शोभा भविष्यतीति तर्कयामीत्यर्थः । श्रौती पूर्णोपमालंकारः ॥

Sl. 62. भिन्न..pounded, well-mixed *Cf.* Rit II. 2. अञ्जनाभे—"The expression may be rendered; shining like glossy, powdered antimony" a preparation used for darkening the eyelashes or the edges of the eyelids, a practice common to the females of the East." —Wilson. छेद—the cutting or the cut part. हलभृतः—Balarāma had a fair complexion and wore black garments and hence the simile. It also indicates the hugeness of Balarāma's body. *Cf.* तमतनुवनराजिश्यामितोपत्यकान्तं नगमुपरि हिमानीगौरमासाद्य जिष्णुः । व्यपगतमदरागस्यानुसस्मार लक्ष्मीमसितमधरवासो बिभ्रतः सीरपाणेः ॥ Kir. IV. 38. वहसि वपुषि विशदे वसनं जलदाभं हलहतिभीतिमिलितयमुनाभम् । केशव धृतहलधररूप जय जगदीश हरे । Git. I.

हित्वा तस्मिन्भुजगवलयं शंभुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत्पादचारेण गौरी ।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी ॥ ६३ ॥

१ रदन. २ लीलामद्रेस्तिमिर. ३ नीलम्. ४ विहरेत्. ५ कुरु सुखपदरोहणायाग्रयायी; व्रज पदसुखस्पर्शमारोहणेषु.

63. And if Gauri, a helping hand being given to her by Śiva leaving off his serpent-bracelets, should walk about on foot on that pleasure mountain, preceding her, form yourself with the internal mass of water restrained (hardened) into a line of ascending curves and become a flight of steps for her to ascend its jewelled slope.

हित्वेति ।। तस्मिन् क्रीडाशैले कैलासे । 'कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः । क्रीडार्थं निर्मिताः शंभोर्देवैः क्रीडाद्रयोऽभवन् ।।' इति शंभुरहस्ये । शंभुना शिवेन [भुजगवलयं] भुजग एव वलयः कङ्कणं तं हित्वा गौर्या भीरुत्वात्यक्त्वा दत्तहस्ता सती गौरी पादचारेण [च] विचरेद्यदि तर्हि अग्रयायी पुरोगतस्तथा [स्तम्भितान्तर्जलौघः] स्तम्भितो घनीभावं प्रापितोऽन्तर्जलस्यौघः प्रवाहो यस्य स तथाभूतः । [भङ्गीभक्त्या] भङ्गीनां पर्वणां भक्त्या रचनया विरचितवपुः कल्पितशरीरः सन् [मणितटारोहणाय] मणीनां तटं मणितटं तस्यारोहणाय सोपानत्वं कुरु । सोपानभावं भजेत्यर्थः ।

Śl. 63. भुजगवलयं--The bracelets in the shape of coiling serpents; *cf.* करेण शम्भोर्वलयीकृताहिना &c. Kum. V. 66. विचरेत्--would move about. विहरेत् *v. l.* --'would enjoy a walk,' or move about sportively. This is a better reading, as better agreeing with क्रीडाशैले, and seems to be the original one as it is found in the Pārśva. also. भङ्गीभक्त्या--assuming the arrangement of curves or formation of wavelike steps. सोपानत्वं--See *infra.* II. 16. *cf.* also शिलाविभङ्गैर्मृगराजशावस्तुङ्गं नगोत्सङ्गमिवारुरोह Ragh. VI. 3. मणितटा०--because Kailāsa is supposed to be formed of costly gems and crystals.

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम् ।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्या-
त्क्रीडालोलाः श्रवणपरुषैर्गर्जितैर्भाययेस्ताः ॥ ६४ ॥

64. There the celestial damsels will certainly convert you into (*i. e.* use you as) a shower-bath as you will be discharging water, being struck by the hard points of their jewelled bracelets. If then, O friend, you cannot procure your release from them in the hot season, you should frighten them, actively engaged in sports, with your thundering harsh to the ear.

---

१ जनितसलिलोद्गारमन्तःप्रवेशम्. २ शर्म. ३ भीपयेः; भापयेः.

तत्रेति ।। तत्र कैलासे अवश्यं सर्वथा सुरयुवतयः [वलयकुलिशोद्घट्टनोद्गीर्णतोयं] वलयकुलिशानि कङ्कणकोटयः । शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते । तैरुद्घट्टनानि प्रहारास्तैरुद्गीर्णमुत्सृष्टं तोयं येन तं त्वां [यन्त्रधारागृहत्वम्] यन्त्रेषु धारा यन्त्रधारास्तासां गृहत्वं कृत्रिमधारागृहत्वं नेष्यन्ति प्रापयिष्यन्ति । हे सखे मित्र । [घर्मलब्धस्य] घर्मे निदाघे लब्धस्य । घर्मलब्धत्वं चास्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात्प्राथमिकमेघत्वाद्वा । यथोक्तम्—' आषाढस्य प्रथम० ' इति तव ताभ्यः सुरयुवतिभ्यः मोक्षः न स्यात् यदि तदा क्रीडालोलाः क्रीडासक्ताः । प्रमत्ता इत्यर्थः । ताः सुरयुवतीः श्रवणपरुषैः कर्णकटुभिः गर्जितैः करणैः भाययेः त्रासयेः । अत्र हेतुभयाभावादात्मनेपदं षुगागमश्च न ।।

Śl. 64. वलयकुलिश०—Malli. takes कुलिश in the secondary sense of ' points ', or sharp edges; or we may take the Comp. as वलयाः कुलिशा इव तत्कार्यकरत्वात्; the bracelets serving as thunder-bolts in drawing out water. Some take कुलिश in the sense of ' a diamond; ' but although वज्र means a diamond, कुलिश does not occur in that sense. उद्घट्टन—striking, friction of. यन्त्रधारा०—Malli. takes the Comp. as यन्त्रेषु धाराः &c.; it is better to take it as a Comp. of the शाकपार्थिवादि class as यन्त्रैः विक्षिप्ताः धारा यन्त्रधाराः तासां गृहं तस्य भावस्तत्त्वम्. धारागृह—a house or bath-room furnished with artificial jets or fountains. The cloud is here compared to *Dharagṛha*, while its parts rubbed off by the bracelets to the jets ejecting showers. घर्मलब्धस्य—The student will remember that it is the Grishma season when the cloud visits Kailāsa. भाययेः—The readings भीषयेः and भापयेः are grammatically incorrect, as the causal bases of the root भी, *viz.* भीषि (भीषयते) and (भापि भापयते), are invariably used in the Atm. when the sense is 'he inspires fear', while the base भायि (भाययति) is always used in the Pars. in the sense of 'to frighten one with' बिभेतेर्हेतुभये Pān. VI. I. 56.—The root भी substitutes आ optionally for its final in the Cau. when the fear comes from the agent. भीस्म्योर्हेतुभये । Pān. I. 3. 68—The roots भी and स्मि are used in the Atm. in the Causative when the effect is produced by the agents. And by the rule भियो हेतुभये षुक् Pān. VII. 3. 40 भी takes the augment ष् in the Causal when the effect is produced by the agent; so we have भीषयते. In the present case the fear is produced by the thunderings and not by the agent; and hence Malli. remarks अत्र हेतुभयाभावादात्मनेपदं &c.

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन्कामं[1] क्षणमुखपटप्रीतिमैरावतस्य[2] ।
धुन्वन्कल्पद्रुमकिसलयान्यंशुकानीव वातै-[3]
र्नानाचेष्टैर्जलद ललितैर्निर्विशेस्तं नगेन्द्रम् ॥ ६५ ॥

65. Drinking the water of the Mānasa lake, the producer (birth-place) of golden lotuses, giving for a moment to Airāvata the gratification of having a covering for his face (when drinking water), and agitating with your breeze the sprouts of the wish-granting trees, as though they were garments :—with sportings, full of various actions, like these, O cloud, you should enjoy the lord of mountains according to your desire (pleasure).

हेमेति ॥ हे जलद [हेमाम्भोजप्रसवि] हेमाम्भोजानां प्रसवि जनकम् । 'जिदृक्षि—' इत्यादिनेनिप्रत्ययः मानसस्य सरसः सलिलम् आददानः । पिबन्नि-त्यर्थः । तथा ऐरावतस्य इन्द्रगजस्य । कामचारित्वाद्वा शिवसेवार्थमिन्द्रागमनाद्वा समागतस्येति भावः । [क्षणमुखपटप्रीतिम्] क्षणे जलदानकाले मुखे पटेन या प्रीतिस्तां कुर्वन् । तथा [कल्पद्रुमकिसलयानि] कल्पद्रुमाणां किसलयानि पल्लव-भूतानि अंशुकानि सूक्ष्मवस्त्राणि इव । 'अंशुकं वस्त्रमात्रे स्यात्परिधानोत्तरीययोः। सूक्ष्मवस्त्रे नातिदीप्तौ' इति शब्दार्णवे । वातैः मेघवातैः धुन्वन् । [नानाचेष्टैः] नाना बहुविधाश्चेष्टास्तोयपानादयो येषु तैः ललितैः क्रीडितैः। 'ना भावभेदे स्त्रीनृत्ये ललितं त्रिषु सुन्दरे। अस्त्रियां प्रमदागारे क्रीडितैः जातपल्लवे ॥' इति शब्दार्णवे। तं नगेन्द्रं कैलासं कामं यथेष्टं निर्विशेः समुपभुङ्क्ष्व । 'निर्वेशो भृतिभोगयोः' इत्यमरः। यथेच्छविहारो मित्रगृहेषु मैत्र्याः फलम् सहजमित्रं च ते कैलासः । मेघपर्वतयोरब्जसूर्ययोरब्धिचन्द्रयोः शिखिजीमूतयोः समीराग्न्योर्मित्रता स्वयमिति भावः ॥

Śl. 65. हेमाम्भोज०--प्रसूते इति प्रसवि *n.;* a few roots take this aff. as जयी, दरी, क्षयी,..प्रसवी; Pān. III. 2. 157. मानसस्य–see *supra.* śl. 11. कामं—'to your heart's content' (Malli.) : it may better be taken with कुर्वन् in the sense of 'willingly', or 'fully'. क्षण–may also be taken as क्षणं for a moment &c. मुखपटप्रीतिः–the satisfaction derived or pleasure felt from the cloth covering the face. कल्पद्रुम—the wish-granting tree. These are five in number, *viz.* पञ्चैते देवतरवो मन्दारः पारिजातकः । संतानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ॥ कल्पः the

---

१ कामात्. २ ऐरावणस्य. ३ धुन्वन्वातैः सजलपृषतैः (०नयनैः) कल्पवृक्षांशुकानि च्छायाभिन्नस्फटिकविशदं निर्विशेः पर्वतं तम् ।

object desired (संकल्पितोऽर्थः) तस्य द्रुमः । जन्यजनकभावसंबन्धे षष्ठी ललितैः–sports, amusements; here used as a noun.

तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां
न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन् ।
या वः काले वहति सलिलोद्गारमुच्चैर्विमाना[1]
मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम् ॥ ६६ ॥

66. O you moving at will, on seeing Alakā with its garment the Ganges dropping from it, lying on its slope (*or* top) as if on the lap of a lover, you will not fail (you are sure) to recognize it; (the city) which, having lofty mansions in it, supports in your season, a multitude of clouds, showering water, as a woman does her tresses interwoven with strings of pearls.

तस्येति ।। **प्रणयिनः** प्रियतमस्य इव तस्य कैलासस्य उत्सङ्गे ऊर्ध्वभागे कटौ च । 'उत्सङ्गो मुक्तसंयोगे सक्थिन्यूर्ध्वतलेऽपि च ।' इति मालतीमालायाम् । [**स्रस्तगङ्गादुकूलां**] गङ्गादुकूलं शुभ्रवस्त्रमिवेत्युपमितसमासः । 'दुकूलं सूक्ष्मवस्त्रे स्यादुत्तरीये सितांशुके ।' इति शब्दार्णवे । अन्यत्र तु गङ्गैव दुकूलम् । तत्स्रस्तं यस्यास्तां तथोक्ताम् अलकां कुबेरनगरीं दृष्ट्वा । कामिनीमिवेतिः शेषः । हे **कामचारिन् त्वं पुनः** त्वं तु **न ज्ञास्यसे** इति न । किं तु ज्ञास्यस एवेत्यर्थः । कामचारिणस्ते पूर्वमपि बहुकृत्वा दर्शनसंभवादज्ञानमसंभावितमेवेति निश्चयार्थं नञ्द्वयप्रयोगः । तदुक्तम्— 'स्मृतिनिश्चयसिद्धयर्थेषु नञ्द्वयप्रयोगः' इति [**उच्चैर्विमाना**] उच्चैः उन्नतानि विमानानि सप्तभूमिकभवनानि यस्यां सा 'विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि ।' इति यादवः । मेघसंवाहनस्थानसूचनार्थमिदं विशेषणम् । अन्यत्र विमाना निष्कोपा **या** अलका । **वः** युष्माकं **काले** । मेघकाल इत्यर्थः । कालस्य सर्वमेघसाधारण्याद्व इति बहुवचनम् । सलिलमुद्गिरतीति **सलिलोद्गारम्** । स्रवत्सलिलधारमित्यर्थः । **अभ्रवृन्दं** मेघकदम्बकं **कामिनी** स्त्री [**मुक्ताजालग्रथितं**] मुक्ताजालैर्मौक्तिकसरैर्ग्रथितं प्रत्युप्तम् । 'पुंश्चल्यां मौक्तिके मुक्ता' इति यादवः । **अलकं** इव चूर्णकुन्तलानीव । जातविकवचनम् । 'अलकाश्चूर्णकुन्तलाः' इत्यमरः । **वहति** बिभर्ति । अत्र कैलासस्यानुकूलनायकस्त्वलकायाश्च स्वाधीनपतिकाख्यनायिकात्वं ध्वन्यते । 'एकायत्तोऽनुकूलः स्यात्' इति 'प्रियोपलालिता नित्यं स्वाधीनपतिका मता ।' इति च लक्षयन्ति । उदाहरन्ति । च— 'लालयन्नलकप्रान्तान्रचयन्पत्रमञ्जरीन् । एकां विनोदयन्कान्तां छायावदनुवर्तते ।।' इति ।।

Śl. 66. प्रणयिन इव उत्सङ्गे—Here Kailāsa is likened to a lover, Alakā to a woman reclining on the lap of her lover, and the

[1] उच्चैर्विमानैः.

white sheet of the water of the Ganges falling from it to a white silk-garment. उत्सङ्ग—(1) slope, skirt: (2) lap. स्रस्त–*p.p.p.* of स्रंस्; see com. for the double application of the Comp. न..न– The two negatives give rise to an emphatic affirmative here, strengthening the remembrance. कामचा०––कामेन चरतीति or कामचारोऽस्यास्तीति उच्चैर्विमाना––having lofty (seven-storied) mansions. As applied to the mistress, it means, completely or quite free from anger.' मुक्ताजाल––strings of pearls. ग्रथित—interwoven or wreathed with.

इति श्रीमहामहोपाध्यायमल्लिनाथसूरिविरचितया संजीवनीसमाख्यया
व्याख्यया समेते महाकविश्रीकालिदासविरचिते
मेघदूते काव्ये पूर्वमेघः समाप्तः ॥

उत्तरमेघः ।

विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ १ ॥

1. (The city) where the mansions are quite capable of standing comparison with you—you possessed of the flashing lightning, they of beauties bright with their charms; you having the (mauy-coloured) rainbow, they the pictures (in various colours); —you giving out a deep but pleasant rumble, they the (pleasantly grave sounds of) tabors beaten for the musical conecrt; you with your watery interior, they with their floors paved with sapphires (thus having a water-like appearance) ;—you towering high in the sky, and they raising their domes that touch the sky.

विद्युत्वन्तमिति ॥ यत्र अलकायां [ललितवनिताः] ललिता रम्या वनिताः स्त्रियो येषु ते। सह चित्रैर्वर्तन्त इति सचित्राः। 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः। 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। 'वोपसर्जनस्य' इति सहशब्दस्य समासः। संगीताय तौर्यत्रिकाय प्रहतमुरजाः ताडितमृदङ्गाः। 'मुरजा तु मृदङ्गे स्याड्ढक्कामुरजयोरपि' इति शब्दार्णवे। [मणिमयभुवः] मणिमया मणिविकारा भुवो येषु। [अभ्रंलिहाग्राः] अभ्रं लिहन्तीत्यभ्रंलिहान्यभ्रंकषाणि। 'वहाभ्रे लिहः' इति

१ मुरवाः. २ पर्जन्य.

खश्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' इत्यादिना मुमागमः। अग्राणि शिखराणि येषां ते तथोक्ताः। अतितुङ्गा इत्यर्थः। प्रासादाः देवगृहाणि। 'प्रासादो देवभूभुजाम्' इत्यमरः। विद्युतोऽस्य सन्तीति विद्युत्वन्तम्। सेन्द्रचापम् इन्द्रचापवन्तम् [स्निग्धगम्भीरघोषं] स्निग्धः श्राव्यो गम्भीरो घोषो गर्जितं यस्य तम् [अन्तस्तोयं] अन्तः अन्तर्गतं तोयं यस्य तम्। तुङ्गम् उन्नतं त्वां तैस्तैर्विशेषैः ललितवनितत्वादिधर्मैः तुलयितुं समीकर्तुम् अलं पर्याप्ताः। 'अलं भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः। अत्रोपमानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यमन्योन्यसादृश्यान्मेघप्रासादयोः साम्यसिद्धिरिति। बिम्बप्रतिबिम्बभावेनेयं पूर्णोपमा। वस्तुतो भिन्नयोः परस्परसादृश्यादभिन्नयोरुपमानोपमेयधर्मयोः पृथगुपादानाद्बिम्बप्रतिबिम्बभावः॥

Śl. 1. प्रासादा०—'Where the mansions can bear comparison with you or equal you.' The various points of similarity are given in the first three lines. The epithets are to be taken in pairs. The cloud is possessed of lightning, the mansions of ladies shining with their personal graces; the bright-coloured ladies correspond to lightning. The cloud has the many-coloured rainbow, the mansions pictures in divers colours and so on. संगीताय—संगीत is a musical concert consisting of नृत्य or dancing, वाद्य or instrumental music, and गीत or singing. *Cf.* नृत्यं वाद्यं तथा गीतं त्रयं संगीतमुच्यते। Sangītaratnākara. स्निग्ध०—*Cf.* स्निग्धगम्भीरनिर्घोष (पयोवाहं) Ragh. I. 36. मणिमयभुवः—The lustre of the jawels used for paving the floors corresponds to the water of the cloud. अभ्रंलिह—लिह preceded by वह and अभ्र takes the affix खश (अ); वहः स्कन्धः तं लेढीति वहंलिहो गौः; अभ्रंलिहो वायुः. A nasal comes in after अरुस्, द्विषत् and words ending in अ, before an affix having an indicatory ख (as खश् here). See com. तुलयितुं—to match or equal. See *supra*, śl. 23. With the description of Alakā here comp. that of औषधिप्रस्थ in Kum. VI (37-46).

संप्रति सर्वदा सर्वर्तुसंपत्तिमाह—

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं[1]
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः[2]।
चूडापाशे नवकुरबकं चारु कर्णे शिरीषं
सीमन्ते च[3] **त्वदुपगमजं यत्र नीपं वधूनाम्** ॥ २ ॥

१ कुन्दानुवेधं. २ आननश्रीः. ३ अपि.

2. Where the young women have a sportive lotus in their hands; interweave their hair with the fresh-blown *Kunda* blossoms; have the beauty of face rendered yellowish-white with the pollen of *Lodhra* flowers; and wear the fresh *Kurabaka* flowers in their braids, the lovely *S'irisha* flowers on their ears and the *Nîpa* flowers, that spiring up into existence at your approach, on the line of the parting of their hair,

हस्त इति ॥ **यत्र** अलकायां **वधूनां** स्त्रीणां **हस्ते** लीलार्थं कमलं **लीलाकमलम्**। शरल्लिङ्गमेतत्। तदुक्तम्—'शरत् पङ्कजलक्षणा' इति। **अलके** कुन्तले। जातावेकवचनम्। अलकेष्वित्यर्थः [**बालकुन्दानुविद्धं**] बालकुन्दैः प्रत्यग्रमाघ्यकुसुमैरनुविद्धम्। अनुवेधो ग्रन्थनम्। नपुंसके भावे क्तः। यद्यपि कुन्दानां शैशिरत्वमस्ति 'माघ्यं कुन्दम्' इत्यभिधानात्तथाऽपि हेमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हेमन्तकार्यत्वमित्याशयेन बालेति विशेषणम्। 'अलकम्' इति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात्। नाथस्तु नियतपुंल्लिङ्गताहानिश्चेति दोषान्तरमाह तदसत्। 'स्वभाववक्राण्यलकानि तासाम्', 'निर्धूतान्यलकानि पाटितमुरः कृत्स्नोऽधरः खण्डितः' इत्यादिषु नपुंसकलिङ्गतादर्शनात्। **आनने** मुखे [**लोध्रप्रसवरजसा**] लोध्रप्रसवानां लोध्रपुष्पाणां शैशिराणां रजसा परागेण। 'प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचने।' इति विश्वः। **पाण्डुतां नीता श्रीः** शोभा **चूडापाशे** केशपाशे। **नवकुरबकं** वासन्तपुष्पविशेषः। **कर्णे चारु** पेशलं **शिरीषं** ग्रैष्मः पुष्पविशेषः **सीमन्ते** मस्तककेशवीथ्याम्। 'सीमन्तमस्त्रियां मस्तककेशवीथ्यामुदाहृतम्' इति शब्दार्णवे। तवोपगमः मेघागम इत्यर्थः। तत्र जातं **त्वदुपगमजम्**। वार्षिकमित्यर्थः। **नीपं** कदम्बकुसुमं **च**। सर्वत्रास्तीति शेषः अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति न्यायात्। इत्थं कमलकुन्दादितत्तत्कार्यसमाहाराभिधानादर्थात्सर्वर्तुसमाहारासिद्धिः। कारणं विना कार्यस्यासिद्धेरिति भावः ॥

Śl. 2. The different flowers mentioned in this śl., which on earth bloom in different seasons, are found in bloom there all the year round. See com. लीला॰—A lotus in the hand for sport. *Cf.* लीलाकमलपत्राणि गणयामास पार्वती। Kum. VI. 84. कश्चित्कराभ्यामुपगूढनालं लीलारविन्दं भ्रमयांचकार। Ragh. VI. 13. The lotus blooms in autumn (शरद्). *Cf.* Ragh. IV. 14 quoted by Malli. अनुविद्धं—the act of being interwoven or wreathed with. Here त is add भावे (to form an abs. noun). लोध्र॰—प्रसव a flower. fr. सू to produce, or a fruit, probably the pollen of the *Lodhra* flower or the powder of the fruit was applied to the cheeks by ladies. *Cf.* Kum. VII. 9. चूडापाश—luxuriant hair: braided hair. पाश after केश usually means 'a

collection:' पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे । Amara. कुरबकं—the flower of the *Kurabāka* which is poetically described as putting forth flowers when embraced by beautiful ladies; *Cf.* स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति &c., quoted by Malli. in his com. on śl. 18 *infra.* It has flowers of different colours, and sometimes of variegated colours. *Cf.* प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणं Mālav-III. 5; विरचिता मधुनोपवनश्रियामभिनवा इव पत्रविशेषकाः । मधुलिहां मधुदानविशारदाः कुरबका रवकारणतां ययुः । Ragh. IX. 29. कर्णे शिरीषं—the *Sirisha* was generally worn on the ear; *cf.* अवतंसयन्ति दयमानाः प्रमदाः शिरीषकुसुमानि । Śāk I. 4. See also *Ibid* I. 26; VI. 18 (कृतं न कर्णार्पितबन्धनं सखे शिरीषं &c.); च्युतं न कर्णादपि कामिनीनां शिरीषपुष्पं सहसा पपात । Ragh. XII. 48. The *Sirisha* is known for its tenderness. सीमन्ते–Mark the Samdhi; it is a comp. of the शकन्ध्वादि group; it is made up of सीमन् + अन्त there being पररूपसंधि *i. e.* अन् and अ combining into अ irregularly: *cf.* सीमन्तः केशवशे (the parting of the hair, called भांग in Mar.); सीमन्तोऽन्यः । Sid.–Kau. नीपं—The *Kadamba* flowers; *cf.* रक्तकदम्बः सोऽयं प्रियया घर्मान्तशंसि यस्यैकम् । कुसुमसमग्रकेसरविषमपि कृतं शिखाभरणम् ॥ Vik. IV.-30 "We cannot help, however, being pleased with the simplicity and propriety of taste which gives to the graceful ornaments of nature so prominent a part in the decoration of feminine beauty."—Wilson.

[1]यत्रोन्मत्तभ्रमरमुखराः[2] पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्यः ।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्नाः[3] प्रतिहततमोवृत्तिरम्याः प्रदोषाः ॥ ३ ॥

3. Where the trees ever bear flowers and (therefore) are resounding with the hummings of intoxicated bees; the lotus-plants (*or* beds of lotuses) ever smile with lotuses and are begirt with rows of swans; the domestic peacocks are always endowed with their resplendent plumages and ever shriek with up-raised necks; and the nights are always lit up by the moon and (therefore) delightful, the envelope of darkness being removed.

यत्रेति ॥ यत्र अलकायां पादपाः वृक्षाः [नित्यपुष्पाः] नित्यानि पुष्पाणि येषां ते तथा । न त्वृतुनियमादिति भावः । अत एव [उन्मत्तभ्रमरमुखराः ।]

---

१ यस्या मत्त. २ निकराः. ३ ज्योत्स्ना प्र०. प्यन्यत्रं.

उन्मत्तैभ्रमरैर्मुखराः शब्दायमानाः । नलिन्य पद्मिन्यः [नित्यपद्माः] नित्यानि पद्मानि यासां तास्तथा न तु हेमन्तवर्जितमित्यर्थः अत एव [हंसश्रेणीरचितरशनाः] हंसश्रेणीभी रचितरशनाः । नित्यं हंसपरिवेष्टिता इत्यर्थः । भवनशिखिनः क्रीडामयूराः । [नित्यभास्वत्कलापाः] नित्यं भास्वन्तः कलापा बर्हाणि येषां ते तथोक्ताः । न तु वर्षास्वेव । अत एव [केकोत्कण्ठाः] केकाभिरुत्कण्ठा उद्ग्रीवाः । प्रदोषाः रात्रय [नित्यज्योत्स्नाः] नित्या ज्योत्स्ना येषां ते । न तु शुक्लपक्ष एव । अत एव [प्रतिहततमोवृत्तिरम्याः] प्रतिहता तमसां वृत्तिर्व्याप्तिर्येषां ते च ते रम्याश्चेति तथोक्ताः ॥

Śl. 3. उन्मत्त— *i.e.* by drinking honey. मुखर–fr. मुख + the possessive aff. (निन्दितं मुखमस्य; मुखशब्दोऽत्र लक्षणया वचनपरः); garrulous; hence, here 'noisy'. For trees resounding with the humming of bees, comp. Ragh. IX. 29 already quoted. भ्रमरनिकराः *v. l.*–this reading is not good, as the comp. then becomes Vyadhikaraṇa Bah. (उन्मत्तभ्रमराणां निकरा येषु). रशना––A waist-band or zone; 'begirt with a row of swans'. ०त्कण्ठाः–उद्गतः कण्ठः येषां a Bah. Comp.; with necks raised up. नित्यभा०–that is, their feathers never moult. नित्यज्योत्स्नाः–on account of the presence of the lunar digit on the crest of Śiva. वृत्ति––covering, spreading all round.

आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै
र्नान्यस्तापः कुसुमशरजादिष्टसंयोगसाध्यात् ।
नाप्यन्यस्मात्प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ४ ॥

4. Where, indeed, the lords of wealth (Yakshas) have tears dropping from their eyes, but due to joy and to no other cause; have no torment other than that proceeding from the flower-arrowed god (Cupid), and removable by union with the beloved person, have no separation coming to them except from love-quarrels; and know no other age than youth.

आनन्देति ॥ यत्र अलकायां वित्तेशानां यक्षाणाम् । 'वित्ताधिपः कुबेरः स्यात्प्रभौ धनिकयक्षयोः' इति शब्दार्णवे । आनन्दोत्थम् आनन्दजन्यमेव नयनसलिलम् । अन्यैर्निमित्तैः शोकादिभिः न । [इष्टसंयोगसाध्यात्] इष्टसंयोगेन साध्यान्निवर्तनीयात् । न त्वप्रतीकार्यादित्यर्थः । कुसुमशरजात् मदनशरजाद् अन्यः तापः न अस्ति प्रणयकलहात् अन्यस्मात् कारणात् विप्रयोगोपपत्तिः विरहप्राप्तिः

१ प्यन्यत्र.

मे...८

अपि न अस्ति । किं च यौवनात् अन्यत् वयो वार्धकं [खलु] न अस्ति । श्लोकद्वयं प्रक्षिप्तम् ॥

Śl. 4. आनन्दोत्थं—आनन्दादुत्तिष्ठतीति. अन्यैः—*i. e.* by such as sorrow caused by death, &c. कुसुम०—०शराज्जायते असौ कुसुमशरजस्तस्मात्. साध्यात्–capable of being removed by; *i. e.*, its remedy was ' union with the person loved ' प्रणयकलह०—if there was any separation, it was due to ' love-quarrels ' (and therefore of short duration). यौवनादन्यत्–being demi-gods, they were not subject to old age. *Cf.* with this śl. यौवनान्तं वयो यस्मिन् नान्तकः कुसुमायुधात् । रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः ॥ Kum. VI. 44.

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।[1]
आसेवन्ते मधु रतिफलं[2] कल्पवृक्षप्रसूतं[3]
त्वद्गम्भीरध्वनिषु [4]शनकैः पुष्करेष्वाहतेषु ॥ ५ ॥

5. Where the Yakshas having repaired, accompanied by the best beauties, to the wassail grounds attached to their mansions paved with crystals and adorned with the reflections of stars serving as (looking like) flower-decorations, taste the wine called *Ratiphala* (love-exciting) yielded by the wish-granting trees while drums are being gently beaten, sending forth sounds resembling your deep rumblings.

यस्यामिति ॥ यस्याम् अलकायां यक्षाः देवयोनिविशेषाः उत्तमस्त्रीसहायाः ललिताङ्गनासहचराः सन्तः सितमणिमयानि स्फटिकमणिमयानि चन्द्रकान्तमयानि वा अत एव [ज्योतिश्छायाकुसुमरचितानि] ज्योतिषां तारकाणां छायाः प्रतिबिम्बान्येव कुसुमानि तैः रचितानि परिष्कृतानि । 'ज्योतिस्ताराग्निभाज्वालादृक्पुत्राथध्वरात्मसु । ' इति वैजयन्ती । एतेन पानभूमेरम्लानशोभत्वमुक्तम् । हर्म्यस्थलानि एत्य प्राप्य । [त्वद्गम्भीरध्वनिषु] त्वद्गम्भीरध्वनिरिव ध्वनिर्येषां तेषु पुष्करेषु वाद्यभाण्डमुखेषु ' पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले । ' इत्यमरः । शनकैः मन्दम् आहतेषु सत्सु । एतच्च नृत्तगीतयोरप्युलक्षणम् । कल्पवृक्षप्रसूतं कल्पवृक्षस्य काङ्क्षितार्थप्रदत्वान्मध्वपि तत्र प्रसूतम् । [रतिफलं] रतिः फलं यस्य तद्रतिफलाख्यं मधु मद्यम् आसेवन्ते आदृत्य पिबन्तीत्यर्थः । 'तालक्षीरसितामृतामलगुडोन्मत्तास्थिका लाह्वयादार्विन्द्रद्रुमसोरटेक्षुकदलीगुग्गुलुप्रसूनैर्युतम् । इत्थं चेन्मधुपुष्पभङ्ग्युपचितं पुष्पद्रुमूलावृतं क्वाथेन स्मरदीपनं रतिफलाख्यं स्वादु शीतं मधु ॥ ' इति मदिरार्णवे ॥

१ रचनानि. २ रसम्. ३ प्रसूतिं. ४ मधुरम्.

Śl. 5. सितमणि०—सितमणीनां विकाराः सितमणिमयानि. स्थलानि– upper terraces or paved floors. ज्योतिश्छाया–the reflections of stars. रचितानि—Malli. takes this in the sense of 'decorated', or 'adorned with.' The reading ०रचनानि is better, as the sense is then directly obtained. *Cf.* यत्र स्फटिकहर्म्येषु नक्तमापानभूमिषु । ज्योतिषा प्रतिबिम्बानि प्राप्नुवन्त्युपहारताम् ॥ Kum. VI. 42. रतिफलं—name of a particular kind of liquor, for which see com.; *lit.* 'that which leads to enjoyment' (by exciting passion). रतिरसं *v. l.* means रतौ रसो यस्मात्. ०प्रसूतं– It was readily supplied by the wish-granting trees; the Yakshas had not to prepare it. त्वद्गम्भीर० mark the Comp.; see com. Here the sound of the drums is compared to that of the cloud (the उपमान); and so the word ध्वनि forming the latter part of the Comp. त्वद्गम्भीरध्वनि is dropped by the Vārttika सप्तम्युपमान पूर्वपदस्य उत्तरपदलोपश्च वक्तव्यः. शनकैः—gently beaten (that the sound should be pleasing to the ear). Notice the reading मधुरं which directly gives the sense. पुष्कर–a king of drum. *Cf.* Kaṭayavema on Mālav. 1. 21.

मन्दाकिन्याः [1]सलिलशिशिरैः सेव्यमाना मरुद्भि-
र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।
अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः
संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ६ ॥

6. Where girls, sought (in marriage)] even by the gods, sport, served (fanned) by breezes cooled by the waters of the Mandākini and with the heat kept off from them by the shade of the Mandāra trees growing on the banks, with jewels which are concealed in the golden sands by being deposited there, being held in closed hands and which have to be searched for (thereafter).

मन्दाकिन्या इति ॥ यत्र अलकायां [अमरप्रार्थिताः] अमरैः प्रार्थिताः । सुन्दर्य इत्यर्थः । कन्या यक्षकुमार्यः । 'कन्या कुमारिकानार्योः' इति विश्वः । मन्दाकिन्याः गङ्गायाः [सलिलशिशिरैः] सलिलेन शिशिरैः शीतलैः. मरुद्भिः सेव्यमानाः सत्यः । तथा [अनुतटरुहां] अनुतटं तटेषु रोहन्तीत्यनुतटरुहः । क्विप् । तेषां मन्दाराणां छायया अनातपेन वारितोष्णाः शमितातपाः सत्यः [कनकसिकता मुष्टिनिक्षेपगूढैः] कनकस्य सिकतासु मुष्टिभिर्निक्षेपेण गूढैः संवृतैरत एव अन्वेष्टव्यैः मृग्यैः मणिभिः रत्नैः संक्रीडन्ते । गुप्तमणिपंज्ञया दैशिकक्रीडया सम्यक्क्रीडन्तीत्यर्थः।

१ पयसि.

'क्रीडोऽनुसंपरिभ्यश्च' इत्यात्मनेपदम् । 'रत्नादिभिर्वालुकादौ गुप्तैर्द्रष्टव्यकर्मभिः । कुमारीभिः कृता क्रीडा नाम्ना गुप्तमणिः स्मृता ॥ रासक्रीडा गूढमणिर्गुप्तकेलिस्तु लायनम् । पिच्छकन्दुकदण्डाद्यैः स्मृता दैशिककेलयः ॥' इति शब्दार्णवे ॥

Śl. 6. **मन्दाकिन्याः**—मन्दमकितुं (to flow) शीलमस्याः इति मन्दाकिनी. **मन्दाराणां**–the Mandāra is one of the five trees of heaven; for their names see *supra*, notes on śl.64; *cf.* आप्लुतास्तीरमन्दारकुसुमोत्किरवीचिषु । Kum. VI 5. **अन्वेष्टव्यैः**—to be searched for and found out. **मुष्टिनिक्षेप॰**—hidden in the sand, being deposited into it by being held in the closed fist. **संक्रीडन्ते**–The root क्रीड्, when preceded by अनु, सम्, परि and आ, is Ātm., see com.; च in the Sūtra indicates the inclusion of आ (चादाङः Sid.–Kau.) **अमरप्रार्थिताः**—so beautiful as to be sought even by the gods. The game referred to here is technically called *Gūdhamani*; see com. The daughters of demi-gods are represented as playing such games on the banks of the Mandākini: *cf.* तत्र खलु मन्दाकिन्याः पुलिनेषु सिकतापर्वतकेलीभिः क्रीडन्ती विद्याधरदारिका तेन राजर्षिणा चिरं निध्यातेति कुपिता उर्वशी । Vik. Act IV.; मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रिकैश्च । रेमे &c. Kum. I. 29.

नीवीबन्धोच्छ्वसितशिथिलं[1] यत्र बिम्बाधराणां[2]
[3]क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु ।
अर्चिस्तुङ्गानभिमुखमपि[4] प्राप्य रत्नप्रदीपान्
ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥ ७ ॥

7. Where the handful of powder flung by women having *bimba*-like lips and confused with shame when their garments loosened by the untying of their knots, are snatched away by their husbands through passion with their quick-moving hands, is flung in vain although it reaches the jewel-lamps powerfully blazing with their flames.

नीवीति ॥ **यत्र** अलकायाम् **अनिभृतकरेषु** चपलहस्तेषु **प्रियेषु** । [**नीवीबन्धोच्छ्वसितशिथिलं**] नीवी वसनग्रन्थिः 'नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससि ।' इति विश्वः । सैव बन्धो नीवीबन्धः । चूतवृक्षवदपौनरुक्त्यम् । तस्योच्छ्वसितेन त्रुटितेन शिथिलं **क्षौमं** दुकूलं **रागात्** **आक्षिपत्सु** आहरत्सु सत्सु **ह्रीमूढानां** लज्जाविधुराणाम् । बिम्बं बिम्बिकाफलम् । 'बिम्बं फले बिम्बिकायाः प्रतिबिम्बे च

१ उच्छ्वसन. २ यक्षाङ्गनानाम्. ३ वाल: कामात्. ४ अभिमुखवतान्.

मण्डले । ' इति विश्वः । बिम्बमिवाधरो यासां तासां बिम्बाधराणां स्त्रीविशेषाणाम् । 'विशेषाः कामिनीकान्ताभीरुबिम्बाधराङ्गनाः ' इति शब्दार्णवे [चूर्णमुष्टिः] चूर्णस्य कुङ्कुमादेर्मुष्टिः । [अर्चिस्तुङ्गान्] अर्चिभिर्मयूखैः तुङ्गान् । ' अर्चिर्मयूखशिखयोः ' इति विश्वः । [रत्नप्रदीपान्] रत्नान्येव प्रदीपान् अभिमुखं यथा तथा प्राप्य अपि विफलप्रेरणा दीपनिर्वापणाक्षमत्वान्निष्फलक्षेपा भवति । अत्राङ्गनानां रत्नप्रदीपनिर्वापणप्रवृत्त्या मौग्ध्यं व्यज्यते ॥

Śl. 7. नीवीबन्धो०—नीवी technically means 'the tie of a wearing garment; ' and बन्ध means 'a tie; ' but here there is no fault of repetition of a term. remarks Malli., as the presence of the word नीवी limits the sense of बन्ध, as we say चूतवृक्ष meaning 'a tree of the mango-class.' नीवीबन्ध is a Karm. Comp. उच्छ्वसित is used as a noun here; it means 'the loosening or untying of'. बिम्बाधराणाम्—बिम्ब is a ripe *Bimba* fruit (तोंडलें in Mar.) The lips of beautiful women are usually compared to the *Bimba* fruit. *Cf.* the English expression 'cherry-lip.' Comp. बिम्बाधरं दशसि चेद्भ्रमर प्रियायाः । Śāk. VI. 27; उमामुखे बिम्बफलाधरोष्ठे Kum. III. 67. वेत्तीव बिम्बाधरबद्धतृष्णम् । Ragh. XIII. 11; and the Subhāshita यदधरतुलाप्रसङ्गात्सद्यः प्रज्ञाहरा तुण्डी । तासां साक्षात्संगः किं किं न हरेदिदं न जानीमः ॥ The reading बिम्बा० is better than यक्षाङ्गनानां, as it indicates the बिम्बाधरत्व of all the ladies there; while the sense 'the Yaksha women' follows from the context. क्षौमं—क्षुमायाः विकारः क्षौमं; a costly silk-garment. राग—love, passion. अनिभृतं—निभृत means 'what is greatly filled; ' hence, dull, silent &c.; अनिभृत is 'not dull, actively busy,' as Malli. has it. Or, निभृत may mean 'silent, humble, modest;' *cf.* प्रणामनिभृता कुलवधूरिव Mudr. I; hence अनिभृत means 'bold'; 'put forth boldly' (setting aside modesty). तुङ्ग—lofty or prominent with. रत्नप्र०—large gems shedding powerful light and therefore serving as lamps. ह्रीमूढाः—at a loss to know what to do through modesty. विफल०—विफला प्रेरणा यस्याः । सा. The young Yaksha damsels, overcome by bashfulness, when their garments were pulled away, threw handfuls of scented powder against the lamps, wishing to put them out, but did not succeed in their efforts as the light of the gems could not be extinguished. *Cf.* for the idea रतौ ह्रिया यत्र निशाम्य दीपाजालागताभ्योऽधिगृहं गृहिण्यः । बिभ्युर्बिडालेक्षणभीषणाभ्यो वैदूर्यकुड्येषु शशिद्युतिभ्यः ॥ Sis. III. 45. चूर्णमुष्टिः—Here चूर्ण means a powder of fragrant substances, such as saffron &c. The throwing of the powder

indicates that the damsels were young and inexperienced in the love-sports.

नेत्रा नीताः सततगतिना [1]यद्विमानाग्रभूमी-
रालेख्यानां [2]सलिलकणिकादोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा [3]जालमार्गै-
र्धूमोद्गारानुकृतिनिपुणा [4] जर्जरा निष्पतन्ति ॥ ८ ॥

8. Where clouds like you, led by the wind propelling them to the top-terraces of its seven-storied mansions, having done damage to the pictures (*or*, paintings) therein with the drops of their water, and being seized, as it were, with fear, the very moment escape through the lattices of windows, skilled in imitating the effusion of smoke and shattered into particles.

नेत्रेति ॥ हे मेघ **नेत्रा** प्रेरकेण **सततगतिना** सदागतिना वायुना । 'मातरिश्वा सदागतिः ' इत्यमरः । [**यद्विमानाग्रभूमीः**] यस्या अलकाया विमानानां सप्तभूमिकभवनानामग्रभूमीरुपरिभूमिकाः **नीताः** प्रापिताः । त्वमिव दृश्यन्त इति [त्वामिव पश्यन्ति यांस्ते—इति पाठः] **त्वादृशाः** त्वत्सदृशा इत्यर्थः । 'गत्यदादिषु दृशोऽनालोचने कञ्च ' इति कञ्प्रत्ययः । **जलमुचः** मेघाः । **आलेख्यानां** सच्चित्राणाम् । 'चित्रं लिखितरूपाढ्यं स्यादालेख्यं तु यत्नतः ' इति शब्दार्णवे । [**सलिलकणिकादोषम्**] सलिलकणिकाभिर्जलकणैर्दोषं स्फोटनम् **उत्पाद्य सद्यः शङ्कास्पृष्टा इव** सापराधत्वाद्भयाविष्टा इव । 'शङ्का वितर्कभययोः ' इति शब्दार्णवे । [**धूमोद्गारानुकृतिनिपुणाः** ।] धूमोद्गारस्य धूमनिर्गमस्यानुकृतावनुकरणे निपुणाः कुशलाः **जर्जराः** विशीर्णाः सन्तो **जालमार्गैः** गवाक्षरन्ध्रैः **निष्पतन्ति** निष्क्रामन्ति । यथा केनचिदन्तःपुरसंचारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापितास्तत्र स्त्रीणां व्यभिचारदोषमुत्पाद्य सद्यः साशङ्काः क्लृप्तवेशान्तरा जाराः क्षुद्रमार्गैः निष्क्रामन्ति तद्वदिति ध्वनिः । प्रकृतार्थे शङ्कास्पृष्टा इवेत्युत्प्रेक्षा ॥

Sl. 8. **सततगतिना**—the wind; सतत *p. p. p.* of तन् with सम्. The nasal of सम् is optionally dropped before हित and तत by समो वा हिततयोः Vārttika on Pāṇ. VI. 1. 144; so संतत also. Dissolve **सतता सततं वा गतिर्यस्य. विमान**—a seven-storied mansion; विमानो व्योमयाने च सप्तभूमिगृहेऽपि च. It may be derived as विशेषेण मान्त्यस्मिन्; वि + मा + अन (ल्युट) added अधिकरणे; विशिष्टं मानमस्य. **दोषं**—fault, *i. e.* the disfiguring of; spoiling them. **त्वादृशाः**—त्वमिव दृश्यन्ते,

१ ये. २ स्वजल, सजलकणिका, नवजलकणैः. ३ त्वादृशो यत्र जालैः, यन्त्रजालैः. ४ निपुणम्.

त्वामिव पश्यन्ति यान् इति वा; उपपदसमास, युष्मत् + दृश + कञ्च. The meaning of the Sūtra is—The aff. कञ् (अ) or क्विन् (which is brought in by the presence of च in the Sūtra) is added to दृश्, not signifying 'perception,' when preceded by the pronouns त्वद् and others; त्वत् takes the place of युष्मद् in the singular; and by the rule आ सर्वनाम्नः (Pān. VI. 291), " आ is substituted for the final of a pronominal base," we get त्वा + दृश् + कञ = त्वादृश्; क्विन् (०) + त्वादृश् Some read in the com. त्वादृशः but that does not seem to be Malli.'s reading, as he says इति कन् and not क्विन्. जालमार्गैः—यन्त्रजालैः is the reading of the Pārsvā. and some commentators, which Sumati (as quoted by Prof. Pāthak), explains as—यन्त्राण्यनेकसंचारचतुरकृत्रिमपुत्तलिकादीनि तैरुपलक्षितानि जालानि गवाक्षाणि तैः; windows with lattices formed by figures or dolls of different kinds. धूमोद्गार—the passing or escaping of smoke. जर्जर—broken into; fr. जर्ज् I, 6. P. + अर.

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गितानाम्[1]-
अङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः ।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्[2]निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्[3]चन्द्रकान्ताः ॥ ९ ॥

9. Where, at midnight, the moon-stones pendent from the network of threads (fringing the ceiling) and shedding big drops of water under the influence of the lunar rays, bright on account of the disapperance of your obstruction entirely dispel the langour brought on by enjoyment to the bodies of women (when) released from the embraces of the arms of their lovers.

यत्रेति ॥ यत्र अलकायां **निशीथे** अर्धरात्रे । 'अर्धरात्रनिशीथौ द्वौ' इत्यमरः । [**त्वत्संरोधापगमविशदैः**] त्वत्संरोधस्य मेघावरणस्यापगमेन विशदैर्निर्मलैः **चन्द्रपादैः** चन्द्रमरीचिभिः । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । **स्फुटजललवस्यन्दिनः** उल्बणाम्बुकणस्राविणः **तन्तुजालावलम्बाः** वितानलम्बिसूत्रपुञ्जाधाराः । तद्गुणगुम्फिता इत्यर्थः । **चन्द्रकान्ताः** चन्द्रकान्तमणयः [**प्रियतमभुजोच्छ्वासितालिङ्गितानां**] प्रियतमानां भुजैरुच्छ्वासितानि श्रान्त्या जलसेकाय वा प्रशिथिलितान्यालिङ्गितानि यासाम् [भुजैरालिङ्गनेषु उच्छ्वासितानां प्रशिथिलीकृतानाम् । श्रान्त्या जलसेकाय

१ भुजालिङ्गनोच्छ्वासितानाम्. २ इन्दुपादैः, प्रेरिताश्च०; प्रेरितैः-चोदिताः-चन्द्रपादैः; चोदितैश्चन्द्रपादैः. ३ स्पन्दिनः.

वा शिथिलितालिङ्गनानामिति यावत्–इति पाठः] स्त्रीणां सुरतजनिताम् अङ्गग्लानिं शरीरखेदम् । अवयवानां ग्लानतामिति यावत् । व्यालुम्पन्ति अपनुदन्ति ॥

Śl. 9. उच्छ्वासित--loosened or released. आलिङ्गित--used as a noun; 'embraces;' whose embraces were loosened &c. ०भुजालिङ्गनो *v. l.*—means 'who were released or freed from the embraces of' &c. Some commentators take this to mean 'who were made (so firmly pressed as) to breathe hard by their lovers by their embraces;' (प्रियतमैः भुजालिङ्गनेन बाहुपरिम्भणेनोच्छ्वासितानां प्रबलश्वासभाजिनीनां पीडितानाम्): ग्लानि–lassitude. languor, exhaustion; fr. ग्ल. 1. P. to be fatigued + नि (added भावे). तन्तुजालाव०--तन्तूनां जालं तेनावलबंत इति hanging (suspended) by a network of threads. यंत्रजाला० *v. l.*—See यन्त्रजाल, preceding śl. विशद--clear, bright. स्फुट०--स्फुटान् जललवान् स्यन्दन्ते इति; showering drops of water. The moon-stone or gem, when acted upon by the bright rays of the moon, is supposed to emit them again in the form of cool and pure moisture. This property of the moonstone is often alluded to by poets; *cf.* कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यत्र । उच्चैरधःपातिपयोमुचोऽपि समूहमूहुः पयसां प्रणाल्यः ॥ Sis. III. 44 and further, सायं शशाङ्ककिरणाहतचन्द्रकान्तनिस्यन्दिनीरनिकरेण कृताभिषेकाः । &c. IV. 58. चन्द्रपादजनितप्रवृत्तिभिश्चंद्रकांतजलबिंदुभिर्गिरिः । मेखलातरुषु निद्रितानमून्बोधयत्यसमये शिखण्डिनः । Kum. VIII. 67. Uttar. VI. 12.

अक्षय्यान्तर्भवननिधयः[1] प्रत्यहं रक्तकण्ठै-
रुद्गायद्भिर्धनपतियशः किंनरैर्यत्र सार्धम् ।
वैभ्राजाख्यं विबुधवनितावारमुख्यासहाया
बद्धालापा[2] बहिरुपवनं कामिनो निर्विशन्ति ॥ १० ॥

10. Where lovers, having inexhaustible treasures in their houses and accompanied by celestial damsels, the best of courtesans, enjoy every day, holding conversations in the outer garden, called Vaibhrāja in company with the Kinnaras having a melodious voice and loudly singing the glory of Kubera.

अक्षय्येति ॥ यत्र अलकायाम् । क्षेतुं शक्याः क्षय्याः । 'क्षय्यजय्यौ शक्यार्थे' इति निपातः । ततो नञ्समासः । भवनानामन्तरन्तर्भवनम् । 'अव्ययं विभक्ति--' इत्यादिनाऽव्ययीभावः । [अक्षय्यान्तर्भवननिधयः] अक्षय्या अन्तर्भवने निधयो येषां ते तथोक्ताः । यथेच्छाभोगसंभावनार्थमिदं विशेषणम् । [विबुधवनितावारमुख्यासहायाः] विबुधवनिता अप्सरसंस्ता एव वारमुख्या वेश्यास्ता एव सहाया येषां ते

---

१ अक्षीणान्तर्भुवन. २ बद्धालापाः.

रामोक्ताः । 'वारस्त्री गणिका वेश्या रूपाजीवाऽथ सा जनैः सत्कृता वारमुख्या स्यात् ।' इत्यमरः । बद्धालापाः संभावितसंलापाः कामिनः कामुकाः प्रत्यहम् अहन्यहनि । 'अव्ययं विभक्ति—' इत्यादिना समासः । [रक्तकण्ठैः] रक्तो मधुरः कण्ठः कण्ठध्वनिर्येषां ते तैः सुन्दरकण्ठध्वनिभिः धनपतियशः कुबेरकीर्तिम् उद्गायद्भिः उच्चैर्गानशीलैः । देवगानस्य गान्धारग्रामत्वात्तारतरं गायद्भिरित्यर्थः । किन्नरैः सार्धं सह । विभ्राजस्येदं वैभ्राजमित्याख्या यस्य तत् वैभ्राजाख्यम् । 'विभ्राजेन गणेन्द्रेण त्रातं वैभ्राजमाख्यया ।' इति शंभुरहस्ये । चैत्ररथस्य नामान्तरमेतद् । बहिरुपवनं बाह्योद्यानं निर्विशन्ति अनुभवन्ति ॥

Śl. 10. अक्षय्यं—inexhaustible; क्षेतुं शक्यं क्षय्यं, what is capable of being exhausted or wasted away. The word irregularly formed from क्षि + य in this sense, the इ of क्षि being changed to अय् otherwise क्षेय, as क्षेयं पापं (fit to be destroyed). रक्तकण्ठ—having a melodious or sweet voice वैभ्राजाख्यं—वैभ्राज, *lit.* that guarded by Vibhrāja, one of the principal Gaṇas of Śiva; see com. This is better known as Chaitraratha; see *supra*, 1. 7, notes. विबुधवनिताः—विबुधानां वनिताः the women (—and not wives—) of gods, *i. e.* the *Apsaras* वारमुख्या—a respectable harlot; वारे वेश्यावृन्दे मुख्या. *Cf.* Amara quoted in the com. (= सा वेश्या जनैः सत्कृता वारमुख्या स्यात्). ०सहायाः—having these for their companions; *i .e.* 'accompanied by.' कामिनः—अतिशयेन कामो येषां ते; here इन् shows 'excess'. It is used here in a wider sense than the corresponding English word 'lover'; it means 'one given to sensual pleasures'; gay people fond of pleasures,

'गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः
पत्रच्छेदैः[2] कनककमलैः[3] कर्णविभ्रंशिभिश्च[4] ।
मुक्ताजालैः[5] स्तनपरिसरच्छिन्नसूत्रैश्च[6] हारै-
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम् ॥ ११ ॥

11. Where the path pursued at night by love-affected women (*abhisārikas*) is indicated, at sun-rise by the *Mandāra* flowers fallen from their hair, by the golden lotuses slipped off from their ears with their petals shattered, and by the necklaces consisting of strings of pearls with their threads broken on their expansive breasts, owing to the shaking caused by their (rapid) gait.

---

१ गत्योत्कम्पात्. २ च्छेद्यैः; क्लृप्तच्छेदः. ३ नलिनैः. ४ विस्रंसिभिः. ५ मुक्तालग्नैः ०लग्न०. ६ परिमलैः, परिमल०; जालस्तनपरिचयाच्छिन्न.

गतीति ।। यत्र अलका **कामिनीनाम्** । अभिसारिकाणाम् । निशि भवो नैशो **मार्गः सवितुः** उदये सति [**गत्युत्कम्पात्**] गत्या गमनेनोत्कम्पश्चलनं तस्माद्धेतोः अलकेभ्यः पतितैः [**अलकपतितैः**] **मन्दारपुष्पैः** सुरतरुकुसुमैः । तथा [**पत्रच्छेदैः**] पत्राणां पत्रलतानां छेदैः खण्डैः । पतितैरिति शेषः । तथा [**कर्णविभ्रंशिभिः**] कर्णेभ्यो विभ्रश्यन्तीति कर्णविभ्रंशीनि तैः **च** [**कनककमलैः**] कनकस्य कमलैः । षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहेऽध्याहारदोषः । एवमन्यत्राप्यनुसंधेयम् । तथा **मुक्ताजालैः** मौक्तिकसरैः । शिरोनिहितैरित्यर्थः । तथा [**स्तनपरिसरच्छिन्नसूत्रैः**] स्तनयोः परिसरः प्रदेशस्तत्र छिन्नानि सूत्राणि येषां तैः **हारैः च सूच्यते** ज्ञाप्यते । मार्गपतितमन्दारकुसुमादिलिङ्गैरयमभिसारिकाणां पन्था इत्यनुमीयत इत्यर्थः ।।

' कचधार्यं देहधार्यं परिधेयं विलेपनम् । चतुर्धा भूषणं प्राहुः स्त्रीणामन्यच्च दैशिकम् ।। ' इति रसाकरे । तदेवैतदाह —

Sl. 11. **गत्यूत्कम्प**––shaking of the body caused by the (rapid) movement of the body. **पत्रच्छेदैः**—pieces of leaves (used as decorations on the ears or in ornamental drawings, पत्रलता as Malli. has it). One Com. says––नागवल्लीदलशकलैः. It seems better, however, to take this as an *adj.* qualifying कनककमलैः; पत्राणां छेदायेषां the petals of which fell off or got cut. We need not then supply पतितैः which Malli. is forced to do. There are three *Kriyās* mentioned here as due to the गत्युत्कम्प expressed by पतितैः, विभ्रंशिभिः and छिन्न, and the words must be taken accordingly. The reading पत्रच्छेद्यैः shows that this is meant as an *adj.* to कमलैः क्लृप्तच्छेदैः *v. l.* means रचितखण्डैः. **कनककमलैः**—Properly, this should be taken as कनकमयानि (made of gold) कमलानि; but Malli. says–When we get the sense by the Gen., it is not good to bring in the aff. मय (मयट), as that will involve the fault ' अध्याहार ' (the importation of a term to supply an ellipsis). **मुक्ताजालैः**––strings of pearls. Malli. understands by these ' those worn round the braids of hair ' (to avoid repetition with हारैः subsequently mentioned). It will be seen, from what is said above, that it is better to take this as an *adj.* to हारैः; मुक्तानां जालानि येषु. This will save also the necessity of taking the pearl-strings as referring to the hair, as we have already the *Mandāra* flowers mentioned as dropping from the hair, and Kāli. will not repeat the same idea. **स्तनपरिसर**––the region or expanse of; hence, their large or expansive breasts. Some explain this as..स्तनेषु परिसरन्ति ते स्तनपरिसराः (movrng across) पश्चात् छिन्नसूत्रास्तैः. The reading मुक्तालग्नस्तनपरिमलैः is better as, it does away with the necessity of taking मुक्ताजालैः as a Vyadhikaraṇa Bah.; it

means–the pearls which were scented with the sandal or musk of the unguents applied to their bosoms by the *Abhisārikās*. स्तनपरिचय० *v. l.* is explained as कठिनकुचसंमर्दः (striking against their hard breasts). कामिनीनां-- *i. e.* the *Abhisārikās* (women who go at night by appointment to meet their lovers); see *supra*, I. 39. *Cf.* " I have already mentioned that the Hindus always send the lady to seek her lover, and they usually add a very reasonable degree of ardour and impatience. Our poet, in another place, compares the female so engaged to a rapid current. Thus in the Ritus.--निपातयन्त्यः परितस्तनटद्रुमान्प्रवृद्धवेगैः सलिलैरनिर्मलैः । स्त्रियः प्रकामा इव जातविभ्रमाः प्रयान्ति नद्यस्त्वरितं पयोनिधिम् ।। (II. 7.). "–Wilson.

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पम्[1] ।
लाक्षारागं चरणकमलन्यासयोग्यं च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः ।। १२ ।।

12. In which (city) the desire-yielding tree alone produces every kind of female decoration, *viz.* a variegated garment, wine, clever in giving instructions in graceful movements to the eyes, the unfolding (appearance) of flowers along with sprouts, the different kinds of ornaments, and lac-dye fit for application to the lotus like feet.

वास इति ।। यस्याम् अलकायां चित्रं नानावर्णं वासः वसनम् । परिधेयमण्डनमेतत् । नयनयोः [विभ्रमादेशदक्षं] विभ्रमाणामादेश उपदेशे दक्षम् । अनेन विभ्रमद्वारा मधुनो मण्डनत्वमनुसंधेयम् । तच्च मण्डनादिवद्देहधार्येऽन्तर्भाव्यम् । मधु मद्यम् । किसलयैः पल्लवैः सह पुष्पोद्भेदम् उभयं चेत्यर्थः । इदं तु कचधार्यम् । भूषणानां विकल्पान् विशेषान् । देहधार्यमेतत् । तथा [चरणकमलन्यासयोग्यं] चरणकमलयोर्न्यासस्य समर्पणस्य योग्यम् । रज्यतेऽनेनेति रागो रञ्जकद्रव्यम् । लाक्षैव रागस्तं लाक्षारागं च । चकारोऽङ्गरागादिविलेपनमण्डनोपालक्षणार्थः । सकलं सर्वम् । चतुर्विधमपीत्यर्थः । अबलामण्डनं योषित्प्रसाधनजातम् । एकः कल्पवृक्षः एव सूते जनयति । न तु नानासाधनसंपादनप्रयास इत्यर्थः ।।

Śl. 12. In this śl. he describes the four kinds of decorations required by women, *viz.* those to be worn on the (hair of the) head, on the body, the garments to be worn, and unguents, dyes &c. to be applied to the cheek, feet &c. See com. वासः चित्रं–Sing.

---

१ विकल्पान् (मल्लि०),

for the Plural; 'garments of divers colours.' मधु—drinking wine, it must be owned, was a common and a fashionable vice among the rich and gay people of both the sexes in ancient India, and we have references to मधुपान in almost every Kāvya (Mahābhārata and Rāmā. included). विभ्रमा०—adept in giving instructions in graceful movements. Here विभ्रम is used in a restricted sense. For its general sense, *cf.* further on, śl. 14. For the meaning of आदेश *cf.* कपोलपाटलादेशि बभूव रघुचेष्टितम्। Ragh. IV. 68. For the effects of wine *cf.* नयनान्यरुणानि घूर्णयन् वचनानि स्खलयन्पदे पदे। असति त्वयि वारुणीमदः प्रमदानामधुना विडम्बना॥ Kum. IV. 12; also तां मदो दयितसंगमभूषः। Sis. X. 33. विकल्पम्—Sing. for the Pl. (which Malli. reads); the different kinds or sets of; fr. विकल्प meaning 'design.' The sing. is better for the sake of symmetry. राग—a paint or dye; see com. यस्यां—the reading of the Pārśva., which reads this śl. after the 10th (अक्षय्या०). is यस्मिन् and it refers to the garden वैभ्राज. एकः—One, alone, सूते &c.—We have a similar description of the trees producing ladies' ornaments in Sāk. IV. 5.

[1]पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः [2]प्रभेदात्।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः॥ १३॥

13. In which there are horses dark-green like leaves (of trees) and rivalling the sun's steeds: elephants, lofty like mountains and casting showers like you on account of the flow of ichor; and warriors of the first rank who withstood Rāvaṇa in battle, and who have caused the beauty of ornaments to be set aside by the marks of the wounds made by Chandrahāsa (the sword of Rāvaṇa).

पत्रेति। हे जलद यत्र अलकायां वाहाः-हयाः पत्रश्यामाः पलाशवर्णाः। अत एव दिनकरहयस्पर्धिनः वर्णतो वेगतश्च सूर्याश्वकल्पाः। तथा शैलोदग्राः शैलवदुन्नताः करिणः प्रभेदात् मदस्रावाद्धेतोः त्वमिव वृष्टिमन्तः। [योधाग्रण्यः] अग्रं नयन्तीत्यग्रण्यः। 'सत्सूद्विष-' इत्यादिना क्विप्। 'अग्रग्रामाभ्यां नयतेः' इति वक्तव्याण्णत्वम्॥ योधानामग्रण्यो भटश्रेष्ठाः संयुगे युद्धे प्रतिदशमुखम् अभिरावणं तस्थिवांसः स्थितवन्तः। अत एव [चन्द्रहासव्रणाङ्कैः] चन्द्रहासस्य रावणासेर्व्रणानि क्षतान्येवाङ्काश्चिह्नानि

१ शष्य; यस्य. २ पर्योदाः.

तैः । 'चन्द्रहासो रावणासावसिमात्रेऽपि च क्वचित्' इति शाश्वतः । प्रत्यादिष्टाभरणरुचयः प्रतिषिद्धभूषणकान्तयः । शस्त्रप्रहारा एव वीराणां भूषणमिति भावः । अत्रापि भाविकालंकारः ॥

Śl. 13. This śl., though given by Malli. in the Pūrvamegha, as part of the description of Viśāla, is read in the Uttaramegha in the description of Alakā. by the other commentators and by the author of the Pārsva.; and this seems to be its proper place. For it makes a reference to a battle with Rāvaṇa which has no connexion with Ujjayini, while we know that Rāvaṇa invaded Alakā and fought with Kubera for the sake of his Pushpaka Vimana which he wrested from him. For this reason it has been transferred to this place in this edition. In Pandit Islampurkar's ed., it is given as the 5th śl. of the Uttaramegha. दिनकर०—दिनकरहयैः स्पर्धन्ते इति दिन०; 'vying with, almost equal to, the sun's horses (in colour and fleetness). The horses of the sun are described as of a dark-green colour, and hence his name हरिदश्व; *cf.* Rg. I. 50. 8, 115. 4; B. P. XII. वाहः—वाह्यते अनेन; a horse. fr. वह + अ (घञ् which causes Vriddhi of the intital vowel) added कर्मणि or करणे. शैलोदग्रा—tall, lofty, like a mountain; उद्गतमग्रमस्यासौ उदग्रः *lit.* of a raised or high point which attracts attention; hence, preeminently high. प्रभेद-*lit.* the bursting or opening of the temples giving an outlet to rut; hence, the exudation of ichor. अग्रणीः—*Lit.* one who leads the front or van; hence, foremost among. अग्रण्यः is Nom. pl.; see com. The न of नी is changed to ण after अग्र and ग्राम. See termi. क्विप् (which is added and dropped) is added to the roots; सद्, सू, द्विष्, नी &c., whether preceded by a prep. or not, when there is an Upapada; as द्युषत्, प्रसूः, मित्रद्विट्, अग्रणीः &c. See Pāṇ. III. 2. 61, प्रतिदशमुखं—दशमुखं प्रति Avy. Comp., 'against or opposing Rāvaṇa.' प्रतिदिशमुखं *v. l.* means प्रतिदिशं मुखं यस्य, having a face in every direction (*i. e.* in the ten directions). प्रत्यादिष्टा०—प्रत्यादिष्टा (ordered back, rendered unnecessary, they serving that purpose; or excelled.) आभरणानां रुचि; (beauty) यैस्ते. *Cf.* प्रत्यादेशो रूपगर्वितायाः श्रियः । Vik. Act I. : रक्षागृहगता दीपाः प्रत्यादिष्टा इवाभवन्. Ragh. X. 68. चन्द्रहास—the name of Rāvana's sword; it is sometimes used in the sense of an ordinary sword also, well polished and glittering (*lit.* laughing at the moon by its brightness). अंक—a mark or scar left by.

मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं
प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।
सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येष्वमोघै-
स्तस्यारम्भैश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ १४ ॥

14. And in which the God of Love, knowing the god Śiva (*lit*. the friend of Kubera) to be dwelling there in person, does not, through fear, as a general rule, wield his bow that has (a row of) bees for its string. His work is accomplished by (the arrows in the form of) the sportive actions of clever women alone, which are never ineffective against sensual persons, their marks and in which glances are cast with knittings of the eye-brows.

मत्वेति ॥ **यत्र** अलकायां **मन्मथः** कामः । [**धनपतिसखं**] धनपतेः कुबेरस्य सखेति धनपतिसखः । 'राजाहःसखिभ्यष्टच्' । तं देवं महादेवं **साक्षात्** **वसन्तं** सखिस्नेहान्निजरूपेण वर्तमानं **मत्वा** ज्ञात्वा **भयात्** भालेक्षणभयात्षट्पदा एव ज्या मौर्वी यस्य तं [**षट्पदज्यं**] **चापं** **प्रायः** प्राचुर्येण **न** **वहति** न बिभर्ति । कथं तर्हि तस्य कार्यसिद्धिरत आह-सभ्रूभङ्गेति । **तस्य** मन्मथस्य **आरम्भः** कामिजनविजयव्यापारः [**सभ्रूभङ्गप्रहितनयनैः**] सभ्रूभङ्गं प्रहितानि प्रयुक्तानि नयनानि दृष्टयो येषु तैस्तथोक्तैः [**कामिलक्ष्येषु**] कामिन एव लक्ष्याणि तेषु **अमोघैः** । सफलप्रयोगैरित्यर्थः । मन्मथचापोऽपि क्वचिदपि मोघः स्यादिति भावः । [**चतुरवनिताविभ्रमैः**] चतुराश्च ता वनिताश्च तासां विभ्रमैर्विलासैः **एव** **सिद्धः** निष्पन्नः । यदनर्थकरं पाक्षिकफलं च तत्प्रोगाद्वरं निश्चितसाधनप्रयोग इति भावः ॥

Śl. 14. Following the order of the Pārśva., we have put this śl. after वासश्चित्रं &c.; it is but fitting that Kali. should refer to his favourite deity in closing his description of Alaka. **साक्षात**— in his bodily or visible form;' सह अक्षेण (=इन्द्रियेण) साक्षः तमतीति 'साक्षात्. **प्रायः**—as a general rule; in most cases. **भयात्**—through dread; because he was once reduced to ashes by Śiva for daring to assail him. *Cf*. तपःपरामर्शविवृद्धमन्योर्भ्रूभङ्गदुष्प्रेक्ष्यमुखस्य तस्य । स्फुरन्नुदर्चिः सहसा तृतीयादक्ष्णः कृशानुः किल निष्पपात ॥ क्रोधं प्रभो संहर संहरेति यावद्गिरः खे मरुतां चरन्ति । तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ Kum. III. 71, 72. **मन्मथः**—fr. मत् consciousness; मतो मथः (मन्थाति इति) the destroyer of, hence the God of Love. **षट्पदज्यं**--षट् पदान्यस्यासौ षट्पदः a bee; now see Com. The string

१ सभ्रूभङ्गम्. २ कामलक्षेप. ३ चटुल.

of Madana's bow is poetically described as formed of bees; *cf.* अलिपङ्क्तिरनेकशस्त्वया गुणकृत्ये धनुषो नियोजिता । Kum. IV. 15. मौर्वीमधुकर पङ्क्तिनीलिमलीलया रोमावलीं Dasak. Pur. V. सभ्रूभङ्ग०--भ्रुवोर्भङ्गा भ्रूभङ्गास्तैः सहितं यथा तथा सभ्रूभङ्गं; now see com. लक्ष्य—a mark or target; लक्ष्यते इति लक्ष्यं fr. लक्ष् + य. अमोघ—not fruitless or falling ineffectively, *i. e.* always effective. आरम्भः—his work, *i. e.* that of wounding the hearts of lovers. चतुर—may also be taken with विभ्रम. Some read चटुल for चतुर, taking it with विभ्रम. It means 'active. unsteady;' hence, charming, engaging. वनिता—the word is used here appropriately. *Cf.* the Subhashita सा कविता सा वनिता यस्याः श्रवणेन दर्शनेनापि । कविहृदयं विटहृदयं सरलं तरलं च सत्वरं भवति ॥ विभ्रमैः—blandishment, coquettish actions : in fact all the bodily actions under the influence of love मद, हर्ष, राग &c. *Cf.* चित्तवृत्त्यनवस्थानं शृङ्गाराद्विभ्रमो मतः ॥ These here take the place of Madana's arrows.

इत्थमलकां वर्णयित्वा तत्र स्वभवनस्याभिज्ञानमाह--

[1]तत्रागारं धनपतिगृहानु[2]त्तरेणास्मदीयं
दूराल्लक्ष्यं [3]सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ॥ १५ ॥

15. There, to the north of Kubera's palace, stands our dwelling, recognizable from afar by the arched gateway looking as charming as a rain-bow, in the vicinity of which there is a *Mandāra* tree which is reared by my wife being treated as a son, and which is weighed down by clusters of flowers that can be reached by the hand.

तत्रेति ॥ तत्र अलकायां धनपतिगृहान् कुबेरगृहान् उत्तरेण उत्तरस्मिन्नदूरदेशे । 'एनबन्यतरस्यामदूरेऽपञ्चम्याः' इत्येनप्प्रत्ययः । 'एनपा द्वितीया' इति द्वितीया । 'गृहाः पुंसि च भूम्न्येव' इत्यमरः । 'धनपतिगृहात्' इति पाठे 'उत्तरेण' इति नैनत्प्रत्ययान्तं किं तु 'तोरणेन' इत्यस्य विशेषणं तृतीयान्तम् । धनपतिगृहादुत्तरस्यां दिशि यत्तोरणं बहिर्द्वारं तेन लक्षितमित्यर्थः । अस्माकमिदं अस्मदीयम् । 'वृद्धाच्छः' इति पक्षे छप्रत्ययः अगारं गृहम् । सुरपतिधनुश्चारुणा मणिमयत्वादनेकवर्णत्वाच्चेन्द्रचापसुन्दरेण तोरणेन बहिर्द्वारेण दूरात् लक्ष्यं दृश्यम् । अनेनाभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः । अभिज्ञानान्तरमाह—यस्य अगारस्य उपान्ते प्राकारान्तः पार्श्वदेशे मे मम कान्तया वर्धितः— पोषितः कृतकतनयः कृत्रिमसुतः । पुत्रत्वेनाभि-

१ अत्र. २ गृहात्. ३ त्वदमरधनु. ४ उद्याने, ५ विनतः.

मन्यमान इत्यर्थः। [हस्तप्राप्यस्तबकनमितः] हस्तेन प्राप्यैर्हस्तावचयैः स्तबकैर्गुच्छैर्नमितः। 'स्याद्गुच्छकस्तु स्तबकः' इत्यमरः। बालमन्दारवृक्षः कल्पवृक्षोऽस्तीति शेषः॥

Śl. 15. तत्रागारं--Here the word may be अगार or आगार (a house): 'विद्यादगारमागारम्' इति द्विरूपकोशः. गृहानुत्तरेण--The word गृह is mostly *mas.* and in the plural; *i. e.* when the house with its environments or appendages is used, it is *mas.* and pl. in form; otherwise *n.* and of any number. *Cf.* मनांसि सत्त्वैरभिभूयन्ते गृहाः Śak. VI. p. 179. Words express of directions ending in एन, such as दक्षिणेन, उत्तरेण, &c., (which are *indec.*) are used with the Acc. or the Gen.; see com (एनपा इति योगविभागात् षष्ठी अपि Sid.-Kau.) If the reading be गृहात् (Abl. sing.) then उत्तरेण must be taken as Inst. sing., qualifying the noun तोरणेन. Mark the use of the Abl. with words expressive of directions. तोरणेन—Indicated by, to be recognized from, the arched gateway. सुरपतिधनुश्चारुणा—This indicates that the arched gate was very high and studded with gems of various colours. कृतकतनयः—made, *i. e.* tended as, a son. The idea of trees being adopted as children and tended with anxious care is very common in Sanskrit poetry; *cf.* अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन। Ragh. II. 36; see also *ibid* V. 6 (संवर्धितानां सुतनिर्विशेषं) &c. कृतक may also come last in a Comp.; as in सोऽयं न पुत्रकृतकः पदवीं मृगस्ते &c. Śak. IV. 14; अपत्यकृतिकां राज्ञे Uttar. I. 4. The optionality of पूर्वनिपात is given by the rule वाऽऽहिताग्न्यादिषु Pāṇ. II. 2. 37; *i. e.* words of the आहिताग्नि class may come first or second in a comp.; as आहिताग्नि or अग्न्याहित. "Tender attachment to natural objects is one of the most pleasing features in the poetical compositions of the Hindus. It is very frequently expressed, and perhaps in few places with more beauty than in the drama of Śakuntalā, where, upon departing from the tower of her foster-father, she bids adieu to the plants had carefully tended, and the orphan fawn she had reared."—Wilson.

इतः परं चतुर्भिः श्लोकैरभिज्ञानान्तरमाह—

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना[1] विकचकमलैः[2] स्निग्धवैदूर्यनालैः[3]।
यस्यास्तोये कृतवसतयो मानसं संनिकृष्टं
नाध्यास्यन्ति[4] व्यपगतशुचस्त्वामपि प्रेक्ष्य[5] हंसाः॥ १६॥

---

१ स्फीता. २ विकचकुसुमैः, कमलमुकुलैः. ३ दीर्घ. ४ ध्यास्यन्ति, ध्यायन्ति. ५ प्राप्य.

16. It has also a pond attached to it, furnished with a flight of steps formed of emerald stones, and closely filled with full-blown golden lotuses with glistening stalks of *vaidūryas*, the swans dwelling in the water of which, being free from anxiety, do not long for (the lake) Mānasa, though close at hand, even on seeing you (at the approach of the rainy season).

वापीति ।। अस्मिन् मदीयागारे [मरकतशिलाबद्धसोपानमार्गा] मरकतशिलाभिर्बद्धः सोपानमार्गो यस्याः सा तथोक्ता । [स्निग्धवैदूर्यनालैः] विदूरे भवा वैदूर्याः 'विदूराञ्ञ्यः' इति ञ्यप्रत्ययः । वैदूर्याणां विकारा वैदूर्याणि । विकारार्थेऽण्प्रत्ययः । स्निग्धानि वैदूर्याणि नालानि येषां तैः हैमैः सौवर्णैः विकचकमलैः छन्ना वापी च अस्तीति शेषः । यस्याः वाप्याः तोये कृतवसतयः कृतनिवासाः हंसाः त्वां मेघं प्रेक्ष्य अपि व्यपगतशुचः वर्षाकालेऽपि व्यपगतकलुषजलत्वाद्वीतदुःखाः सन्तः संनिकृष्टं संनिहितम् । सुगममपीत्यर्थः । मानसं मानससरः न आध्यास्यन्ति नोत्कण्ठया स्मरिष्यन्ति । 'आध्यानमुत्कण्ठापूर्वकं स्मरणम्' इति काशिकायाम् ।।

Śl. 16. वापी—उप्यंते पद्मादि अस्यां; a large oblong well, with lotuses in it; fr. वप् + Uṇādi इ + *fem.* aff. ई. सोपान—fr. स + उप + आन—सह विद्यमान उप उपरि आनो गमनमनेनः a flight of steps (generally of stone): a staircase. हैमैः—हेम्न इमानि fr. हेमन् gold छन्ना—स्फीता *v. l.*; स्फीत properly means 'swollen with;' filled with: or, prominently marked with or smiling with. स्यूता is another reading. वैदूर्य—lapis lazuli, a kind of gem of a darkish or blue colour; fr. विदूरे (name of a mountain, supposed to be in Ceylon) भवम्; विदूर + य (ष्यञ्): see Com. *Cf.* विदूरभूमिर्नवमेघशब्दादुद्भिन्नया रत्नशलाकयेव । Kum. I. 24. आध्यास्यन्ति—2nd Fut. of ध्यै with आ which means 'to long for;' to remember with sorrowful recollection. व्यपगतशुचः—व्यपगता शुक् येषां ते. This explains why they do not think of going to Mānasa. They were not sorry because they knew that the water of the well would not grow turbid. See *supra* I. II. त्वामपि &c.— *i. e.* even at the advent of the rainy season. as other swans do.

[1]तस्यास्तीरे [2]रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदली[3]वेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्[4]फुरिततडितं त्वां तमेव स्मरामि ।। १७ ।।

---

१ यस्याः. २ विहित; निचित. ३ वेष्टनः; वेष्टित० ४ स्फुटित.

मे...९

17, On its margin there is a pleasure-mountain, the peak- of which is made of beautiful sapphires and which is attraetive on account of a fence of golden plantain-trees On seeing you. O friend, with lightning flashing about you, I remember that very mountain, with a mind full of misgivings owing to its being a favonrite of my wife.

तस्या इति ।। तस्याः वाप्या तीरे पेशलैः चारुभिः । 'चारौ दक्षे च पेशलः' इत्यमरः । इन्द्रनीलैः रचितशिखरः इन्द्रनीलमणिमयशिखर इत्यर्थः [कनककदलीवेष्टनप्रेक्षणीयः] कनककदलीनां वेष्टनेन परिधिना प्रेक्षणीयो दर्शनीयः क्रीडाशैलः । अस्तीति शेषः । हे सखे [उपान्तस्फुरिततडितम्] उपान्तेषु प्रान्तेषु स्फुरितास्तडितो यस्य तत्तथोक्तम् । इदं विशेषणं कदलीसाम्यार्थमुक्तम् । इन्द्रनीलसाम्यं तु मेघस्य स्वाभाविकमित्यनेन सूच्यते । त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति हेतोः तस्य शैलस्य मद्गृहिणीप्रियत्वाद्धेतोरित्यर्थः । कातरेण भीतेन चेतसा भयं चात्र सानन्दमेव । 'वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात् । श्रवणात्कीर्तनाद्वाऽपि सानन्दा भीर्यथा भवेत् ।।' इति रसाकरे दर्शनात् । तमेव क्रीडाशैलमेव स्मरामि । एवकारो विषयान्तरव्यवच्छेदार्थः । सदृशवस्त्वनुभवादिष्टार्थस्मृतिर्जायत इत्यर्थः । अत एवात्र स्मरणाख्योऽलंकारः । तदुक्तम्--'सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते' इति । निरुक्तकारस्तु 'त्वां तमेव स्मरामि' इति योजयित्वा मेघे शैलत्वारोपमाचष्टे तदसंगतम् अदरयाकारारोपस्य पुरोवर्तिन्यनुभवात्मकत्वेन स्मरतिशब्दप्रयोगानुपपत्तेः शैलत्वभावनास्मृतिरित्यपि नोपपद्यते । भावनायाः स्मृतित्वे प्रमाणाभावादनुभवायोगात्सादृश्योपन्यासस्य वैयर्थ्याच्च विसदृशेऽपि शालग्रामे हरिभावनादर्शनादिति ।।

Śl. 17. **पेशलैः** beautiful, *i. e.* lustrous. **इंद्रनील**—a precious stone of a blue colour, a sapphire (also called नील). *Cf.* वैदर्भिकालशैले मरकतशिखरादुत्थितैरंशुदर्भैः । Nai. II. 105, **कनककदली०**—as Alakā was the land of golden lotuses, so it abounded in golden plantain trees also. **वेष्टन**—surrounding. The reading कनककदलीवेष्टनः is better. The mountain was प्रेक्षणीय (charming to look at) because it was formed of sapphires and fenced round with plantain trees. Its beauty was the combined result of the two, and so it is not good to connect. प्रेक्षणीय with कनककदलीवेष्टन alone. **कातरेण**—The trepidation was due to the feeling of joy; see Com. **उपान्तस्फु०**—the flashing lightning corresponds to shining कनककदलीs, the dark cloud resembling the sapphire-formed mountain **स्मरामि**--The fig. here is स्मरण, which is defined as "the recollection of another thing from the perception (appearance) of a thing similar to it." Here Malli. refutes the view of the Niruk-

takāra (not Yāska, but some other writer, probably a commentator on the poem) who takes this as a Rūpaka. He construes—त्वां तमेव स्मरामि 'I remember thee as the very same mountain' thus imputing the identity of the mountain to the cloud. This is improper (nonsensical), says Mallinātha, since the identity of the mountain with the cloud cannot be directly obtained. For, if we superimpose the form of the hill on the cloud, the cloud will appear as the hill, and the word स्मरति is out of place. Now, if you say that the conception of the hill (arising from the appearance of the cloud) is the same as the recollection of it, even that will not stand to reason. For, there is no proof to say that conception is recollection, since recollection arises from previous impression (observation), while conception has nothing to do with it. Again, if you say that conception requires resemblance, such a statement is also futile, being opposed to experience; for, the conception of Hari arises from the Sālagrāma stone, even though the latter bears no resemblance to the former.

रक्ताशोकश्चलकिसलयः केसरश्चात्र[1] कान्तः
[2]प्रत्यासन्नौ कुरबकवृतेर्माधवीमण्डपस्य ।
एकः सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहद[3]च्छद्मनाऽस्याः ॥ १८ ॥

18. On it are a red *Aśoka* tree with its waving foliage and a beautiful *Kesara* close to the bower of the *Mādhavī* creepers having a hedge of the *Kurabaka* plants. The former longs, with me (like myself) for (a kick from the) left foot of your friend (my wife), and the latter for mouthfuls of wine from her under the pretext of a *dohada* (an operation necessary to cause them to bloom).

रक्तेति ॥ अत्र क्रीडाशैले [कुरबकवृतेः] कुरबका वृतिरावरणं यस्य तस्य [माधवीमण्डपस्य] मधौ वसन्ते भवा माधव्यस्तासां मण्डपस्तस्य अतिमुक्तलतागृहस्य । 'अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी लता ।' इत्यमरः । प्रत्यासन्नौ संनिकृष्टौ चलकिसलयः चञ्चलपल्लवः । अनेन वृक्षस्य पादताडनेषु प्राञ्जलित्वं व्यज्यते । रक्ताशोकः । रक्तविशेषणं तस्य स्मरोद्दीपकत्वादुक्तम् । 'प्रसूनकैरशोकस्तु श्वेतो रक्त इति द्विधा । बहुसिद्धिकरः श्वेतो रक्तोऽत्र स्मरवर्धनः ॥'

१ तत्र. २ प्रत्यासन्नः. ३ दौर्हृद.

इत्यशोककल्पे दर्शनात् । कान्तः कमनीयः केसरः वकुलः च 'अथ केसरे' 'बकुलो वञ्जुलः' इत्यमरः । स्त इति शेषः एकः तयोरन्यतरः । प्राथमिकत्वादशोक इत्यर्थः । मया सह तव सख्याः स्वप्रियाया इत्यर्थः । वामपादाभिलाषी । दोहदच्छद्मनेत्यत्रापि संबन्धनीयम् । स चाहं च । अभिलाषिणावित्यर्थः । अन्यः केसरः [दोहदच्छद्मना] दोहदं वृक्षादीनां प्रसवकारणं संस्कारद्रव्यम् । 'तरुगुल्मलतादीनामकाले कुशलैः कृतम् । पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया ।' इति शब्दार्णवे । तस्य छद्मना व्याजेन । 'कपटोऽस्त्री व्याजदम्भोपधयः छद्मकैतवे ॥' इत्यमरः । अस्याः तव सख्याः वदनमदिरां गण्डूषमद्यं काङ्क्षति । सहेत्यत्रापि संबन्धनीयम् । अशोकबकुलयोः स्त्रीपादताडनगण्डूषमदिरे दोहदमिति प्रसिद्धिः । 'स्त्रीणां स्पर्शात्प्रियङ्गुर्विकसति बकुलःसीधुगण्डूषसेकात्पादाघातादशोकस्तिलककुरबकौ वीक्षणालिङ्गनाभ्याम् । मन्दारो नर्मवाक्यात्पटुमृदुहसनाच्चम्पको वक्त्रवाताच्चूतो गीतान्नमेरुर्विकसति च पुरो नर्तनात्कर्णिकारः ॥'

Śl. 18. रक्ताशोकः---The *Aśokas* is of two kinds, white and red (so called from the colour of the flowers). The red one and *Kesara* are mentioned by poets in connexion with love-affairs (as excitants of passion). With regard to *Aśoka* Sir William Jones says—" The vegetable world scarcely exhibits a richer sight than an *Aśoka* tree in full blossom. " केसर--generally known as *Bakula*, has tiny strong-smelling flowers. माधवी--the *Atimukta* creeper, (Marāthi मोगरा) so called because it blossoms in Madhu or Spring. **मया सह**— *i. e.* just as I also do (wish it). **वामपादाभिलाषी**—The *Aśoka* is said to put forth flowers when kicked with her left foot by a beautiful woman. *Cf.* असूत: सद्यः कुसुमान्यशोकः स्कन्धात्प्रभृत्येव सपल्लवानि । पादेन नापैक्षत सुन्दरीणां संपर्कमाशिञ्जितनूपुरेण ॥ Kum. III. 26; and अकुसुमितमशोकं दोहदापेक्षया वा प्रणिहितशिरसं वा कान्तमार्दपराधम् ॥ Mālav. III. 12; also विदूषक—भवति न युक्तं नामात्रभवतः प्रियवयस्योऽशोको वामपादेन ताडयितुम् *ibid* III. काङ्क्षत्यन्यो वदन०—like the *Aśoka Kesara* also is poetically described as putting forth blossoms when sprinkled over with mouthfuls of wine by young ladies. *Cf.* मूले गण्डूषसेकासव इव बकुलैर्वास्यिते पुष्पवृष्ट्या &c. Ratn. I. 18; मदकलितकामिनीगण्डूषसीधुसेकपुलकितबकुलेषु Kād. p. 222. **दोहदच्छद्मना**—The Pārsvā. and some MSS. read दौहृद for दोहद which is supposed by some to be the corrupt form of the former. दौहृद or दौर्हृद is formed from द्वि + हृदय (see Malli. on Ragh. III. 1), and primarily signifies pregnancy, and then the pregnancy desire or hankerings that a woman has; and hence, secondarily the longing of any other thing, as of a tree; or the object longed

for. *Cf.* कुसुमं कृतदोहदस्त्वया यदशोकोऽयमुदीरयिष्यति । Ragh. VIII. 61. The word दोहद may also be explained as दोहं आकर्षं ददातीति; what creates a strong longing; hence, a pregnancy-desire. Sanskrit poets conventionally describe certain trees as having different longings which have to be satisfied before they put forth blossoms. See the śloka quoted by Malli.; also *cf.* पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः । आलोकनात्कुरबकः कुरुते विकासमालोडितस्तिलक उत्कलिको विभाति ॥ quoted by Malli. in his com. on Kum. III. 26, quoted above.

[1]तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले [2]बद्धा मणिभिरनतिप्रौढवंशप्रकाशैः ।
तालैः शिञ्[3]जावलयसुभगैर्नर्तितः[4] कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ १९ ॥

19. And between these two there is a golden perch standing on a crystal-slab and having its basement built with gems (emeralds) having the sheen of young bamboos, on which roosts, at the close of the day, a peacock, a friend of your class, who is made to dance by my wife with clappings of hands, rendered pleasing by the jingling of her bracelets.

तन्मध्य इति ॥ [च] किं चेति चार्थः । तन्मध्ये तयोर्वृक्षयोर्मध्ये [अनतिप्रौढवंशप्रकाशैः] अनतिप्रौढानामनतिकठोराणां वंशानां प्रकाश इव प्रकाशो येषां तैस्तरुणवेणुसच्छायैः मणिभिः मरकतशिलाभिः मूले बद्धा । कृतवेदिकेत्यर्थः । [स्फटिकफलका] स्फटिकं स्फटिकमयं फलकं पीठं यस्याः सा । काञ्चनस्य विकारः काञ्चनी सौवर्णी वासयष्टिः निवासदण्डः अस्तीति शेषः । [शिञ्जावलयसुभगैः] शिञ्जा भूषणध्वनिः । 'भूषणानां तु शिञ्जितम्' इत्यमरः ॥ भिदादित्वादङ् । शिञ्जिधातुरयं तालव्यादिर्न तु दन्त्यादिः । शिञ्जाप्रधानानि वलयानि तैः सुभगा रम्यास्तैः । तालैः करतलवादनैः मे मम कान्तया नर्तितः वः युष्माकं सुहृत् सखा नीलकण्ठो मयूरः । 'मयूरो बर्हिणो बर्हिर्नीलकण्ठो भुजङ्गभुक् ।' इत्यमरः । दिवसविगमे सायंकाले यां यष्टिकाम् अध्यास्ते । यष्ट्यामास्त इत्यर्थः । 'अधिशीङ्स्थासां कर्म' इति कर्मत्वाद्द्वितीया । 'तत्रागारान्' इत्यारभ्य पञ्चमु श्लोकेषु समृद्धवस्तुवर्णनादुदात्तालंकारः । तदुक्तम्– 'तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते' इति । न चैषा स्वभावोक्तिर्भाविकं वा तत्र यथास्थितवस्तुवर्णनात् । अत्र तु 'कविप्रतिभोत्थापित-

---

१ तत्तन्मध्ये. २ नद्धा. ३ सिञ्चत्. ४ नर्तितैः.

संभाव्यमानैश्वर्यशालिवस्तुवर्णनादारोपितविषयत्वमिति ताभ्यामस्य भेदः। ' इत्यलंकारसर्वस्वकारः ॥

Śl. 19. फलक-- a board (forming its base). वासयष्टिः--वासार्थं यष्टिः वासयष्टिः a rod or stick for birds to perch on; a perch. मूले बद्धा—having its basement formed of. ०वंशप्रकाशैः--having the sheen or lustre of young bamboos, *i. e.* emeralds. ताल--marking of musical intervals by the hands. शिञ्जावलय०--a Madhyamapadalopi Comp.; specially capable of producing a jingling. The words, शिञ्जा, शिञ्जित &c. refer to the jingling of ornaments; *cf.* नेदं नूपुरशिञ्जितम् Vik. IV. 14. सुभगैः--charming, attractive. Malli. remarks that the root शिञ्ज् has an initial palatal (श्) and not the dental स्: hence the forms सिञ्जा, सिञ्जत् &c. are wrong. शिञ्जवदलय० *v. l.*—the root शिञ्ज् being Ātm. the form शिञ्जत् is ungrammatical, शिञ्जान being the correct form of the pres. p ; and Malli. probably adopts the reading शिञ्जावलय० to avoid this difficulty. The commentators who have followed this reading explain away the irregularity somehow. Thus Vallabha says– शिञ्जेरात्मनेपदित्वात् शिञ्जदिति प्रयोगः प्रमादजः। अनित्यो वा अनुदात्तङित आत्मनेपदविधिः (the rule as to the root being Ātm. may not be binding). Other commentators explain it as the pres. p. of a denom. from शिञ्ज or सिञ्ज a tinkling sound (शिञ्ज इवाचरति, *Cf.* " शिञ्जतेरात्मनेपदित्वात् शानचा (the pres. p. term. आन) भवितव्यम्। अतः शिञ्जदित्यसाधु पदम्। अत्र समाधीयते। शिजि। अव्यक्ते शब्दे। अत एव शिङ्क्ते। पचादित्वादच्। स इव आचरतीति क्विब्लोपे सति परस्मैपदम्। शिञ्जदिति वर्तमाने शतृ।" Sārod. But on this Mādhava remarks : ननु शिञ्जृजम्भादिभ्यः शब्देभ्यः आचारक्विबन्तेभ्यश्च परस्मैपदानि सिध्यन्ति। तत्किमनेन। सत्यं शब्दाः सिध्यन्ति, अर्थास्तु सहृदयहृदयंगमा न भवन्ति। सभ्रूभङ्गकरतललयैः--is another reading for तालैः &c. लय means गीतवाद्यपादन्यासानां क्रियाकालयोः साम्यं, the agreement of musical pauses with those of the beating of a tabor, and the settings of feet. Here करतललयैः has the same meaning as in किसलयैः सलयैरिव पाणिभिः। where Malli. says—सलयैः साभिनयैः। अत्र लयशब्देन तदनुगतोऽभिनयो लक्ष्यते, gesticulations with the hands to mark the musical intervals, कान्तयानर्तितो मे--*Cf.* भ्रमिषु कृतपुटान्तर्मण्डलावृत्ति चक्षुः प्रचलितचतुरभ्रूताण्डवैर्मण्डयन्त्या। करकिसलयतालैर्मुग्धया नर्त्यमानं सुतमिव मनसा त्वां वत्सलेन स्मरामि ॥ Uttar. III. 19. सुहृदः—See *supra* I, 34 notes. The fig. of speech in this and the preceding four ślokas is *Udatta* or the

description of the prosperity or excellence of a thing (as seen by a poet); see Malli.

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथा
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा ।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्यापाये न खलु कमलं पुष्यति स्वामभिख्याम् ।। २० ।।

20 From these signs treasured up in your heart (i. *e*. well-remembered), O discerning one, and on seeing Śankha and Padma whose figures are painted on both the sides of the door, you can make out my house, now, indeed, presenting a gloomy apperaance owing to my absence (*lit*. separation) : verily the lotus retains not its beauty on the disappearance of the sun.

एभिरिति ।। हे साधो निपुण । 'साधुः समर्थो निपुणो वा ' इति काशिकायाम् । हृदयनिहितैः । अविस्मृतैरित्यर्थः । एभिः पूर्वोक्तैः लक्षणैः तोरणादिभिरभिज्ञानैः द्वारोपान्ते । एकवचनमविवक्षितम् द्वारपार्श्वयोरित्यर्थः । [लिखितवपुषौ] लिखिते वपुषी आकृती ययोस्तौ तथोक्तौ शङ्खपद्मौ नाम निधिविशेषौ । 'निधिर्ना शेवधिर्भेदाः । पद्मशङ्खादयो निधेः ' इत्यमरः । दृष्ट्वा च नूनं सत्यम् अधुना इदानीम् । 'अधुना ' इति निपातः । मद्वियोगेन मम प्रवासेन क्षामच्छायं मन्दच्छायमुत्सवोपरमात्क्षीणकान्ति भवनं मद्गृहं लक्षयेथाः निश्चिनुयाः । तथा हि । सूर्यापाये सति कमलं पद्मं स्वाम् आत्मीयाम् अभिख्यां शोभाम् । 'अभिख्या नामशोभयोः ' इत्यमरः । न पुष्यति नोपचिनोति खलु । सूर्यविरहितं पद्ममिव पतिविरहितं गृहं न शोभत इत्यर्थः ।।

Śl. 20. एभिः लक्षणैः—*viz*. those mentioned in ślokas 15-19 the archway (तोरण), the Vāpi &c. साधो–साधु a good man; hence here, 'clever, skilful in discerning.' द्वारोपान्ते–On either side of the door-gate. Here the sing. is not to be laid stress upon; it is used for the dual; see com. लिखित०–Their forms were painted there as auspicious marks that would ensure prosperity. 'तौ हि अधोभागे पुरुषरूपौ गृहद्वारशाखासु मङ्गलार्थमालिख्येते । Sārod. शङ्खपद्मौ–Two of the nine treasures or Nidhis of Kubera, which are thus enumerated–महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ । मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव ।। Sabdārṇava, which gives the same enumeration, has the first line as पद्मोऽस्त्रियां महापद्मः &c. some substitute नन्द for कुन्द (see Wilson). "Some of the words bear the meanings of precious or holy things....We may translate almost

१ लक्षणीयम्. २ मन्दच्छायम्.

all into things, thus, a lotus, a large lotus, a shell....Agreeably to the system of the Tântrikas the Nidhis are personified, and upon certain occasions, as the worship of Lakshmi, the goddess of prosperity &c., come in for a share of religious veneration. They have also their peculiar *Mantras* or mystical verses. "—Wilson. **क्षामच्छायं**–क्षाम *p. p. p.* of क्षै. with its outer beauty gone, gloomy looking. **मन्दच्छायं** *v. l.*— *lit.* with its appearance dimmed; it means the same thing. **कमलं**—*i. e.* पद्म, the pay-lotus. **अपाय** passing out of sight, setting. **अभिख्यां पुष्यति** अभिख्या means 'beauty' (all round). *Cf.* वपुरभिनवमस्याः पुष्यति स्वां न शोभाम् । Śâk. I. (Śl. read before 18). कामप्यभिख्यां स्फुरितैरपुष्यदासन्नलावण्यफलोधरोष्ठ । Kum. VII. 18.

निजगृहनिश्चयानन्तरं कृत्यमाह—

गत्वा सद्यः कलभतनुतां [1]शीघ्रसंपातहेतोः
क्रीडाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्तुमल्पाल्पभासं
खद्योतालीवि[2]लसितनिभां विद्युदुन्मेषदृष्टिम् ।। २१ ।।

21. Reduced at once to the smallness of form of a young elephant, you should descend quickly, and seated on the aforesaid pleasure-mountain having a beautiful summit, you will please cast in the interior of the house your glance in the form of the flash of lightning of a very mild brilliancy, resembling the glitter of a row of fire-flies.

गत्वेति ।। हे मेघ । [**शीघ्रसंपातहेतोः**] शीघ्रसंपात एव हेतुस्तस्य । शीघ्रप्रवेशार्थमित्यर्थः ।। 'षष्ठी हेतुप्रयोगे इति षष्ठी । 'संपातः पतने वेगे प्रवेशे वेदसंविदे ' इति शब्दार्णवे । **सद्यः** सपदि [**कलभतनुतां**] कलभस्य करिपोतस्य तनुरिव तनुर्यस्य तस्य भावस्तामल्पशरीरतां **गत्वा** प्राप्य **प्रथमकथिते** 'तस्यास्तीरे' इत्यादिना पूर्वोद्दिष्टे **रम्यसानौ** । निषीदनयोग्य इत्यर्थः । **क्रीडाशैले निषण्णः** उपविष्टः सन् । [**अल्पाल्पभासम्**] अल्पा अल्पप्रकारा भाः प्रकाशो यस्यास्ताम् 'प्रकारे गुणवचनस्य ' इति द्विरुक्तिः । [**खद्योतालीविलसितनिभां**] खद्योतानामाली तस्या विलसितेन स्फुरितेन निभां समानां [**विद्युदुन्मेषदृष्टिम्**] विद्युदुन्मेषो विद्युत्प्रकाशः स एव दृष्टिस्तां [**अन्तर्भवनपतितां**] भवनस्यान्तरन्तर्भवनं तत्र पतितां प्रविष्टां **कर्तुम् अर्हसि** । यथा कश्चित्किंचिदन्विष्यन्क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिमिष्टदेशे पातयति तद्वदित्यर्थः ।।

---

१ तत्परित्राण. २ विलसन.

Śl. 21. कलभतनुतां—To the state of having the size of; see Com.; or कलभस्य तनुतां लघुतां the smallness of form or bulk of a young elephant; *i. e.* becoming as small as शीघ्रसंपात०—Malli. takes संपात in the sense of 'entrance', but it rather means 'descent' 'that you should descend quickly'. It is a well-known principle that a body when compressed into smaller dimensions becomes more compact and descends more rapidly than before. तत्परित्राणहेतोः—*v. l.*—Here तत् refers to the Yaksha's wife. रम्यसानौ—रम्याणि सानूनि or रम्याः सानवः यस्य तस्मिन्. This is put to show that it will be pleasant to sit there. कर्तुमर्हसि—अर्ह् is used with the *inf.* of a root to express a courteoaus request as here as a mild form of command &c.; you will kindly do, you will be pleesed to do. *Cf.* नार्हसि मे प्रणयं विहंतुं Ragh. II. 58; तं संतः श्रोतुमर्हन्ति *Ibid* I. 10. अन्तर्भवन-the inner part or interior of the house. अल्पाल्पभासं-*fem.*; अल्प is repeated to show प्रकार or resemblance (to the light of the glow-worm; see *supra*, note on मंदं मंदं I. 10) and also means 'very little', *i. e.* faint (not dazzling). खद्योताली०—खे द्योतते असौ खद्योतः fr. द्युत् + अ (अच्); or खं द्योतयति. with अण् (अ); a fire-fly. with ०निभां—Words like निभ, संकाश &c. express resemblance when forming the latter parts of compounds; as पित्रा सदृशः पितृनिभः पुत्रः; *cf.* स्युरुत्तरपदे त्वमि। निभसंकाशनीकाशप्रतीकाशोपमादयः। Amara. So the Comp. here should rather be dissolved as विलसितेन सदृशी, ०विलसितनिभा, being a Nitya Comp. विद्युदुन्मेष—विद्युत उन्मेषः see com. "The fire-fly presents a very beautiful appearance, as its soft and twinkling light is contrasted with the deep shade of the bushes in which it may be seen in great numbers during the wet season. The phenomenon is common to the East and the West Indies."—Wilson

संप्रति दृष्टिपातफलस्याभिज्ञानं श्लोकद्वयेनाह—

तन्वी श्यामा शिखरिदशना[1] पक्वबिम्बाधरोष्ठी[2]
मध्ये क्षामा[3] चकितहरिणीप्रेक्षणा निम्ननाभिः।
श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये[4][5] सृष्टिराद्येव[6] धातुः ॥ २२ ॥

deep navel — a beauty of a woman described

22. The lady, who will be found there, slender-framed, youthful, with pointed teeth and her lower lip resembling a ripe

१ शिखरद०; अशिखरद०. २ धरौष्ठी. ३ क्षीणा. ४ आस्ते. ५ विषया. ६ आद्येव.

bimba fruit, thin in the middle (waist), possessed of eyes like those of a frightened doe, having a deep navel, of a gait slow on account of the weight of her hips, slightly stooping on account of her breasts and the first creation, as it were, of the Creator in the department of woman-kind.

तन्वीति ।। **तन्वी** कृशाङ्गा । न तु पीवरी । 'श्लक्ष्णं दभ्रं कृशं तनु ' इत्यमरः । 'वोतो गुणवचनात् ' इति ङीप् **श्यामा** युवतिः । 'श्यामा यौवनमध्यस्था ' इत्युत्पलमालायाम् [**शिखरिदशना**] शिखराण्येषां सन्तीति शिखरिणः कोटिमन्तः । 'शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु । ' इति विश्वः । शिखरिणो दशना दन्ता यस्याः सा । एतेनास्या भाग्यवत्त्वं पत्यायुष्करत्वं च सूच्यते । तदुक्तं सामुद्रिके— 'स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वम् ।। ' 'ताम्बूलरसरक्तेऽपि स्फुटभासः समोदयाः । दन्ताः शिखरिणो यस्या दीर्घं जीवति तत्प्रियः ।। ' इति । पक्वं परिणतं बिम्बं बिम्बिकाफलमिवाधरोष्ठो यस्याः सा **पक्वबिम्बाधरोष्ठी** । 'शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । ' इति वामनः । 'नासिकोदरौष्ठ–' इत्यादिना ङीप् । **मध्ये क्षामा** कृशोदरीत्यर्थः [**चकितहरिणीप्रेक्षणा**] चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता । एतेनास्याः पद्मिनीत्वं व्यज्यते । तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे— 'चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे । ' इति **निम्ननाभिः** गम्भीरनाभिः । अनेन नारीणां नाभिगाम्भीर्यान्मदनातिरेक इति । कामसूत्रार्थः सूच्यते । **श्रोणीभारात् अलसगमना** मन्दगामिनी । न तु जघनदोषात् । **स्तनाभ्यां स्तोकनम्रा** ईषदवनता । न तु वपुर्दोषात् । युवतय एव विषयस्तस्मिन् **युवतिविषये** । युवतीरधिकृत्येत्यर्थः । **धातुः** ब्रह्मणः **आद्या सृष्टिः** प्रथमशिल्पम् **इव** स्थितेत्युत्प्रेक्षा प्रथमनिर्मिता युवतिरियमेवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्याद्यविशेषणम् । तथा चास्मिन्प्रपञ्चे न कुत्राप्येवंविधं रामणीयकं रमणीरत्नमस्तीति भावः । तदेवंभूता **या स्त्री तत्र** अन्तर्भवने **स्यात्** । तत्र निवसेदित्यर्थः । तामित्युत्तरश्लोकेन संबन्धः ।।

Sl. 22. **श्यामा**—अप्रसूता (—one who has not given birth to a child yet) भवेत् श्यामा तन्वी च नवयौवना. *Cf.* also अप्रसूता भवेच्छ्यामा श्यामा षोडशवार्षिकी । श्यामा च श्यामवर्णा च श्यामा मधुरभाषिणी ।। **शिखरिदशना** *v. l.* **अशिखरिद॰** अविषमदशना इत्यर्थः । अथ च शिखरं पक्वदाडिमबीजाकारं माणिक्यं तद्वदुज्ज्वलतया दशना दन्ता यस्याः सा इत्यधरोष्ठरागित्वम् । Sārod **पक्वबिम्ब॰**—By बिम्ब we are to understand बिम्बफलः, so this is a Madhyamapadalopi Comp., see com., see *supra* śl. 7. **चकितहरिणी॰** —चकित affrighted, bewildered (when the pupils of the eyes are moved with increased rapidity), *cf.* त्रस्तैकहायनकुरङ्गविलोलदृष्टेः ।

Uttar. III. 28. निम्ननाभिः—निम्ना depressed, deep नाभिर्यस्याः सा. श्रोणीभारात्...श्रोण्याः of the hips भारात् (and not on account of any physical defect in the thighs). अलसगमना—The idea is common enough with Sanskrit poets, *cf.* यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव Śâk. II. 2, सा कान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयम् Amara. 34. स्तोकनम्रा—स्तोकं a little नम्रा bent down (on account of the heaviness of the breasts, which is often referred to as a mark of beauty in Sanskrit literature): *Cf.* आवर्जिता किंचिदिव स्तनाभ्यां &c. Kum. III. 54, मुहुः स्तनभरेणानीयता नम्रताम् । Ratn. I. 1. या—The antecedent is in the next śloka (तां). युवतिविषये—as regards the creation of women. युवतिविषया: *v. l.*– युवतिर्विषयो यस्याः सा; (the सृष्टि) which had for its object a woman, *i. e.* she was created before any other woman (to serve as a model). सृष्टिराद्येव—The first creation as it were, *i. e.* the best of all beauties, the implication is the Creator must have spent all his skill on her creation and hence her unsurpassed loveliness, see com. *Cf.* for the same idea differently expressed स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे । Śâk. II. 2. Wilson quotes the following from Milton describing Eve—
" Oh, Fairest of creation ! last and best of all God's works—Paradise Lost, Bk. IX. 896.

तां जानीथाः[1] परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम् ।
गाढोत्कण्ठां[2] गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां[3] पद्मिनीं वाऽन्यरूपाम् ॥ २३ ॥

23. You should know that lady, reserved in speech and lovely; I, her companion, being far away, to be my second life (wife), like a solitary female Chakravāka when isolated from her mate : I think that young lady, filled with deep longing (or, whose mental anguish is great) is changed in appearance while these heavy (painful owing to separation) days are passing, like a lotus plant struck down by winter (cold).

harassed by frost

तामिति ॥ सहचरे सहचारिणि । अनेन वियोगासहिष्णुत्वं व्यज्यते । मयि दूरीभूते दूरस्थिते सति । सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूम् । इव ॥ ' जातेरस्त्रीविषयादयोपधात् ' इति ङीष् ॥ परिमितकथां परिमितवाचम् ।

१ जानीयाः २ ०ण्ठागुरुषु, ०त्कण्ठा...बाला जाता...मथिता पद्मिनी वान्यरूपा, इति पाठा० ३ तुहिन.

bimba fruit, thin in the middle (waist), possessed of eyes like those of a frightened doe, having a deep navel, of a gait slow on account of the weight of her hips, slightly stooping on account of her breasts and the first creation, as it were, of the Creator in the department of woman-kind.

तन्वीति ॥ **तन्वी** कृशाङ्गा । न तु पीवरी । 'श्लक्ष्णं दभ्रं कृशं तनु ' इत्यमरः । 'वोतो गुणवचनात् ' इति ङीप् **श्यामा** युवतिः । 'श्यामा यौवनमध्यस्था ' इत्युत्पलमालायाम् [**शिखरिदशना**] शिखराण्येषां सन्तीति शिखरिणः कोटिमन्तः । 'शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु । ' इति विश्वः । शिखरिणो दशना दन्ता यस्याः सा । एतेनास्या भाग्यवत्त्वं पत्यायुष्करत्वं च सूच्यते । तदुक्तं सामुद्रिके—' स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासां तासां पादे जगत्सर्वम् ॥ ' 'ताम्बूलरसरक्तेऽपि स्फुटभासः समोदयाः । दन्ताः शिखरिणो यस्या दीर्घं जीवति तत्प्रियः ॥ ' इति । पक्वं परिणतं बिम्बं बिम्बिकाफलमिवाधरोष्ठो यस्याः सा **पक्वबिम्बाधरोष्ठी** । 'शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । ' इति वामनः । 'नासिकोदरौष्ठ–' इत्यादिना ङीप् । **मध्ये क्षामा** कृशोदरीत्यर्थः [**चकितहरिणीप्रेक्षणा**] चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि दृष्टयो यस्याः सा तथोक्ता । एतेनास्याः पद्मिनीत्वं व्यज्यते । तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे—'चकितमृगदृशाभे प्रान्तरक्ते च नेत्रे । ' इति **निम्ननाभिः** गम्भीरनाभिः । अनेन नारीणां नाभिगाम्भीर्यान्मिदनातिरेक इति । कामसूत्रार्थः सूच्यते । **श्रोणीभारात् अलसगमना** मन्दगामिनी । न तु जघनदोषात् । **स्तनाभ्यां स्तोकनम्रा** ईषदवनता । न तु वपुर्दोषात् । युवतय एव विषयस्तस्मिन् **युवतिविषये** । युवतीरधिकृत्येत्यर्थः । **धातुः** ब्रह्मणः **आद्या सृष्टिः** प्रथमशिल्पम् **इव** स्थितेत्युत्प्रेक्षा प्रथमनिर्मिता युवतिरियमेवेत्यर्थः प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशाच्छिल्पनिर्माणसौष्ठवं दृश्यत इत्याद्यविशेषणम् । तथा चास्मिन्प्रपञ्चे न कुत्राप्येवंविधं रामणीयकं रमणीरत्नमस्तीति भावः । तदेवंभूता **या स्त्री तत्र** अन्तर्भवने **स्यात्** । तत्र निवसेदित्यर्थः । तामित्युत्तरश्लोकेन संबन्धः ॥

Sl. 22. **श्यामा**—अप्रसूता (—one who has not given birth to a child yet) भवेत् श्यामा तन्वी च नवयौवना. *Cf.* also अप्रसूता भवेच्छ्यामा श्यामा षोडशवार्षिकी । श्यामा च श्यामवर्णा च श्यामा मधुरभाषिणी ॥. **शिखरिदशना** *v. l.* अशिखरिद० अविषमदशना इत्यर्थः । अथ च शिखरं पक्वदाडिमबीजाकारं माणिक्यं तद्वदुज्ज्वलतया दशना दन्ता यस्याः सा इत्यधरौष्ठरागित्वम् । Sārod **पक्वबिम्ब**०—By बिम्ब we are to understand बिम्बफलः, so this is a Madhyamapadalopi Comp., see com., see *supra* śl. 7. **चकितहरिणी**० —चकित affrighted, bewildered (when the pupils of the eyes are moved with increased rapidity), *cf.* त्रस्तैकहायनकुरङ्गविलोलदृष्टेः ।

Uttar. III. 28. निम्ननाभिः—निम्ना depressed, deep नाभिर्यस्याः सा. श्रोणीभारात्...श्रोण्याः of the hips भारात् (and not on account of any physical defect in the thighs). अलसगमना—The idea is common enough with Sanskrit poets, *cf.* यातं यच्च नितम्बयोर्गुरुतया मन्दं विलासादिव Śâk. II. 2, सा कान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयम् Amara. 34. स्तोकनम्रा—स्तोकं a little नम्रा bent down (on account of the heaviness of the breasts, which is often referred to as a mark of beauty in Sanskrit literature): *Cf.* आवर्जिता किंचिदिव स्तनाभ्यां &c. Kum. III. 54, मुहुः स्तनभरेणानीयता नम्रताम्। Ratn. I. 1. या—The antecedent is in the next śloka (तां). युवतिविषये—as regards the creation of women. युवतिविषया: *v. l.*– युवतिर्विषयो यस्याः सा; (the सृष्टि) which had for its object a woman, *i. e.* she was created before any other woman (to serve as a model). सृष्टिराद्येव—The first creation as it were, *i. e.* the best of all beauties, the implication is the Creator must have spent all his skill on her creation and hence her unsurpassed loveliness, see com. *Cf.* for the same idea differently expressed स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे। Śâk. 11. 2. Wilson quotes the following from Milton describing Eve— " Oh, Fairest of creation ! last and best of all God's works—Paradise Lost, Bk. IX. 896.

तां जानीथाः[1] परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां[2] गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये [3]शिशिरमथितां पद्मिनीं वाऽन्यरूपाम् ॥ २३ ॥

23. You should know that lady, reserved in speech and lovely; I, her companion, being far away, to be my second life (wife), like a solitary female Chakravāka when isolated from her mate : I think that young lady, filled with deep longing (or, whose mental anguish is great) is changed in appearance while these heavy (painful owing to separation) days are passing, like a lotus plant struck down by winter (cold).

harassed by frost.

तामिति ॥ सहचरे सहचारिणि। अनेन वियोगासहिष्णुत्वं व्यज्यते। मयि दूरीभूते दूरस्थिते सति। सहचरे चक्रवाके दूरीभूते सति चक्रवाकीं चक्रवाकवधूम् इव ॥ 'जातेरस्त्रीविषयादयोपधात्' इति ङीष् ॥ परिमितकथां परिमितवाचम्।

१ जानीयाः २ ०ण्ठागुरुषु, ०त्कण्ठा...बाला जाता...मथिता पद्मिनी वान्यरूपा, इति पाठा० ३ तुहिन.

एकाम् एकाकिनीं स्थितां **ताम्** अन्तर्भवनगतां **मे द्वितीयं जीवितं जानीथाः**। जीवित-तुल्या मत्प्रेयसीमवगच्छेरित्यर्थः। 'तन्वी' इत्यादिसर्वलक्षणैरिति शेषः॥ लक्षणा-नामन्यथाभावभ्रममाशङ्क्याह — गाढेति॥ **गाढोत्कण्ठां** प्रबलविरहवेदनाम्। 'रागे त्वलब्धविषये वेदना महती तु या। संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः॥' इत्यभिधानात्। **बालां गुरुषु** विरहमत्सु एषु वर्तमानेषु **दिवसेषु गच्छत्सु** सत्सु [शिशिरमथितां] शिशिरेण शिशिरकालेन मथितां **पद्मिनीं वा** पद्मिनीमिव। 'इवद्वायथाशब्दौ' इति दण्डी। **अन्यरूपां** पूर्वविपरीताकारां **जातां मन्ये**। हिमहत-पद्मिनीव विरहेणान्यादृशी जातेति तर्कयामीत्यर्थः। एतावता नेयमन्येति भ्रमित-व्यमिति भावः॥

Śl. 23. **परिमितकथां**—परिमिता कथा यस्याः; of measured speech, *i. e.* not talking much (as a Pativratā, being separated from me), A Pativratā. when her husband is absent from home, is not to put on ornaments or fine and clean garments, to attend to personal decoration, to frequent society, &c., *cf.* क्रीडां शरीरसंस्कारं समाजोत्सव-दर्शनम्। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका॥ Yāj.–S. I 84. **जीवितं मे द्वितीयं** *i. e.* his wife. *Cf.* त्वं जीवितं त्वमसि मे हृदयं द्वितीयम् Uttar. III. 16., अत्यायतं नयनयोर्मम जीवितमेतदायाति। Mālav. III. 7. **चक्रवाकीं**—The Chakravāka is the ruddy goose. These birds are described as moving in pairs during the day but are separated during the night and calling out to each other by standing on the opposite banks of a stream or a tank or the lake. The Chakravākas were doomed for ever to nocturnal separation for having offended some saint, according to another account, for having laughed at Rāma when weeping in his separation from Sītā. See our note on रामशापग्रस्ता-नीव चक्रनाम्नां मिथुनानि Kād. p. 46. They are represented in Sanskrit poetry as types of constancy and connubial affection (रथाङ्ग-नाम्नोरिव भावबन्धनं III. 24). *Cf.* सरसि नलिनीपत्रेणापि त्वमावृताविग्रहां ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः Vik. IV. 20, एषाऽपि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्। Śāk. IV. 16. also दयिता द्वंद्वचरं पतत्त्रिणम् Ragh. VIII. 56. **गाढोत्कण्ठां**—गाढा उत्कण्ठा pain of mind यस्याः उत्कण्ठा is defined as "the great uneasiness of mind caused by love being not gratified (by postponement of marriage, separation &c)., see com., hence ardent longing, and then, great anxiety. गाढोत्कण्ठा ललितलुलितैरङ्गकैस्ताम्यतीति। Māl. Mādh. I. 15. **गुरुषु**—गुरु may mean 'unbearable, (see Malli. on I. 1. (*svpra*) heavy with pain of mind, or long. *i. e.* tediously owing to separation. The reading **गाढोत्कण्ठागुरुषु** is better, as the गुरुत्व of the days is then directly

accounted for. गच्छत्सु &c.—*i. e.* each day as it passed would tell on her person more and more heavily, with the result that she would be completely changed in form. शिशिरभ०—blighted by winter, *i. e.* its cold; *Cf.* the *Subhāshita* पद्मानां शिशिरो भयम्; or शिशिर may mean 'dew, hoar-frost'; the same as तुहिन (see readings) or हिम, as in हिमसेकविपत्तिरत्र मे नलिनी पूर्वनिदर्शनं मता। Ragh. VIII. 45; and बिभर्षि चाकारमनिर्वृतानां मृणालिनी हैममिवोपरागम्। *Ibid.* XVI. 7; *Cf.* also हेमन्तपद्ममिव निष्प्रभतामुपैति। Mrich IX. 19. वा —Sometimes takes the place of इव; 'उपमायां विकल्पे वा' इत्यमरः. अन्यरूपा—अन्यत् रूपं यस्याः सा changed in form; or अन्यस्या इव रूपं यस्याः सा looking like quite another than herself; *cf.* अन्यादृशी. The meaning is—The cloud should not take her for another woman, even though the aforesaid characteristics might not be found in her.

> नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियाया[1]
> निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।
> [2]हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
> दिन्दोर्दैन्यं [3]त्वदनुसरणक्लिष्टकान्तेर्बिभर्ति ॥ २४ ॥

24. Surely (*or*, I think) the face of that my beloved, resting on her hand, having its eyes swollen by excessive weeping, with its lower lip changed in colour on account of the warmth of her sighs and partially visible owing to her hair hanging loosely about it, bears the miserable appearance of the moon whose light is obscured by your interruption.

नूनमिति ॥ [प्रबलरुदितोच्छूननेत्रं] प्रबलरुदितेनोच्छूने उच्छ्वसिते नेत्रे यस्य तत्। उच्छूनेति श्वयतेः कर्तरि क्तः। 'ओदितश्च' इति निष्ठानत्वम्। 'वचिस्वपि–' इत्यादिना संप्रसारणम् 'संप्रसारणाच्च' इति पूर्वरूपत्वम्। 'हलः' इति दीर्घः। 'च्छ्वोः शुडनुनासिके च' इति (ऊठ्) आदेशे कृते [4]रूपसिद्धिरिति वर्तमाना सामीप्यप्रक्रिया प्रामादिकीत्युत्प्रेक्षा। तमा सति धातोरिकारस्य गत्यभावादूडादेशे च्छ्वोरन्त्यत्वेन विशेषणाच्चेति। एतेन विषादो व्यज्यते। निःश्वासानां अशिशिरतया अन्तस्तापोष्णत्वेन [भिन्नवर्णाधरोष्ठं] भिन्नवर्णो विच्छायोऽधरोष्ठो यस्य तत्। हस्ते न्यस्तं हस्तन्यस्तम्। एतेन चिन्ता व्यज्यते। लम्बालकत्वात् संस्काराभावाल्लम्बमानकुन्तलत्वाद् असकलव्यक्ति असंपूर्णाभिव्यक्ति तस्याः प्रियायाः मुखं [त्वदनुसरणक्लिष्टकालान्तेः] त्वदनुसरणेन त्वदुपरोधेन। मेघानुसरणेनेति यावत्।

---

१ बहूनाम्. २ हस्ते न्यस्तम्. ३ त्वदुपसरण. ४ रूपसिद्धिरितिना तथोक्ता प्रक्रिया प्रामादिकीत्युपेक्षणीया। तथा धातोरिकारस्य गत्यभावान्मृग्यतामूडादेशः। ऊडादेशे वा को विशेषः। इ. पा.

क्लिष्टकान्तेः क्षीणकान्तेः इन्दोः दैन्यम् शोच्यतां बिभर्ति नूनम् इति वितर्के । 'नूनं तर्केऽर्थनिश्चये' इत्यमरः । पूर्ववत् तथाऽपि न भ्रमितव्यमिति भावः ॥

Śl. 24. नूनं–Malli. takes this in the sense of वितर्के (I think very probably); but it may also be taken to mean 'surely.' The Yaksha may be supposed to speak confidently of the effect of the separation on his wife. प्रबलरुदित–excessive weeping. उच्छून–'swollen;' *p. p. p.* of श्वि with उद् having an active sense; the व of श्वि takes Samprasâraṇa before न and we get शून. *Cf.* अनवरतरुदितोच्छूनताम्रदृष्टि, Dasak. IV. Malli. here refutes the view of some commentator that the form शून can be obtained more readily by the Sūtra 'च्छ्वोः' &c. (Pāṇ VI, 19) than by changing the व to उ, then lengthening it, and so on. (The meaning of the Sūtra is not given here, as the discussion is unimportant to students). Malli. says—this procedure should be given up, being faulty. For the Sūtra requires the व् to be final; and how can you get rid of the final इ of श्वि? So the Sūtra does not apply to the present case. प्रियायाः––बहूनां *v. l.* goes with निःश्वासानां; but the former is preferable, since the word प्रिया is necessary to account for the Yaksha's contemplating such a possibility. अशिशिर–not cold, *i. e.* hot; mark the meaning of the negative particle which means 'opposition' (विरोध) here; the opposite of cold. *Cf.* सित, असित &c. भिन्नवर्णा०––On account of the hot breath the red colour of the lower lip was changed (darkened). हस्तन्यस्तं–this is a sign of sorrow and anxiety. Women in a pensive mood sit with their head reclined on their hand. *Cf.* अनसूये पश्य तावत् वामहस्तोपहितवदनाऽऽलिखितेव प्रियसखी । भर्तृगतया चिन्तया &c. Śâk. IV. लम्बालकत्वात्—As she was a प्रोषितभर्तृका, she did not comb or dress her hair, and so it hung down loosely, partially covering her face. त्वदनुसरण० &c,––क्लिष्ट *lit.* oppressed (पीडित); hence 'obscured'; *cf.* हिमक्लिष्टप्रकाशानि ज्योतींषीव मुखानि वः । Kum. II. 19. Here her face is compared to the moon, and her hair hanging about it to a cloud.

सर्वविरहिणीसाधारणानि लक्षणानि संभावनयोत्प्रेक्ष्याणीत्याह 'आलोके' इत्यादिभिस्त्रिभिः—

आलोके ते निपतति [1]पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरह[2]तनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुर[3]वचनां सारिकां पञ्जरस्थां
कच्चिद्भर्तुः स्मरसि [4]रसिके त्वं हि तस्य प्रियेति ॥ २५ ॥

१ पुरे २ [illegible] ३ [illegible] ४ निभृते

25. She will meet your sight (will be seen by you) either engaged in performing worship (for the propitiation of the deities) or painting the likeness of me emaciated by separation and perceivable (pictured) by imagination, or asking the sweet-voiced Sārika, confined in the cage—"O sweet-natured one, dost thou remember thy master ?—for thou wast his favourite.

आलोक इति ।। हे मेघ सा मत्प्रिया। [बलिव्याकुला] बलिषु नित्येषु प्रोषितागमनार्थेषु च देवताराधनेषु व्याकुला व्यापृता वा [विरहतनु] विरहेण तनु कृशं भावगम्यम्। तत्कार्श्यस्यादृष्टचरत्वात्संप्रति संभावनयोत्प्रेक्ष्यमित्यर्थः । मत्सादृश्यं । मदाकारसाम्यम् । मत्प्रतिकृतिमित्यर्थः । यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतमाकारसाम्यं तथाऽपि प्रतिकृतित्वेन विवक्षितमितरथालेख्यत्वासंभवात् । अक्षय्यकोशे 'आलेख्येऽपि च सादृश्यम्' इत्यभिधानात् । लिखन्ती क्वचित्फलकादौ विन्यस्यन्ती वा । चित्रदर्शनस्य विरहिणीविनोदोपायत्वादिति भावः । एतच्च कामशास्त्रसंवादेन सम्यग्विवेचितमस्माभी रघुवंशसंजीविन्याम् 'सादृश्यप्रतिकृतिदर्शनैः प्रियायाः' इत्यत्र । मधुरवचनां मञ्जुभाषिणीम् । अत एव पञ्जरस्थाम् । हिंस्रेभ्यः कृतसंरक्षणामित्यर्थः । सारिकां स्त्रीपक्षिविशेषाम् । हे रसिके भर्तुः स्वामिनः स्मरसि कच्चित् 'कच्चित्कामप्रवेदने' इत्यमरः । भर्तारं स्मरसि किमित्यर्थः । अधीगर्थदयेशां कर्मणि इति कर्मणि षष्ठी । स्मरणे कारणमाह--हि यस्मात्कारणात् त्वं तस्य भर्तुः । प्रीणातीति प्रिया । 'इगुपधज्ञाप्रीकिरः कः' इति कप्रत्ययः । अतः प्रेमास्पदत्वात्स्मर्तुमर्हसीति भावः । इति एवं पृच्छन्ती वा । वाशब्दो विकल्पे । 'उपमायां विकल्पे वा' इत्यमरः । ते तव आलोके दृष्टिपथे पुरा निपतति । सद्यो निपतिष्यतीत्यर्थः 'स्यात्प्रबन्धे पुरातीते निकटागामिके पुरा ।' इत्यमरः । 'यावत्पुरानिपातयोर्लट्' इति लट् ।।

Śl. 25. निपतति पुरा--पुरा 'shortly;' see com. A form of the Pres. tense, with the particles यावत् and पुरा, has the sense of the Future; see com. पुरे *v. l.*—means 'in that city.' बलिव्याकुला–बलि here means 'the offering of worship to deities for their propitiation.' It is of two kinds, नित्य-obligatory on a woman (*e. g.* that of the sacred plant *Tulasi* &c.) and नैमित्तिक–for the attainment of some object in view. See com. व्याकुला—deeply engaged in. सादृश्य---likeness, picture. भावगम्यं—-to be known by imagination or the mind (as she had not the power to see the Yaksha with her eyes). लिखन्ती–लिख् properly means 'to write letters, (अक्षरविन्यास); but it is often used, generally with आ, in the sense of 'to draw a likeness of'; *cf.* आलेख्य a picture; Love-lorn persons are represented by Sanskrit poets as diverting themselves by drawing pictures of their beloved. मधुरवचनं–*v. l.*, *adv.* modifying

पृच्छन्ती (मधुरं वचनं यस्मिन्कर्मणि तद्यथा तथा); in sweet words. सारिकां— A bird known as *Mainā* (a canary). Some suppose it to be a female parrot. A parrot and a Sārikā are often associated together in Sanskrit works; *e.g.* in Subandhu's Vāsavadattā, Bāna's Kādambari &c. "The Sārikā is a small bird, better known by the name of *Mainā*. It is represented as a female, while the parrot is described as a male bird; and as these two have, in all Hindu tales, the faculty of human speech, they are constantly introdued, the one inveighing against the faults of the male sex, and the other exposing the defects of the female. Ladies have always been distinguished for maintaining pet animals; and the fancy seems to have been equally prevalent in the East and West, and in ancient or modern times."—Wilson. भर्तुः स्मरसि—Mark the use of the Gen. with स्मृ; it is used for the Acc. when the remembrance is accompanied by sorrow or regret; see com. 'Do you remember him longing for his company or anxious for his return.' रसिके— For. you are able to appreciate merits or wit, to enjoy company &c. निभृते *v. l.*—means 'modest,' not over-talkative. The fig. of speech in this verse (according to Sārod,) is *Dīpaka*, which is thus defined--जातिक्रियागुणद्रव्यवाचिनैकत्र वर्तिना। सर्ववाक्योपकारश्चेत् तमाहुर्दीपकं बुधाः ॥ Kāvyā. II. 97.

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
[2]तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथंचि-
द्भूयो भूयः स्वयमपि[3] कृतां मूर्च्छनां विस्मरन्ती ॥ २६ ॥

26. Or, desirous of singing aloud, O good one, a song, the words of which are so arranged as to contain my name, after having placed a lute (Viṇā) on her lap covered with a dirty garment, and somehow tuned the strings wet with the water of her eyes (tears), but again and again forgetting the *Mūrchchhanā* (melody) although thought out by herself.

उत्सङ्ग इति ॥ हे सौम्य साधो मलिनवसने। 'प्रोषिते मलिना कृशा' इति शास्त्रादित्यर्थः ॥ उत्सङ्गे उरौ वीणां निक्षिप्य। मम गोत्रं नामाङ्कश्चिह्नं यस्मिंस्तत् मद्गोत्राङ्कं मन्नामाङ्कं यथा तथा। 'गोत्रं नाम्नि कुलेऽपि च' इत्यमरः। [विर-

१ गीतम्. २ तन्त्रीरार्द्रा. ३ अधिकृतां.

चितपदं] विरचितानि पदानि यस्य तत्तथोक्तं गेयं गानार्हं प्रबन्धादि । 'गीतम्' इति पाठे स एवार्थः । [उद्गातुकामा] उद्गातुमुच्चैर्गातुं कामो यस्याः सा । 'तुं काममनसोरपि' इति मकारलोपः ।। देवयोनित्वाद्गान्धारग्रामेण गातुकामेत्यर्थः । तदुक्तम्—'षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। न तु गान्धारनामानं स लभ्यो देवयोनिभिः ।।' इति । तथा नयनसलिलैः प्रियतमस्मृतिजनितैरश्रुभिः आर्द्रां तन्त्रीं कथंचित् कृच्छ्रेण सारयित्वा । आर्द्रत्वापहरणाय करेण प्रमृज्य अन्यथा क्वणनासंभवादिति भावः । भूयो भूयः पुनः पुनः स्वयम् आत्मना कृताम् अपि । विस्मरणानर्हामपीत्यर्थः । मूर्च्छनां स्वरारोहावरोहक्रमम् । 'स्वराणां स्थापनाः सान्ता मूर्च्छनाः सप्त सप्त हि' इति संगीतरत्नाकरे । विस्मरन्ती वा । 'आलोके ते निपतति' इति पूर्वेणान्वयः । विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव । तथा च रसरत्नाकरे—'वियोगायोगयोरिष्टगुणानां कीर्तनास्मृतेः । साक्षात्कारोऽथ वा मूर्च्छा दशधा जायते तथा ।।' इति । मत्सादृश्यमित्यादिना मनःसङ्गानुवृत्तिः सूचिता ।।

Śl. 26. मलिनवसन—मलिनं वसनं यस्मिन् having a dirty garment over it. See *supra*, note on परिमितकथां śl. 28. मद्गोत्राङ्क—marked with my name, *i. e.* containing my name. *adv.* modifying विरचितपदं उद्गातु०—the nasal of the *inf.* is dropped before काम and मनस्. तन्त्री—a string; the Sing. for the Plural, as shown by the reading तन्त्रीरार्द्राः सारयित्वा—Malli. takes this in the sense of 'having rubbed off the moisture on it; having cleaned it.' But it seems better to take it in the sense of 'having given proper tension to it,' *i. e.* adjusted it to the proper tune, put it into the proper tune. Then only will the word कथंचित् ('with difficulty') be appropriate; the mere rubbing off the moisture requires no special effort. मूर्छना—'a duly regulated rise and fall of sounds conducting the air and the harmony through the keys in pleasing manner.' See Apte's Dic. These are 21 in number. *Cf.* सप्तस्वरास्त्रयो ग्रामा मूर्छनाश्चैकविंशतिः । ताना एकोनपञ्चाशदित्येतच्छ्रुतिमण्डलम् ।। Nāradiyi Śikshā. The following is quoted from Mallinātha's com. on Śis. I. 10. for the curious student—श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणात्मकः । स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते ।। श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारमध्यमाः ।। पञ्चमो धैवतश्चाथ निषाद इति सप्त ते ।। तेषां संज्ञाः सरिगमपधनीत्यपरा मताः ।। मूर्छनालक्षणं—क्रमात्स्वराणां सप्तानामारोहश्चावरोहणम् । सा मूर्छेत्युच्यते ग्रामस्था एताः सप्त सप्त च ।।

शेषान्मासान्विरहदिवसस्थापितस्यावधेर्वा
विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः ।
संभोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ २७ ॥

27. Or, arranging on the ground, by counting them, the number of the remaining months of the period (*or*, termination of the curse) fixed from the day of separation, by means of flowers placed on the threshold; or experiencing enjoyment with me, the act of which is conceived by the mind : For these are generally the diversions of women who are separated from their husbands.

शेषानिति ॥ अथ वा (**विरहदिवसस्थापितस्य**) विरहस्य दिवसस्तस्मात्स्थापितस्य तत आरभ्य निश्चितस्य **अवधेः** अन्तस्य **शेषान्** गतावशिष्टान् **मासान्** **देहलीदत्तपुष्पैः** । देहली द्वारस्याधारदारु । ' गृहावग्रहणी देहली ' इत्यमरः । तत्र दत्तानि राशीकृतत्वेन निहितानि यानि पुष्पाणि तैः । **गणनया** एको द्वावित्यादिसंख्यानेन **भुवि** भूतले **विन्यस्यन्ती वा** । पुष्पविन्यासैर्मासान्गणयन्ती वेत्यर्थः यद्वा (**हृदयनिहितारम्भम्**) हृदये निहितो मनसि संकल्पित आरम्भ उपक्रमो यस्य तम् । अथ वा हृदयनिहिता आरम्भाश्चुम्बनादयो व्यापारा यस्मिंस्तं **संभोगं** रतिम् **आस्वादयन्ती वा** । ' आलोके ते निपतति ' इति पूर्वेण संबन्धः । ननु कथमयं निश्चय इत्याशङ्कामर्थान्तरन्यासेन परिहरति । **प्रायेण** बाहुल्येन **अङ्गनानां रमणविरहेषु एते** पूर्वोक्ताः **विनोदाः** कालयापनोपायाः । एतेन संकल्पावस्थोक्ता । तदुक्तम्--' संकल्पो नाथविषये मनोरथ उदाहृतः । ' इति । त्रिभिः कुलकम् ॥

Śl. 27. **विरहदिवस०**—fixed from day of separation, *i. e.* from the day of the Yaksha's departure to Râmagiri. Many commentators read गमन० which means the same thing. **अवधि०**—the period of the duration of the curse. Malli. takes अवधि in the sense of ' the end or the final day on which the curse was to terminate. ' **देहलीदत्त०**—by means of flowers placed on the threshold; *i. e.* she took up a flower and placed it on the ground counting one, two &c. until she came to the proper number. From the explanation of the majority of commentators, the threshold of the front door of a house to have been generally made of Udumbara wood. **देहलीमुक्त०**—*v. l.*—where मुक्त may mean the same thing

---

१ गमन. २ प्रस्थितस्य. ३ मुक्त. ४ मत्सङ्ग, मत्संभोगं, संयोगं वा. ५ रचिता, विहिता. ६ आसादयन्ती. ७ विरहे हि.

as दत्त, or, dropped down from it. हृदयनिहितारम्भ०—Here आरम्भ means the act or operation of, rather than the beginning of. She was enjoying the union pictured by her mind. रमणविरहेषु—*i. e.* whenever there is a separation from their lovers. विरहे ह्यङ्गनानां *v. l.* is better. These three ślokas form what is technically called a विशेषक (*i. e.* three verses syntactically connected). Read विशेषकं instead of कुलकं in the com. *Cf.* द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥.

सव्यापारामहनि न तथा पीडयेद्विप्रयोगः[1] [2]
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते ।
मत्संदेशैः सुखयितुमलं[3] पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां[4] सौधवातायनस्थः ॥ २८ ॥

28. Separation (from me) will not torment your friend as much during day-time, she being engaged (in various duties), as it will, I fear, at night, when her sorrow is heavier, she having nothing to divert her then. Do you, therefore, stationed at the window of the mansion, at midnight see the good lady, sleepless and lying on the ground, that you may comfort her fully with messages from me.*

सव्यापारामिति ॥ हे सखे अहनि दिवसे सव्यापारां पूर्वोक्तवलिचित्रलेखनादिव्यापारवतीं ते सखीं स्वप्रियां विप्रयोगः मद्विरहः तथा तेन प्रकारेण । 'प्रकारवचने थाल्' इति थाल्प्रत्ययः । न पीडयेत् । यथा रात्रौ इति शेषः । किं तु रात्रौ निर्विनोदां निर्व्यापारां ते सखीं गुरुतरा शुग्यस्यास्तां गुरुतरशुचम् अतिदुर्भरदुःखा शङ्के तर्कयामि । 'शङ्का वितर्कभययोः' इति शब्दार्णवे । अतो निशीथे अर्धरात्रे उन्निद्राम् उत्सृष्टनिद्राम् । [अवनिशयनां] अवनिरेव शयनं शय्या यस्यास्ताम् । नियमार्थं स्थण्डिलशायिनीम् । साध्वीं पतिव्रताम् । 'साध्वी पतिव्रता' इत्यमरः । अतो नान्यथा शङ्कितव्यमिति भावः । तां त्वत्सखीं मत्संदेशैः मद्वार्ताभिः अलं पर्याप्तं सुखयितुम् आनन्दयितु सौधवातायनस्थः सन् पश्य सखी धात्री च पितरौ मित्रदूतशुकादयः । सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीम् ॥' इति रत्नाकरे । दूतश्चायं मेघ इति भावः । अनेन जागरावस्थोक्ता ॥

---

१ खेदयेत्. २ मद्वियोगः. ३ अतः. ४ शयनासन्न, शयनां सन्न०. ५ सद्म.

२८-२९ श्लोकयोर्मध्ये प्रक्षिप्ताविमौ दृश्येते—

स्निग्धाः सख्यः कथमपि दिवा तां न मोक्ष्यन्ति तन्वी-
मकप्रख्या भवति हि जगत्यङ्गनानां प्रवृत्तिः ।

Śl. 28. सव्यापारां &c.—engaged in the various duties of the day; *i. e.* in spite of the separation she has to attend to daily duties which makes her forget her longing to some extent. गुरुतर—heavier; this is explained by निर्विनोदां; having nothing to dispel her longing with, she will be more deeply afflicted at night. *Cf.* for a similar idea–कार्यान्तरितोत्कण्ठं दिनं मया नीतमनतिकृच्छ्रेण। अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या॥ Vik. III. 4; एषाऽपि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्। Sā 3. IV. 15. सखीं ते—Notice the use of सखी the wife of the friend may also be spoken of as a friend; *cf.* मेनका किल सख्यास्ते जन्मप्रतिष्ठा। Śāk. VI.; तेन हि सख्यास्ते मार्गमादेशय। Vik. III. सुखयितुं–सुखय a denom. from सुख. अलं–completely, adequately or effectively अतः *v. l.*–is preferable, as it connects the subsequent clause with the antecedent one. साध्वीं—She is Pativratā, and so you can see her at dead of night without apprehension; also, she deserves such a courtesy from you. उन्निद्रां—उत्सृष्टा निद्रा यया तां, who has given up her sleep. She rose from sleep at midnight to lie on the ground, as required by the vow she was performing; see com. अवनिशयनां—This may be in observance of a vow as Malli. says, or on account of the torment caused by separation. सौध—सद्मवा० *v. l.* has the same meaning.

स त्वं रात्रौ जलद शयनासन्नवातायनस्थः
कान्तां सुप्ते सति परिजने वीतनिद्रामुपेयाः॥
अन्वेष्टव्यामवनिशयने संनिकीर्णैकपार्श्वां
तत्पर्यङ्क (न्त) प्रगलितल (न) वैश्छिन्नहारैरिवास्रैः
भूयो भूयः कठिनविषमां सारयन्तीं कपोला-
दामोक्तव्यामयमितनखेनैकवेणीं करेण॥

* Between 28-29, the following ślokas are read by some—

"Affectionate friends will not, under any circumstances, leave the slender-bodied one, during the day; for the behaviour of women in this world is of a uniform nature; you should, therefore, O cloud, wait at the window near her bed and approach my sleepless beloved at night when the servants are asleep."

"(Her) resting on one side on the ground, serving as a bed, and to be found out by means of the drops of tears looking like portions of her broken pearl-necklace dropped about her; and pushing away again and again from her cheek, with her long-naied (*lit.* with nails not cut) hand her single braid, hard and uneven (*or,* rugged) and to be loosened afterwards."

Another reading is अवनिशयनासन्न (near to) वाता० Some read सन्नवाता०, explaining सन्न as निकट. One commentator takes सन्न in the sense of भग्न (see Islāmpurkar's ed.) 'broken' and remarks— This shows that the house was not in a good condition owing to the absence of the Yaksha.

Additional Slokas in the foot-note.

(1) एकप्रख्या–एका of the same nature, प्रख्या behaviour, mode of action (from which a person is known). स त्वं रात्रौ–*i. e.* when you will find her alone and when she will find time hanging heavy on her hands. शयनासन्न०—शयनस्यासन्नं (near to) वातायनं &c. वीतनीद्रां—वीता gone निद्रा यस्यास्ताम्. (2) अन्वेष्टव्यां–Pot. *p. p.* of इष् with अनु: goes with अस्रैः, 'to be found out from' अवनिशयने–अवनिः एव शयनं तस्मिन् संनिकीर्णैक०–संनिकीर्ण cast down. तत्पर्यङ्क-प्रगलित—तस्याः पर्यङ्कात् प्रगलिता लवा येषां तैः—qualifies छिन्नहारैः, 'the pieces of which had dropped down from her bedstead.' As she rose up and walked off from her bedstead, weeping, the drops of tears falling in clusters looked like pieces of her pearl-necklace broken as under. तत्पर्यङ्कप्रगलितलवैः *v. l.*–will qualify अस्रैः, tears the drops of which had fallen round her अवनिशयन, and they looked like broken necklaces. कठिनविषमां &c.—See śl. 32 of the text. आमोक्तव्यां—which was to be loosened, but was not loosened.

पुनस्तामेव विशिनष्टि 'आधिक्षामाम्' इत्यादिभिश्चतुर्भिः—

आधिक्षामां विरहशयने संनिषण्णैकपार्श्वां[1]
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः ।
नीता रात्रिः क्षण[2] इव मया सार्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्[3] ॥ २९ ॥

29. (Her) wasted by mental anguish and lying on one side on her bed of separation and therefore looking like the orb of the moon reduced to a single digit (and resting) on the eastern horizon; and shedding hot tears, passing that very night, prolonged by separation, which was passed like a moment in my company, in enjoyments had according to her wishes.

आधिक्षामामिति । [आधिक्षामां] आधिना मनोव्यथया क्षामां कृशाम् । 'पुंस्याधिर्मानसी व्यथा' इत्यमरः । क्षायतेः करि क्तः । 'क्षायो मः' इति निष्ठात-

१ सांनिकीर्णैक. २ क्षणम्. ३ जनितैः, पतितैः.

कारस्य मकारः । विरहे शयनं तस्मिन् **विरहशयने** । पल्लवादिरचिते इत्यर्थः [**संनिषण्णैकपार्श्वां**] संनिषण्णमेकं पार्श्वं यस्यास्ताम् । अत एव [**प्राचीमूले**] प्राच्याः पूर्वस्या दिशो मूले । उदयगिरिप्रान्त इत्यर्थः । प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम् । मूलग्रहणं दृश्यतार्थम् । [**कलामात्रशेषां**] कलामात्रं कलैव शेषो यस्यास्तां हिमांशोः तनुं मूर्तिं इव स्थिताम् तथा या **रात्रिः मया सार्धम्** [**इच्छारतैः**] इच्छया कृतानि रतानि तैः । शाकपार्थिवादित्वान्मध्यमपदलोपी समासः । **क्षण इव नीता** यापिता **तां** तज्जातीयाम् **एव** रात्रिं [**विरहमहतीम्**] विरहेण महतीं महत्त्वेन प्रतीयमानाम् **उष्णैः अश्रुभिः यापयन्तीम्** । यातेर्ण्यन्ताच्छतृप्रत्ययः । 'अर्तिह्री–' इत्यादिना पुगागमः । स एव कालः सुखिनामल्पः प्रतीयते । दुःखिनां तु विपरीत इति भावः । एतेन कार्श्यावस्थोक्ता ॥

Śl. 29. In the next four verses he describes his wife as the cloud is likely to find her, **व्याधि**–*m.* mental worry, anxiety; *cf.* व्याधि which means bodily ailment. **विरहशयने**––Malli. takes as a Loc. Tat; a bed such as is used in separation; or it may be taken as a Madhyam. Comp. as विरहानुकूलं शयनं विरहश०; a bed suited or appropriate to separation. **संनिष०**––lying or resting on one side alone, *i. e.* not thinking of turning to the other owing to mental abstraction. **प्राचीमूले**—the root of *i. e.* the eastern horizon. **कलामात्र०**––कला एव कलामात्रः now see Com.; this is possible on the 14th day or the dark half of a month. **क्षण इव**–– Many commentators read क्षणमित्र, remarking that the word **क्षण** is sometimes used in the *neu.*, gender, as in क्षणमिव गमितो वासरो वासवेन । *Cf.* for such an effect, अविदितगतयामा रात्रिरेव व्यरंसीत् । Uttar. I. 27. **तामेव**–the same, *i. e.* of the same length. **विरहमहतीं**—long, *i. e.* appearing to be of unusual length owing to separation. *Cf.* अविनोददीर्घयामा &c. Vik. III. 4. already quoted, and अनुपनतमनोरथस्य पूर्वं शतगुणितेव गता मम त्रियामा । *Ibid.* III, 22. **यापयन्तीं**—Pres. *p. fem.* of **या** Cau.

पादानिन्दोरमृतशिशिराञ्जालमार्गप्रविष्टा-
न्पूर्वप्रीत्या गतमभिमुखं संनिवृत्तं तथैव ।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं नप्रबुद्धां नसुप्ताम् ॥ ३० ॥

30. (Her) covering with her eyelashes, heavy with tears caused by sorrow, the eye turned, owing to delight previously felt,

---

१ सजल.

towards the rays of the moon cool with nectar entering through the lattice-holes, but fallen back as quickly; and (thereby) resembling a land-lotus plant, on a cloudy day, (with its lotus) neither opened nor closed up.

पादानिति ॥ जालमार्गप्रविष्टान् गवाक्षविवरगतान् अमृतशिशिरान् इन्दोः पादान् रश्मीन् पूर्वप्रीत्या पूर्वस्नेहेन पूर्ववदानन्दकरा भविष्यन्तीति बुद्ध्येति भावः । अभिमुखं यथा तथा गतं तथैव संनिवृत्तं यथा गतं तथैव प्रतिनिवृत्तम् । तदा तेषामतीव दुःसहत्वादिति भावः चक्षुः दृष्टिं खेदात् सलिलगुरुभिः अश्रुदुर्भरैः पक्ष्मभिः छादयन्तीम् । अत एव साभ्रे दुर्दिने अह्नि दिवसे नप्रबुद्धां मेघावरणादविकसितां नसुप्ताम् अहरित्यमुकुलिताम् उभयत्रापि नञर्थस्य नशब्दस्य सुप्सुपेति समासः । स्थलकमलिनीम् इव स्थिताम् । एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता ॥

Śl. 30 अमृतशिशिरान्—अमृतेन शिशिराःअमृत० तान् cooling on account of the nectar in the moon. The moon is supposed to be the reservoir of अमृत or ambrosia and to supply it to the gods and Pitras or manes. पूर्वप्रीत्या–पूर्वा चासौ प्रीतिस्तया on account of the delight it enjoyed before, *viz.* when she was in the company of the Yaksha. संनिवृत्तं–because the same rays now burnt and pained it. *Cf.* for the opposite effects of the rays of the moon on lovers in union or separation–पादस्त एव शशिनः सुखयन्ति गात्रं । Vik. III. 30; विसृजति हिमगर्भैरग्निन्दुर्मयूखैः Śak. III. 3. खेदात्—goes with सलिल; the tears caused by torment or trouble. स्थलकमलिनीं as the Yaksha's wife was lying on the ground she is compared to a land-lotus-plant. नप्रबुद्धां–one word; see com. ; *i. e.* with its lotus. Which corresponds to the eye, which is neither blown open nor remains closed up.

निःश्वासेना[1]धरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात्परुषमलकं नूनमागण्डलम्ब[2]म् ।
मत्संभोगः[3] कथमुप[4]नमेत्स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीडरुद्धावकाशाम् ॥ ३१ ॥

31. (Her who will be), surely, blowing away with her strong breath (sigh) that affects her shoot-like lower lip, the hair, rough owing to a simple bath (*i. e.* without the application of scented oil &c.) and hanging over her cheeks ; and courting sleep, thinking

१ विश्वासेन. २ लम्बि. ३ संयोगः. ४ सुखमु०; कथमपि. क्षणमपि भवेत उपनयेत्. ५ स्वप्नगोष्ठीविनिद्राम्.

as to how she might get enjoyment with me, even though it be in a dream, its prospect being barred (*lit.* no room being left for it) by the gushing forth of tears in her eyes.

निःश्वासेनेति ।। **शुद्धस्नानात्** तैलादिरहितस्नानात् **पुरुषं** कठिनस्पर्शं **नूनम् आगण्डलम्बम्** । सुप्सुपेति समासः । **अलकं** चूर्णकुन्तलान् । जातावेकवचनम् । [**अधरकिसलयक्लेशिना**] अधरकिसलयं क्लेशयति क्लिश्नातीति वा तेन तथोक्तेन । उष्णेनेत्यर्थः । क्लिश्यतेर्ण्यन्तात्क्लिश्नातेरण्यन्ताद्वा ताच्छील्ये णिनिः । **निःश्वासेन विक्षिपन्तीं** चालयन्तीम् । तथा **स्वप्नजः अपि** स्वप्नावस्थाजन्योऽपि । साक्षात्संभोगासंभवादिति भावः । **मत्संभोगः कथं** केनापि प्रकारेण **उपनमेत्** आगच्छेत् । **इति** आशयेनेति शेषः । इति नैवोक्तार्थत्वादप्रयोगः । 'प्रयोगे चापौनरुक्त्यम्' इत्यालंकारिकाः । प्रार्थनायां लिङ् । [**नयनसलिलोत्पीडरुद्धावकाशां**] नयनसलिलोत्पीडेनाश्रुप्रवृत्त्या रुद्धावकाशामाक्रान्तस्थानाम् । दुर्लभामित्यर्थः । **निद्राम् आकाङ्क्षन्तीम्** । स्नेहातुरत्वादिति भावः । अत्राश्रुविसर्जनेन लज्जात्यागो व्यज्यते ।।

Sl. 31. **अधरकिसलय०** = अधरः किसलय इव अधरकिसलयः Karm.; now see Com.: troubling or oppressing, *i. e.* parching up. **शुद्धस्नानात्** a bath with mere water; *i. e.* without the application of oil ordinary or perfumed, unguents, perfumed power &c. नूनं–goes with विक्षिपन्तीं and आकङ्क्षन्तीं. **मत्संभोगः**—The reading संयोगः of the Pārsvā and many other commentators is better, as it is a union that sleep may be expected to bring about, संभोग being the next step, and as it is the समागम that the poet speaks of elsewhere; *cf.* प्रजागरात्खिलीभूतस्तस्याः स्वप्ने समागमः । VI. 22; कथमुपलभे निद्रां स्वप्ने समागमकारिणीम् । Vik. II. 10. **कथम्**—Here we must supply **अपि**; 'somehow,' by some chance, **उपनयेत्**—Here **नी** must be taken as need intransitively. Or read उपनमेत्. **इति**– with this object' here the word आशयेन is not used, as its sense is expressed by **इति**; see com. **नयनस०**–सलिलस्य उत्पीडः the gushing forth of, excessive flow of. **०वकाशाम्**—अवकाश room; the eyes are supposed to be the seat of sleep. *Cf.* निद्रा चिरेण नयनाभिमुखी बभूव Ragh. V. 64.

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा [1]तां मयोद्वेष्टनीयाम् ।
स्पर्शक्लिष्टाम[3]यमितनखेनासकृत्सारयन्तीं
गण्डा[4]भोगात्कठिनवि[5]षमामेकवेणीं करेण ।। ३२ ।।

१ या, सा. २ उद्वेष्टनीया, उन्मोचनीया. ३ अपमति. ४ गल्ला० ५ विषमात्.

32. (Her) repeatedly pushing aside from her expansive cheeks, with her hand with unpared nails, the hard irregular single braid of hair, causing pain at touch, which was wreathed by me, doing away with (without) a garland on the first day of separation, and which is to be untwisted by me, free from sorrow on the termination of the curse.

आद्य इति ॥ आद्ये विरहदिवसे दाम मालां हित्वा त्यक्त्वा या शिखा बद्धा ग्रथिता शापस्य अन्ते विगलितशुचा वीतशोकेन मया उद्वेष्टनीयां मोचनीयां स्पर्शक्लिष्टाम् । स्पर्शे सति मूलकेशेषु सव्यथामित्यर्थः [कठिनविषमाम्] कठिना च सा विषमा निम्नोन्नता च ताम् । खञ्जकुब्जादिवदन्यतरस्य प्राधान्यविवक्षया 'विशेषणं विशेष्येण बहुलम्' इति समासः । एकवेणीम् एकीभूतवेणीम् । 'पूर्वकाल–' इत्यादिना तत्पुरुषः । तां शिखाम् । [अयमितनखेन] अयमिता अकर्तितोपान्ता नखा यस्य तेन करेण गाण्डाभोगात् कपोलविस्तारात् असकृत् मुहुर्मुहुः सारयन्तीम् प्रसारयन्तीम् । 'तां पश्य' इति पूर्वेण संबन्धः । असकृत् सारणाच्चित्तविभ्रमदशा सूचिता ॥

Śl. 32. बद्धा—Means here 'woven into (a braid),' and not tied up, which then could not have hung down about her cheeks. शिखा–her hair or tresses. दाम—Acc. sing. of दामम् a garland. हित्वा–*Indec. p.* of हा to abandon; having cast off *i. e.* without a garland (as she was not to wear one). *Cf.* न प्रोषिते तु संस्कुर्यान्न च वेणीं प्रमोचयेत् । Hārita. उद्वेष्टनीयां—to be undone or untwisted, loosened; *cf.* उद्वेष्टन वान्तमाल्यः Ragh. VII. 6; see śl. 36 *infra.* स्पर्श०—causing pain when touched. अयमितनखेन—अयमित the growth of which is not checked (यमित *p. p. p.* of यम् Cau.) by being cut or pared; untrimmed. गण्डाभो०—आभोग means expansion circumference; hence extent, expansive from; गण्डाभोग–her broad cheek. कठिनवि०–कठिन stiff, as the hair was not oiled and long remained braided. विषम—uneven, sugged. See Malli. on the Comp two adjectives may be compounded when the superiority of the quality expressed by one to the other is to be expressed, as in the case of the Comp. खजकुब्ज. एकवेणीं–Comp. धृतैकवेणिः Śak. VII. 21

सा संन्यस्ताभरणमबला पेशलं[1] धारयन्ती
शय्योत्सङ्गे निहितमसकृद्दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं[2] नवजलमयं[3] मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ३३ ॥

[1] पेलवम्, कोमलम्. [2] अश्रुम्. [3] जललव, जलकण.

33. The poor woman, supporting her delicate body, with ornaments cast off from it and dropped again and again through great pain on (*or*, near) the bed, will necessarily cause even you to shed tears in the form of new water : Generally, every kind-hearted man is sympathetically disposed.

सेति ।। **अबला** दुर्बला **संन्यस्ताभरणं** कृशत्वात्परित्यक्ताभरणम् **असकृत्** अनेकशो **दुःखदुःखेन** दुःखप्रकारेण । 'प्रकारे गुणवचनस्य' इति द्विर्भावः । **शय्योत्सङ्गे निहितं पेशलं** मृदुलं **गात्रं** शरीरं **धारयन्ती** वहन्ती । अनेनात्यन्ताशक्त्या मूर्च्छावस्था सूच्यते । **सा** त्वत्सखी **त्वाम्** अपि **नवजलमयं** नवाम्बुरूपम् 'अस्रं बाष्पम् **अवश्यं** सर्वथा **मोचयिष्यति** । 'द्विकर्मसुपचादीनामुपसंख्यानम्' इति मुचेः पचादित्वात् द्विकर्मत्वम् । तथा हि । **प्रायः** प्रायेण आर्द्रान्तरात्मा मृदुहृदयः । मेघस्तु द्रवान्तः-शरीरः । **सर्वः** करुणामयी वृत्तिरन्तःकरणवृत्तिर्यस्य स करुणावृत्तिः भवति हि यस्मात् । अस्मिन्नवसरे सर्वथा त्वया शीघ्रं गन्तव्यमनन्तरदशापरिहारायेति संदर्भाभिप्रायः । ननु किमिदमादिमां चक्षुःप्रीतिमुपेक्ष्यावस्थान्तराण्येव तत्रभवान्कविरादृतवान् । उच्यते—' संभोगो विप्रलम्भश्च द्विधा श्रृङ्गार उच्यते । संयुक्तयोस्तु संभोगो विप्रलम्भो वियुक्तयोः ।। पूर्वानुरागमानाख्यप्रवासकरुणात्मना । विप्रलम्भश्चतुर्धाऽत्र प्रवासस्तत्र च त्रिधा ।। कार्यतः संभ्रमाच्छापादस्मिन्काव्ये तु शापजः । प्रागसंगतयोर्यूनोः सति पूर्वानुरञ्जने ।। चक्षुःप्रीत्यादयोऽवस्था दश स्युस्तत्क्रमो यथा । दृङ्मनः-सङ्गसंकल्पा जागरः कृशता रतिः ।। ह्रीत्यागोन्मादमूर्छान्ता इत्यनङ्गदशा दश । पूर्वसंगतयोरेव प्रवास इति कारणात् ।। न तत्रापूर्ववच्चक्षुःप्रीतिरुत्पत्तुमर्हति । तत्सङ्गस्य तु सिद्धस्याप्यविच्छेदोऽत्र वर्ण्यते ।। अन्यथा पूर्ववद्वाच्या इति तावद्व्यवस्थितेः । वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा ।। हृत्सङ्गादिरिहाचष्ट कविरष्टाविति स्थितिः । मत्सादृश्यं लिखन्तीति पद्येऽस्मिन्प्रतिपादिता । चक्षुःप्रीतिरिति प्रोक्तं निरुत्तरक्तताननम् । चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात् । यथा मालविकारूपमग्निमित्रस्य पश्यतः । प्रोषितानां च भर्तॄणां क्व दृष्टाऽदृष्टपूर्वता ।। अथ तत्रापि संदेहे स्वकलत्राणि पृच्छतु । किं भर्तृप्रत्यभिज्ञा 'स्यात्किं वैदेशिकभावना ।। प्रवासादागते स्वस्मिन्नित्यलं कलहैर्वृथा ।।' इति ।।

Śl. 33. **संन्यस्ताभरणं** संन्यस्तानि आभरणानि यस्मात्. **अबला**—though a general term for a woman the word is used here in its literal sense of 'weak.' **पेशलं**—delicate. **पेलवं** *v. l.* means the same thing **शय्योत्संगे**—उत्सङ्ग may mean 'the vicinity or middle part of.' **दुःखदुःखेन**—with great pain, for the repetition, see note on मन्दं मन्दं 1. 10. **नवजल०**—The reading जललवमयं is better, as the word नव has no propriety here. **मोचयिष्यति—मुच्** governs two Accusatives, being mentioned in the **पचादि list.** Being a गत्यर्थक

root, मुच् in the Causal governs its subject in its primitive sense in the Acc. त्वमस्त्रं मोक्ष्यसि; सा त्वामस्त्रं मोचयिष्यति. See also note on त्याजितः śl. 36. *infra*. करुणावृत्तिः–of a compassionate or Sympathetic disposition. आर्द्रान्तरात्मा—tender-hearted, easily moved to pity.

नन्वीदृशीं दशामापन्नेति कथं त्वया निश्चितमत आह—

जाने सख्यास्तव मयि मनः संभृतस्नेहमस्मा-
दित्थंभूतां प्रथमविरहे तामहं तर्कयामि।
वाचालं मां न खलु [1]सुभगंमन्यभावः करोति
प्रत्यक्षं ते निखिलमचिराद्भ्रातरुक्तं मया यत् ॥ ३४ ॥

34. I know that the heart of your friend is full of deep love for me; and hence I fancy her to have been reduced to such a condition in this first separation. It is not, indeed, a high opinion of my own good fortune (*or*, amiability) that makes me overstate things : all that I have said, O brother, will ere long be actually witnessed by you.

जान इति। हे मेघ **तव सख्याः मनः मयि संभृतस्नेहं** संचितानुरागं **जाने**। **अस्मात्** स्नेहज्ञानकारणात् **प्रथमविरहे**। प्रथमग्रहणं दुःखातिशयद्योतनार्थम्। **तां** त्वत्सखीम् **इत्थंभूतां** पूर्वोक्तावस्थामापन्नां [**अहं**] **तर्कयामि**। ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनुरागप्रकटनं तत्राह—वाचालमिति। सुभगमात्मानं मन्यत इति सुभगंमन्यः। 'आत्ममाने खश्च' इति खश्प्रत्ययः। 'अरुर्द्विषत्—' इत्यादिना मुमागमः। तस्य भावः **सुभगंमन्यभावः** सुभगमानित्वं **मां वाचालं** बहुभाषिणं **न करोति खलु**। सौन्दर्याभिमानिता न प्रकटयामीत्यर्थः। 'स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्।' इत्यमरः। 'आलजाटचौ बहुभाषिणि' इत्यालच्प्रत्ययः। किं तु हे **भ्रातः मया उक्तं यत्** 'अधिक्षामाम्' इत्यादि तत् **निखिलं** सर्वम् **अचिरात्** शीघ्रमेव **ते** तव **प्रत्यक्षम्**। भविष्यतीति शेषः॥

Śl. 34. संभृतस्नेहं—संभृतः collected (and grown great thereby) स्नेहो यस्मिन् full of deep or developed love. **वाचालं**—one who speaks much that is unmeaning (कुत्सितमिति वक्तव्यम् Vārttika). The terminations आल and आट are added to वाच् in this sense. See com., a man speaking sensibly is called वाग्मिन्. **सुभगमन्यभावः**—the state of considering oneself handsome or fortunate (in having a good wife). When one has an opinion

---

१ सुभगं मन्युभावम्; मन्यमानः. २ सकलम्.

about one's self (आत्ममाने) the aff. खश् (अ) or इन् is added; as पण्डितमात्मानं मन्यते पण्डितंमन्यः or पण्डितमानी Before a term, having an indicatory ख् the words अरुस्, द्विषद् and bases ending in अ have the augment म् so सुभगंमन्यः. **प्रत्यक्षं** अक्षि प्रतिगतं, visible, exposed to the eye.

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम् ।
त्वय्यासन्ने नयनमुपरिस्पन्दि[1] शङ्के मृगाक्ष्या
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति[2] ॥ ३५ ॥

35. I think the eye of the fawn-eyed one, the movements to the corners of (the pupil of) which are prevented by her hair, which is void of the moisture of collyrium, and which has forgotten the sportive movements of the eye-brows on account of her abstinence from wine, throbbing in its upper part when you will be near, will bear comparison with a blue lotus agitated by the movements of fish.

रुद्धेति ।। **अलकैः** [**रुद्धापाङ्गप्रसरम्**] रुद्धा अपाङ्गयोः प्रसरा यस्य तत्तथो क्तम् । [**अञ्जनस्नेहशून्यं**] अञ्जनेन स्नेहः तेन शून्यम् । स्निग्धाञ्जनरहितमित्यर्थः । **अपि च** किं च **मधुनो** मद्यस्य **प्रत्यादेशात्** निराकरणात् । परित्यागादित्यर्थः 'प्रत्यादेशो निराकृतिः' इत्यमरः । [**विस्मृतभ्रूविलासम्**] विस्मृतो भ्रूविलासो भ्रूभङ्गो येन तत् । नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नमिति भावः । **त्वयि आसन्ने** सति । स्वकुशलवार्ताशंसिनीति शेषः । उपर्यूर्ध्वभागे स्पन्दते स्फुरति इति **उपरिस्पन्दि** । तथा च निमित्तनिदाने— 'स्पन्दान्मूर्ध्निच्छत्रलाभं ललाटे पट्टमंशुकम् । इष्टप्राप्ति दृशोरूर्ध्वमपाङ्गे हानिमादिशेत् ।। ' इति । **मृगाक्ष्याः** त्वत्सख्याः **नयनम्** । वाममिति शेषः । 'वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः । दाने देवादिपूजायां स्पन्देऽलंकरणेऽपि च ।। ' इति स्त्रीणां वामभागप्राशस्त्यात् । **मीनक्षोभात्** मीनचलनात् [**चलकुवलयश्रीतुलाम्**] चलस्य कुवलयस्य श्रिया शोभया तुलां सादृश्यम् **एष्यति इति शङ्के** तर्कयामि । ['तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' इत्यत्र सदृशपर्यायस्य तुलाशब्दस्य प्रतिषेधादत्र च सादृश्यवाचित्वात्तद्योगेऽपि तृतीया]।।

Śl. 35. **रुद्धापाङ्ग**— *i. e.* which is unable to cast side-glances. **०स्नेहशून्यं**—void of **the moisture supplied by collyrium,** *i.e.*

---

१ स्पन्दि. २ क्षोभाकुल.

not having collyrium applied to it. प्रत्यादेशात्—being forbidden, or her rejection of or abstaining from. विस्मृत०—see *supra*, note on विभ्रमादेशदक्षं Śl. 12. उपरिस्पन्दि—throbbing or quivering up, *i.e.* in the upper eyelid (as a good omen, auguring your arrival). See com. मृगाक्ष्याः–मृगस्य इव अक्षिणी यस्याः सा मृगाक्षी तस्याः मीनक्षोभात् &c. The reading मानक्ष भाकुल &c. is better, as मोनक्षोभ ought to form part of the Comp.

वामश्चास्याः[1] कररुहपदैर्मुच्यमानो मदीयै-
मुक्ताजालं चिरपरिचितं[2] त्याजितो दैवगत्या ।
संभोगान्ते मम समुचितो हस्तसंवाहनानां[3]
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम्[4] [5] ॥ ३६ ॥

36. And her left thigh, (now) devoid of my nail-marks, made by an (adverse) course of destiny to forego its long-worn pearlstring, accustomed to be shampooed by my hands at the end of enjoyment and yellowish-white like the juicy stem of a plantain-tree, will be throbbing.

वाम इति ॥ मदीयैः कररुहपदैः । नखपदैः । 'पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।' इत्यमरः । मुच्यमानः परिहीयमाणः नखाङ्करहित इत्यर्थः । ऊर्वोर्नखपदास्पदत्वं तु रतिरहस्ये— 'कण्ठकुक्षिकुचपार्श्वभुजोरः श्रोणिसक्थिषु नखास्पदमाहुः ।' इति । चिरपरिचितं चिराभ्यस्तं मुक्ताजालं मौक्तिकसरमयं कटिभूषणं दैवगत्या दैववशेन त्याजितः । संप्रति नखपदोष्माभावेन शीतोपचारस्य तस्य वैयर्थ्यादिति भावः । त्यजतेर्ण्यन्तात्कर्मकर्तरि क्तः । 'द्विकर्मसु पचादीनां चोपसंख्यानमिष्यते' इति पचादित्वाद्द्विकर्मत्वम् । संभोगान्ते मम हस्तसंवाहनानां हस्तेन मर्दनानाम् । 'संवाहनं मर्दनं स्यात्' इत्यमरः । समुचितः योग्यः [सरसकदलीस्तम्भगौरः] सरसो रसार्द्रः परिपक्वो न शुष्कश्च स एव विवक्षितः । तत्रैव पाण्डिमसंभवात् । स चासौ कदलीस्तम्भश्च स इव गौरः पाण्डुरः । गौरः 'करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि च' इति मालतीमालायाम् । अस्याः प्रियाया वामः ऊरुः चलत्वं स्पन्दनं यास्यति [च] प्राप्स्यते । 'ऊरोः स्पन्दाद्रतिं विद्यादूर्वोः प्राप्ति सुवाससः ।' इति निमित्तनिदाने ॥

Śl. 36. कररुह०—करे रोहन्तीति कररुहाः *lit.* growing on the hand nails. तेषा पदानि. मूच्यमानः left by, *i.e.* void of. मुक्ताजालं त्याजितः

१ वामो वा. २ चिरविरचितम्, नवपरिचितम्. ३ संवाहनस्य, ४ कनक. ५ गर्भ.

Read in the com. कर्मणि क्त: instead of कर्म कर्तरि क्त: Some grammarians include roots like त्यज्, मुच् &c. in the list of the द्विकर्मक roots on the authority of च in Patanjali's Kārikā—नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च। द्विकर्मकेषु ग्रहणं द्रष्टव्यमिति निश्चय: ॥ *Cf.* त्यजितै: फलमुत्खातै: &c. Ragh. IV. 33. Malli. commenting on Ragh. XV. 88 remarks ग्रहित्यज्योर्ण्यन्तयोर्द्विकर्मकत्वम्। Some commentators do not hold his view. Kaiyata commenting on अकथितं च says—गवा पयस्त्याजयति. दैवगत्या—Owing to the adverse course of destiny (causing the separation). संवाहन—rubbing or pressing, gently shampooing. *Cf.* संवाहयामि चरणावुत पद्मताम्रौ। Śāk. III. 19. सरस—wet, juicy, *i. e.* neither dry nor ripe. कदलीस्तम्भ—The reading कदलीगर्भ० is better, as the interior of the *Kadali* is whiter than its exterior. Pandit Isvarach defends the reading ०कदलीस्तम्भ by remarking–अयमेव पाठ: साधीयान्। 'कनककदलीवेष्टनप्रेक्षणीय:' इत्यत्यलकायां कनककदलीनां बाहुल्यदर्शनादुपनितिकाले तासामेव बुद्धिस्थत्वात्। चलत्वं–throbbing, quivering. Elsewhere Kālidāsa disapproves of the comparison of a beautiful woman's उरु to कदलीस्तम्भ; *cf.* नागेन्द्रहस्तास्त्वचि कर्कशत्वादेकान्तशैत्यात्कदलीविशेषा:। लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्या: ॥ Kum. I. 30.

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां[1] स्तनितविमुखो याममात्रं [2]सहस्व।
मा भूदस्या: प्रणयिनि [3]मयि स्वप्नलब्धे कथंचि-
त्सद्य:कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ ३७ ॥

37. If, at that time, O cloud, she should be in the enjoyment of the pleasure of sleep, wait for three hours only, sitting behind her and refraining from thunder, that the close embrace she might be enjoying with her dear-loved one (me) found in a dream with difficulty, may not be such as would have the tie of the creeper-like arms fall off from the neck at once.

तस्मिन्निति ॥ हे जलद तस्मिन् काले त्वदुपसर्पणकाले सा मत्प्रिया [लब्धनिद्रासुखा] लब्धं निद्रासुखं यया तादृशी स्यात् यदि स्याच्चेत्। एनां निद्राणाम् अन्वास्य। पश्चादासित्वेत्यर्थ:। उपसर्गवशात्सकर्मकत्वम्। स्तनितविमुखो गर्जितपराङ्गमुखो नि:शब्द: सन्। अन्यथा निद्राभङ्ग: स्यादिति भाव:। याममात्रं प्रहरमात्रम्। 'द्वौ यामप्रहरौ समौ' इत्यमर:। सहस्व प्रतीक्षस्व। प्रार्थनायां लोट् ॥

१ अन्वासीन:; तन्नासीन:. २ सहेथा:, क्षमस्व. ३ जने.

शक्तयोरेकवारसुरतस्य यामावधिकत्वात्स्वप्नेऽपि तथा भवितव्यमित्यभिप्रायः। तथा च रतिसर्वस्वे—'एकवारावधिर्यामो रतस्य परमो मतः। चण्डशक्तिमतोर्यूनोरद्भुतक्रमवर्तिनोः' इति। यामसहनस्य प्रयोजनमाह—मा भूदिति। अस्याः प्रियायाः प्रणयिनि प्रेयसि मयि कथंचित् कृच्छ्रेण स्वप्नलब्धे सति। गाढोपगूढं गाढालिङ्गनम्। नपुंसके भावे क्तः। [सद्यःकण्ठच्युतभुजलताग्रन्थि] सद्यस्तत्क्षणं कण्ठात् च्युतः स्रस्तो भुजलतयोर्ग्रथिर्बन्धो यस्य तत् मा भूत् माऽस्तु। कथंचिल्लब्धस्यालिङ्गनस्य सद्यो विघातो मा भूदित्यर्थः। न चात्र निद्रोक्तिः 'तामुन्निद्राम् इति पूर्वोक्तेन विरुध्यते। पुनः सप्तम्याद्यवस्थासु पाक्षिकनिद्रासंभवात्। तथा च रसरत्नाकरे—'आसक्ती रोदनं निद्रा निर्लज्जानर्थवाग्भ्रमः। सप्तमादिषु जायन्ते दशाभेदेषु वासुके' इति॥

Śl. 37 अन्वास्यैनाम्-आम् is trans. is it preceded by a preposition. *Cf.* तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः। Ragh. II. 24. See also I. 56. गुरोर्नियोगाच्च नगेन्द्रकन्या स्थाणुं तपस्यन्तमधित्यकायाम्। अध्यास्त इत्यप्सरसां मुखेभ्यः श्रुतं मया मत्प्रणिधिः स वर्गः॥ Kum. III. 17. एनां—The optional forms of एतद् and इदम् are used when there is अन्वादेश *i. e.* their proper forms have already been used *e. g.* अनेन व्याकरणमधीतम्। एनं छन्दोऽध्यापय. याममात्रं—याममेव याममात्रं; Acc. of duration. See Malli. according to the commentator Mahimasimhagani (as quoted by Mr. Nandargikar) the Yaksha asked the cloud to wait for a Yama because the sleep of a Padmini lasts for that time. He quotes—पद्मिनी यामनिद्रा च द्विप्रहरा च चित्रिणी। हस्तिनी यामत्रितया घोरनिद्रा च शङ्खनी॥ सहस्व-सहेथाः is better, as the Pot. expresses a gentle request. कथंचित्—with great difficulty (*i. e.* after a great many disappoinments). गाढोपगूढं–the close embrace. Here the termination त forms a *neu.* noun. The constr. गाढोपगूढं सद्यकण्ठ० ०ग्रंथि मा भूत्.

तामुत्थाप्य[1] स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्[2]।
विद्युद्गर्भः[3] स्तिमितनयनां[4] त्वत्सनाथे गवाक्षे
वक्तुं धीरैः[5] स्तनितवचनैर्[6]मानिनीं प्रक्रमेथाः॥ ३८॥

38. Rouse her with a breeze cool by the particles of your water, and when she will be refreshed along with the *Mālati* buds,

१ प्रोत्थाप्यैनां. २ मालतीनां रजोभिः. ३ विद्युद्गर्भे, विद्युत्कम्प, विद्युन्नेत्र. ४ निहित. ५ धीर, धीरध्वनित, धीरस्तनित. ६ वचनः.

being firm and with lightning suppressed in your interior, proceed to speak with the high-minded one with her eyes rivetted on the window occupied by you, with words in the form of your thunder, (thus)—

तामिति ॥ **तां प्रियां** [**स्वजलकणिकाशीतलेन**] स्वजलकणिकाभिर्जलबिन्दुभिः शीतलेन **अनिलेन उत्थाप्य** प्रबोध्य । एतेन तस्याः प्रभुत्वाद्व्यजनानिलसमाधिर्व्यज्यते । यथाऽऽह भोजराजः–' मृदुभिर्मर्दनैः पादे शीतलैर्व्यजनैस्तनौ । श्रुतौ च मधुरैर्गीतिनिंद्रातो बोधयेत्प्रभुम् ॥ ' इति । **अभिनवैः** नूतनैः । **मालतीनां जालकैः** समं जातिमुकुलैः सह । ' सुमना मालती जातिः ' इति, ' साकं सत्रा समं सह । ' इति, ' क्षारको जालकं क्लीबे कलिका कोरकः पुमान् । ' इति चामरः । **प्रत्याश्वस्तां** सुस्थिताम् । शिशिरानिलसंपर्कात्पुनरुज्जीवितामित्यर्थः । श्वसेः कर्तरि क्तः । ' आदितश्च ' इति चकाराद्दिट्प्रतिषेधः । एतेनास्याः कुसुमसौकुमार्यं गम्यते । त्वत्सनाथे । त्वत्सहिते । ' सनाथं प्रभुमित्याहुः सहिते चित्ततापिनि ' । इति शब्दार्णवे । **गवाक्षे स्तिमितनयनां** कोऽसाविति विस्मयान्निश्चलनेत्रां **मानिनीं** मनस्विनीम् । जनानौचित्यासहिष्णुमित्यर्थः । विद्युद् गर्भः अन्तःस्था यस्य स विद्युद्गर्भः । अन्तर्लीनविद्युत्क इत्यर्थः । ' गर्भोऽपवरकेऽन्तस्थे गर्भोऽग्नौ कुक्षिणोऽर्भके । ' इति शब्दार्णवे । दृष्टिप्रतिघातेन वक्तुर्मुखावलोकनप्रतिबन्धकत्वान्न विद्युता द्योतितव्यमिति भावः । **धीरः** धैर्यविशिष्टश्च सन् । अन्यथाशीलत्वादिनैतदनाश्वासनप्रसङ्गादिति भावः । **स्तनितवचनैः** स्तनितान्येव वचनानि तैः **वक्तुं प्रक्रमेथाः** उपक्रमस्व । विध्यर्थे लिङ् । ' प्रोपाभ्यां समर्थाभ्याम् ' इत्यात्मनेपदम् ॥

Śl. 38. **०शितलेन अनिलेन**—This shows that she was to be roused from sleep like a princess. **प्रत्याश्वस्तां**–cheered up, comforted, regaled and refreshed. **मालतीनां जालकै**—the buds of the Mālati also are refreshed when touched by a breeze charged with the spray of water. **विद्युद्गर्भः**–Having lighting concealed within (so that her eyes may not be dazzled by the flash of lightning and she may be able to look at you speaking to her.) According to Sarod. and some other commentators the implication here is—विद्युद्गर्भः स्त्रीसहायः परनारीसंभाषणमेकाकिनो नोचितं, *i. e.* you should be accompanied by lightning, your wife. Else it will be improper on your part to speak with another's wife alone. Some read विद्युद्गर्भ taking it as Voc. sing. Another reading विद्युत्कम्पस्तिमित०, the eyes fixed on account of the flash of lightning. **स्तिमित**–motionless. hence fixed, riveted. **गवाक्षे**—गवामक्षीव fr. गो + अक्षि changed to अक्ष; mark the Samdhi . गो is changed to गव before अक्ष; see Sid-Kau. on Pān. VI. 1. 123. **धीरः**—patient, also, one who has taken

courage. Mark the various readings. The Pārsvā. reads धीरस्तनित० which may be one Comp. word, धीरं स्तनितं एव वचनं यस्य having moderately deep thunder for your word, or two words धीर ('O wise one') being Voc. sing. धीरस्तनितवचनं—is another reading, which must be taken as an *adv.*, 'in a manner in which your deep thunder will serve as words.' The other readings can be easily understood. मानिनीं—high-minded; *i. e.* one who will not brook breach of propriety on anybody's part; see com.; hence the word धीर wise, *i. e.* who is discreet in speech, is appropriately used. प्रक्रमेथाः—क्रम् with प्र and उप meaning 'to begin' is Atm.; but प्रक्रामति he goes; उपक्रामति he comes.

संप्रति दूतस्य श्रोतृजनाभिमुखीकरणचातुरीमुपदिशति—

भर्तुर्मित्रं प्रियमविधवे विद्धि मामाम्बुवाहं
[1]तत्संदेशै[2]र्हृदयनिहितैरागतं त्वत्समीपम् ।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
[3]मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ ३९ ॥

39. "O you, who are not a widow, know me to be a cloud, your husband's dear friend, come to you with his messages treasured up in my mind—a cloud that urges on their way, by deep and pleasant sounds, multitudes of wearied travellers eager to unloose the braids of their wives."

भर्तुरिति ॥ विधवा गतभर्तृका न भवतीत्यविधवा सभर्तृका हे अविधवे । अनेन भर्तृजीवनसूचनादनिष्टाशङ्कां वारयति । मा भर्तुः तव पत्युः प्रियं मित्रं प्रियसुहृदम् । तत्रापि हृदयनिहितैः मनसि स्थापितैः तत्संदेशैः तस्य भर्तुः संदेशैः त्वत्समीपम् आगतम् भर्तुः संदेशकथनार्थमागतामित्यर्थः । अम्बुवाहं मेघं विद्धि जानीहि । न केवलमहं वार्ताहरः किं तु घटकोऽपीत्याशयेनाहः । यः अम्बुवाहो मेघः मन्द्रस्निग्धैः स्निग्धगम्भीरैः ध्वनिभिः गर्जितैः करणैः । [अबलावेणिमोक्षोत्सुकानि] अबलानां स्त्रीणां वेणयस्तासां मोक्षे मोचन उत्सुकानि पथि श्राम्यतां श्रान्तिमापन्नानां प्रोषितानां प्रवासिनाम् । पान्थानामित्यर्थः । वृन्दानि संघान् त्वरयति । पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वमिति भावः ॥

Sl. 39. Now he indicates to the cloud the way by which a messenger may cleverly win the attention of the person he has to

---

१ तत्-त्वत्-संदेशान्मनसि निहितात्, तत्संदेशाद्धृदयनिहितात्. २ मनसि. ३ मन्त्र.

मे...११

communicate a message to. अविधवे— He is to address her thus, so that she may at once (without asking a question) know that her husband was safe. The use of the word विधवा by Kālidāsa shows that the word had not acquired in his time the slight tinge of repugnance about it which it did in later times. मित्रं प्रियं—which she could know from the very fact that he readily undertook to convey the message to her. स्निग्ध—pleasing, agreeable. वेणिमोक्षो—it was customary for husbands to loosen the braid of their wives on their return from a journey abroad; see *supra*, śl. 30. The same was done when women were forced away from their husbands. *Cf.* मोक्षष्वे सुरबन्दीनां वेणीबन्धानदूषितान् : Ragh. X. 47.

भर्तृसख्यादिज्ञापनस्य फलमाह—

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य[1] चैवं[2] ।
श्रोष्यत्यस्मात्परमवहिता[3] सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपनतः[4] संगमात्किंचिदूनः ॥ ४० ॥

40. This being said, she, with her heart swelling with eagerness, and her face lifted up, will look at you and honour you, as Maithili (Sītā) did the son of Wind (Hanūmant) and then, being attentive, will hear from you what is to be said next : For, O gentle one, to women, tidings about their husbands, obtained from friends, are a little short of (almost equal to) actual union.

इतीति ॥ **इति एवम् आख्याते सति पवनतनयं** हनूमन्तं **मैथिली इव** सीतेव **सा** मत्प्रिया । **उन्मुखी [उत्कण्ठोच्छ्वसितहृदया]** उत्कण्ठयौत्सुक्येनोच्छ्वसितहृदया विकसितचित्ता सती **त्वां वीक्ष्य संभाव्य** सत्कृत्य **च** । **अस्मात्** भर्तृमैत्रीज्ञापनात् **परं** सर्वं श्रोतव्यम् । **अवहिता** । अप्रमत्ता सती **श्रोष्यति एव** । अत्र सीताहनूमदुपाख्यानादस्याः पातिव्रत्यं मेघस्य दूतगुणसंपत्तिश्च व्यज्यते । तद्गुणास्तु रसाकरे—'ब्रह्मचारी बली धीरो मायावी मानवर्जितः । धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेत् ॥' इति । ननु वार्तामात्रश्रवणादस्याः को लाभ इत्याशङ्कयार्थान्तरमुपन्यस्यति— **हे सौम्य** साधो । **सीमन्तिनीनां** वधूनाम् । 'नारी सीमन्तिनी वधूः' इत्यमरः । **[सुहृदुपनतः]** सुहृदा सुहृन्मुखेनोपनतः प्राप्तः सन् । सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम् । कान्तस्योदन्तो वार्ता **कान्तोदन्तः** । 'वार्ता

१ संभाष्य. २ एवम्. ३ हितं, परमपि हितं ४ उपगतः, कान्तोपान्तात्सुहृदुपगम.

प्रवृत्तिर्वृत्तान्त उदन्तः स्यात् ' इत्यमरः । संगमात् कान्तसंपर्कात् किंचिदूनः ईषदूनस्तद्वदेवानन्दकारीत्यर्थः ॥

Śl. 40. पवनतनयं--By comparing the cloud to Hanūmant the Yaksha flatters him that he considers him a reliable messenger having all the qualifications necessary for such a duty; and by comparing his wife to Sītā he shows that she is a great Pativratā and worthy of such a favour at his hands. मैथिली—मैथीलस्य राज्ञः अपत्यं स्त्री, daughter of the king of Mithilā. Sītā was the daughter of Janaka, King of Mithilā, capital of the country of Videha which lay to the north-east of Magadha. It corresponds to the modern district of Purniya, between the Gaṇḍaki and Kośi or Kauśiki rivers. Janakapura in Nepal, north of Madhuvāni, is still identified as Mithilā. उन्मुखी—Sītā had to raise her face to look at Hanūmat as he was sitting on the branch of a tree; the Yaksha's wife would have to do the same as the cloud would be stationed near the window. *Cf.* ततः सा वक्रकेशान्ता सुकेशी केशसंवृतम् । उन्नम्य वदनं भीरुः शिशपामन्ववैक्षत ॥ Rāmā, Sund.-K. 31. 16. उत्कण्ठो० her heart swelling or expanding with eagerness. संभाव्य—When Hanūman approached Sītā while conversing with her, she suspected him to be Rāvaṇa in a changed form, but when convinced of his being a real monkey and a devotee of Rāma, she honoured him be saying--न हि त्वा प्राकृतं मन्ये वानरं वानरर्षभ । यस्य ते नास्ति संत्रासो रावणादपि संभ्रमः ॥ अर्हसे च कपिश्रेष्ठ मया समभिभाषितुम् । &c. See. Rāmā. Sund.–K. 36. 9-10. The reading संभाष्य for संभाव्य will also do. अवहिता—because convinced of your real character. सीमन्तिनी—सीमन्तः (see *suprā*, śl. 2) अस्या अस्तीति a woman (with her husband living). सुहृदु०—come through (*i. e.* brought by) a friend किंचिदून०— *i. e.* gives almost equal joy.

संप्रति संदिशति—

तामायुष्मन्मम च वचनादात्मनश्चोपकर्तुं
[2]ब्रूया [3]एवं तव सहचरो रामगिर्याश्रमस्थः ।
अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्तः
[5]पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ ४१ ॥

१ आयुष्मान्. २ ब्रूयात्. ३ एकम्. ४ विमुक्ताम्, नियुक्तः ५ दूवाश्वास्यं सुलभविपदां प्राणिनामेतदेव, भूतानां हि क्षयिषु करणेष्वाद्यमाश्वास्यमेतत्.

41. O *you* of long (*or* noble) life, at my request and also to bless (bring credit to) yourself (*lit.* oblige yourself) say this to her—" Your consort, residing in a hermitage on Rāmagiri, who is safe (alive), asks you, O weak one, being separated from you, about your welfare : (for) in the case of creatures (men) who fall easy victims to perils (*or*, miseries) this alone is the first thing to be inquired after.

तामिति ।। **हे आयुष्मन्** । प्रशंसायां मतुप् । परोपकारश्लाघ्यजीवितेत्यर्थः । **मम [वचनात्]** वचनं प्रार्थनावचनं तस्मात् **च आत्मनः** स्वस्य उपकर्तुं **च** । परोपकारेणात्मानं कृतार्थयितुमित्यर्थः । उपकारक्रियां प्रति कर्मत्वेऽपि तस्योपकरोतीत्यादिवत्सबन्धमात्रां विवक्षायामात्मन इति षष्ठी न विरुध्यते । यथाऽऽह भारविः—' सा लक्ष्मीरुपकुरुते यया परेषाम् ' इति । तथा श्रीहर्षश्च—' साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् । ' इति । तथा च ' क्वचित्क्वचिद्द्वितीयादर्शनात्सर्वस्य तथा ' इति नाथवचनमनाथवचनमेव । **तां प्रियाम् एवं ब्रूयाः** । किमित्याह—**हे अबले तव सहचरः भर्ता** रामगिरेश्चित्रकूटस्याश्रमेषु तिष्ठतीति—**रामगिर्याश्रमस्थः सन्** । **अव्यापन्नः** न मृत इत्यर्थः । अमरणे हेतुमाह—**वियुक्तः** वियोगं प्राप्तो दुःखी सन् **त्वां कुशलं पृच्छति** । दुह्यादित्वात्पृच्छतेर्द्विकर्मकत्वम् । तथा हि **सुलभविपदाम्** अयत्नसिद्धविपत्तीनां **प्राणिनां एतदेव** कुशलमेव **पूर्वाभाष्यम्** प्रथममवश्यं प्रष्टव्यम् । ' **कृत्याश्च** ' इत्यावश्यकार्थे ण्यत्प्रत्ययः ।।

Śl. 41. **आयुष्मन्**—One having a long life; ' O you of long life.' This contains a blessing in it. The Yaksha begins by wishing the cloud long life (being entitled to give a blessing as his elder brother). Or as, Malli. takes it. ' O you, whose life is praiseworthy ' (being full of benevolent deeds). Here the aff. मत् indicates ' excellence. ' **आत्मनः**—Gen. in the sense of the Acc.; to do a favour to yourself, *i.e.* by doing this act of favour you will do credit to yourself. **अव्यापन्न**—not dead, alive; *cf.* पितृव्यापत्तिशोकयोः । Ragh. XII. 56. Mark the use of the word; somehow keeping body and soul together. He does not say सुखी or some such thing. **वियुक्तः**—The Pārsvā. reads नियुक्ताः which Prof. Pathak translates by ' bound by service. ' another reading is वियुक्ताम्. **पूर्वाभाष्यं**—पूर्वमाभाष्यं—the first thing to be asked or inquired after; the first subject of conversation. **पूर्वाशास्यं** *v. l.* —the first thing to be wished for. **सुलभ०**—सुलभा विपद् येषां who fall easy victims to, who are easily subject to, calamities; who easily meet with difficulties; *i. e.* whose life is so uncertain. Some read the whole of the 4th line differently; see foot-note; this means—when the bodies of men are

subject to decay (liable to perish,) this is the first thing to be wished for. एवदेव—This alone, *viz.* inquiry after each other's health.

अङ्गेनाङ्गं [1]प्रतनु तनुना गाढतप्तेन तप्तं
सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन ।
[3]उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती
संकल्पैस्तैर्[4]विशति विधिना वैरिणा रुद्धमार्गः ॥ ४२ ॥

42. With those efforts of fancy, he living at a distance and having his path obstructed by adverse fate, joins his body, emaciated, greatly heated, with tears (dropping from it), full of longing, and breathing more heavily, with yours also greatly lean, grown heated (with torment), wet with tears, affected with ceaseless longing, and heaving warmer sighs.

अङ्गेनेति ॥ किं च । दूरवर्ती दूरस्थः । न चागन्तुं शक्यत इत्याह । वैरिणा विरोधिना विधिना दैवेन रुद्धमार्गः प्रतिबद्धवर्त्मा स ते सहचरः तनुना कृशेन गाढतप्तेन अत्यन्तसंतप्तेन सास्रेण साश्रुणा । उत्कण्ठा वेदनास्य जातोत्कण्ठितं तेन उत्कण्ठितेन । 'तदस्य संजातम्–' इत्यादिनेतच्प्रत्ययः उत्कण्ठतेर्वा कर्तरि क्तः । [समधिकतरोच्छ्वासिना] समधिकतरमधिकमुच्छ्वसितीति समधिकतरोच्छ्वासि तेन । दीर्घनिःश्वासिनेत्यर्थः । ताच्छील्ये णिनिः । अङ्गेन स्वशरीरेण प्रतनु कृशं तप्तं वियोगदुःखेन संतप्तं अश्रुद्रुतम् अश्रुक्लिन्नम् । 'अश्रु नेत्राम्बु रोदनं चास्रमस्रु च ।' इत्यमरः । अविरतोत्कण्ठम् अविच्छिन्नवेदनम् उष्णोच्छ्वासं तीव्रनिःश्वासम् । 'तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं समं स्मृतम् ।' इति हलायुधः । अङ्गं त्वदीयं शरीरं तैः स्वसंवेद्यैः संकल्पैः मनोरथैः विशति । एकीभवतीत्यर्थः अत्र समरागित्वद्योतनाय नायकेन नायिकायाः समानावस्थत्वमुक्तम् ॥

Sl. 42. अङ्गं--his wife's body. प्रतनु—extremely emaciated, very thin; here प्र has a comparative force; her body was already तनु or slender (*cf.* तन्वी श्यामा &c.); now it was still more so owing to the separation. गाढतप्तेन—गाढं तप्तं गाढतप्तं तेन greatly heated or feverish, अश्रुद्रुतं—अश्रुभिः द्रुतं wet with tears. अविरतो॰—न विरता अविरता constantly unceasing: अविरता उत्कण्ठा यस्य उत्कण्ठितेन—this may be a Taddhita form ending in इत; उत्कण्ठा संजाता अस्य; or the *p. p. p.* of कण्ठ् with उद् having an active force. संकल्पैः--mental efforts, fancies. तैः—those, *i. e.*, known to

---

१ सुतनु, तनु च, २ ॰णास्रद्रवम्. ३ दीर्घो–भीष्णो–च्छ्वासम्. ४ ते.

himself, or those well-known to lovers. The reading ते going with अङ्गं is better, for it explains whose body is meant; otherwise it has to be inferred from the context. रुद्धमार्गः—who cannot come to you.

संप्रति स्वावस्थानिवेदनाय प्रस्तौति —

शब्दाख्येयं यदपि किल ते [1]यः सखीनां पुरस्ता-
त्कर्णे लोलः कथयितुम[2]भूदाननस्पर्शलोभात् ।
सोऽतिक्रान्तः श्रवणविषयं लोच[3]नाभ्याम[4]दृष्ट-
स्त्वामुत्कण्ठावि[5]रचितपदं [6]मन्मुखेनेदमाह ॥ ४३ ॥

43. He, who through the desire of touching your face, became eager to whisper into your ear, in the presence of your female friends, what could have been spoken out in words, (now) standing out of the reach of your ear and not to be seen by your eyes, sends to you by me (*lit.* through the medium of my mouth) this message, the words of which have been arranged under the inspiration of longing (*or*, mental anguish) :—

शब्दाख्येयमिति ॥ हे **अबले यः ते प्रियः सखीनां पुरस्तात्** अग्रे [**आननस्पर्शलोभात्**] आननस्पर्शे त्वन्मुखसंपर्के लोभादगाधद्रयात् अधरपानलोभादित्यर्थः । **शब्दाख्येयं** शब्देन रवेणाख्येयमुच्चैर्वाच्यम् **अपि यत्** तत् । वचनमपीति शेषः । **कर्णे कथयितुं लोलः** लालसः **अभूत् किल** । ‘लोलुपो लोलुभो लोलो लालसो लम्पटोऽपि,’ च । इति यादवः । **श्रवणविषयं** कर्णपथम् **अतिक्रान्तः** । तथा **लोचनाभ्याम् अदृष्टः** । अतिदूरत्वाद्द्रष्टुं श्रोतुं च न शक्य इति भावः । स ते प्रियः । **त्वाम्** [**उत्कण्ठाविरचितपदं**] उत्कण्ठया विरचितानि पदानि सुप्तिङन्तशब्दा वाक्यानि वा यस्य तत्तथोक्तम् । ‘पदं शब्दे च वाक्ये च’ इति विश्वः । इदं वक्ष्यमाणं ‘श्यामास्वङ्गम्’ इत्यादिकं **मन्मुखेन आह** । मन्मुखेन स एव ब्रूत इत्यर्थः ॥

Śl. 43. **शब्दाख्येयं**—that can be spoken out in words; *i.e.* could have been loudly said. ते—There is no special propriety of this. So the reading तत् for this is preferable. It will avoid two faults, *viz.* (1) the importation of the term necessary to complete the sense; (here the correlative तत् of the relative यत्) । and (2) avoiding the use of what is not necessary. **उत्कंठा**—longing;

---

१ तत्सखीनाम्. २ अगात्. ३ लोचनानाम्. ४ अदृश्य, अगम्यः. ५ विरहित. ६ संमुखेन.

or mental disquietude or pain. Now he describes in four ślokas the four ways in which persons in separation or those who have not attained union divert their longing. *viz.* (1) looking at things similar ; (2) drawing a likeness of; (3) obtaining in a dream the sight of; (4) and touching things touched by the beloved person.

सादृश्यप्रतिकृतिस्वप्नदर्शनतदङ्गस्पृष्टस्पर्शाख्यानि चत्वारि विरहिणां विनोदस्थानानि । तथा चोक्तं गुणपताकायाम्–' वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि । तदङ्गस्पृष्टानामुपनलवतां दर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदितः ॥ ' इति । तत्र सदृशवस्तुदर्शनमाह–

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे[1] दृष्टिपातं[2]
[3]वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन्क्वचिदपि[4] न ते चण्डि[5] सादृश्यमस्ति ॥ ४४ ॥

44. " I fancy to see your body in the Priyangu creepers, your glances in the eyes of bewildered female deer, the beauty of your face in the moon, your (decorated) hair in the plumages of peacocks, and the sportive movements of your eye-brows in the gentle ripples of rivers : But, Oh, misfortune ! Nowhere in a single thing, O passionate one, does your (entire) likeness exist !

श्यामास्विति ॥ श्यामासु प्रियङ्गुलतासु । श्यामा तु महिलाह्वया । लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली । ' इत्यमरः । अङ्गं शरीरम् उत्पश्यामि । सौकुमार्यादिसाम्यादङ्गमिति तर्कयामीत्यर्थः । तथा [चकितहरिणीप्रेक्षणे] चकितहरिणीनां प्रेक्षणे ते दृष्टिपातं । शशिनि चन्द्रे वक्त्रच्छायां मुखकान्तिं तथा शिखिनां बर्हिणां बर्हभारेषु बर्हसमूहेषु केशान् प्रतनुषु स्वल्पासु [नदीवीचिषु] नदीनां वीचिषु । अत्र वीचीनां विशेषणोपादाने नानुक्तगुणग्रहो दोषः । भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात्तस्येति । तदुक्तं रसरत्नाकरे—' ध्वन्युत्पादे गुणोत्कर्षे भोगोक्तौ दोषवारणे । विशेषणादि दोषस्य नास्त्यनुक्तगुणग्रहः ' इति भ्रूविलासान् । ' भ्रूपताकाः ' इति पाठे भ्रुवः पताका इवेत्युपमितसमासः । उत्पश्यमीति । सर्वत्र संबध्यते । तथाऽपि नास्ति मनोनिर्वृतिरित्याशयेनाह–हन्तेति । हन्त विषादे । ' हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः ' इत्यमरः । हे चण्डि कोपने । ' चण्डस्त्वत्यन्तकोपनः '। इत्यमरः । गौरादित्वात् ङीष् । उपमानकथनमात्रेण न कोपितव्यमिति भावः । क्वचिदपि कस्मिन् अपि एकस्मिन् वस्तुनि ते तव सादृश्यं न अस्ति । अतो न निर्वृणोमीत्यर्थः । अनेनास्याः सौन्दर्यमनुपममिति व्यज्यते ॥

१ प्रेक्षते. २ दृष्टिपानान्. ३ वक्त्रच्छायम्. ४ कस्थम्. ५. भीरु.

Sl. 44. श्यामासु अङ्गं—Here the comparison to the Priyangu creeper extends only to the thinness and delicacy of the frame of her body and not to the colour, as she is said to be गौर. For an opposite comparison, *Cf.* प्रिये प्रियङ्गुः प्रियविप्रयुक्ता विपाण्डुतां याति विलासिनीव । Ritus. IV. 10. It is oftentimes the lover who is described as श्यामाङ्ग; *cf.* प्रियङ्गुश्यामाङ्गप्रकृतिरपि &c. Māl-Mādh. III. 9; -इन्दीवरश्यामतनुर्नृपोऽसौ &c. Ragh. VI. 65. Or, we may take अङ्ग to refer to her arms. *Cf.* कृत्वा श्यामाविटपसदृशं स्रस्तमुक्तं द्वितीयं (हस्तं) : Mālav. II. 6; श्यामा लताः कुसुमभारनतप्रवालाः स्त्रीणां हरन्ति धृतभूषणबाहुकान्तिम् Ritus. III. 18. शिखिनां बर्हभारेषु—The tresses of a woman decorated with an interweaving of flowers are often compared to the plumage of a peacock. *Cf.* रतिविगलितबन्धे केशहस्ते सुकेश्याः सति कुसुमसनाथे किं करोत्येष बर्ही । Vik. IV. 10. See also Ragh. IX. 67 (चित्रमाल्यानुकीर्णे केशपाशे प्रियायाः) अस्याः कचानां शिखिनश्च किं नु विधिं कलापौ विमतरगाताम् । तेनायमेभिः किमपूजि पुष्परभित्सि दत्त्वा स किमर्धचन्द्रम् ॥ Nai. VII. 22. नदीवीचिषु—*Cf.* तरङ्गभ्रूभङ्गा Vik. IV. 28. For the idea comp. कलमन्यभृतासु भाषितं कलहंसीषु मदालसं गतम् । पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः ॥ त्रिदिवोत्सुकयाऽप्यवेक्ष्य मां निहिताः सत्यममी गुणास्त्वया । विरहे तव मे गुरुव्यथं हृदयं न त्ववलम्बितुं क्षमाः ॥ Ragh. VII. 52. 60; वेषु लोध्रप्रपवेषु कांतिर्दृशः कुरङ्गीषु गतं गजेषु । लतासु नम्रत्वमिति प्रमथ्य व्यक्तं विभक्ता विपिने प्रिया मे ॥ Māl.-Mādh. IX. 27. चण्डि—The propriety of the word is this—You are passionate and therefore you might get angry with me for trying to find your resemblance in other things; but your resemblance is not to be found in any *one* thing, and so you should not get angry with me. Or चण्डा may be taken as a term of endearment. भीरु *v. l.* will also do. You need not be frightened at the thought that I looked for your resemblance in other things. Your entire likeness is not to be found anywhere.

संप्रति प्रतिकृतिदर्शनमाह —

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम् ।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतान्तः ॥ ४५ ॥

45. The moment I think of portraying myself as fallen at your feet after having painted you, angered in love, on a stone-

slab with mineral dyes, my sight is obscured by repeatedly gathering tears: Cruel fate does not bear (to see) our union even in that (a picture) !

त्वामिति ॥ हे प्रिये [**प्रणयकुपिताम्**] प्रणयेन प्रेमातिशयेन कुपितां कुपितावस्थायुक्तां **त्वाम्** । त्वत्प्रतिकृतिमित्यर्थः धातवो गैरिकादयः । 'धातुर्भवादिशब्दादिगैरिकादिष्वजादिषु ।' इति यादवः । ते एव रागा रञ्जकद्रव्याणि । 'चित्रादिरञ्जकद्रव्ये लाक्षादौ प्रणयेच्छयोः । सारङ्गादौ च रागः स्यादारुण्ये रञ्जने पुमान् ॥' इति शब्दार्णवे । तैः **धातुरागैः शिलायां** शिलापट्टे **आलिख्य** निर्माय । **आत्मानं** माम् । मत्प्रतिकृतिमित्यर्थः । **ते** तव । चित्रगताया इत्यर्थः । **चरणपतितं कर्तुं** तथा लेखितुं **यावद् इच्छामि तावत्** इच्छासमकालं **मुहुः उपचितैः** प्रवृद्धैः **अस्त्रैः** अश्रुभिः कर्तृभिः । 'अस्त्रमश्रुणि शोणिते' इति विश्वः ; **मे दृष्टिः आलुप्यते** । आव्रियत इत्यर्थः । ततो दृष्टिप्रतिबन्धनाल्लेखनं प्रतिबध्यत इति भावः । किं बहुना । **क्रूरः** घातुकः । 'नृशंसो घातुकः क्रूरः ।' इत्यमरः । **कृतान्तः** दैवम् । 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु ।' इत्यमरः । **तस्मिन् अपि** चित्रेऽपि । **नौ** आवयोः । 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वानावौ' । नावादेशः । **संगमं** सहवासं **न सहते** । संगमलेखनमप्यावयोरसहमानं दैवमावयोः संगं न सहत इति किमु वक्तव्यमित्यपिशब्दार्थः ॥

Śl. 45. **धातुरागैः** &c.—Because he had no drawing materials at hand there. **आत्मानं** &c. — *i. e.* the moment I wish to draw my picture as falling at your feet. **तावत्**—before I can do it. **दृष्टिरालुप्यते मे**—*Cf.* न च सुवदनामालेख्येऽपि प्रियामसमाप्य तां मम नयनयोरुद्बाष्पत्वं सखे न भविष्यति । Vik. II. 10. **क्रूरस्तस्मिन्नपि** &c. Mahimasimhagani quotes अकरुणत्वमकारणविग्रहः परधने परयोषिति च स्पृहा । सुजन बन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥.

४५-४६ श्लोकयोर्मध्ये क्षेपकोऽयं दृश्यते—

' धारासिक्तस्थलसुरभिणस्त्वन्मुखस्यास्य बाले
दूरीभूतं प्रतनुमपि मां पञ्चबाणः क्षिणोति ।
घर्मान्तेऽस्मिन्विगणय कथं वासराणि व्रजेयु-
र्दिक्संसक्तप्रविततघनव्यस्तसूर्यातपानि ॥ '

* Between 45-46, the following śloka is read by some—

* " O youthful one, the five-shafted god (Cupid) reduces (harasses) me, although emaciated being separated from your mouth having the smell of ground sprinkled over with showers: Think to yourself, then, how the days of the last part of the hot season (beginning of the rainy season) can pass with me, with the light of the sun obscured by clouds densely spread in all the directions."

Additional Sloka between Ślokas 45-46.

धारासिक्त &c.–धाराभि: मेघजलस्येति शेष: सिक्तं यत्स्थलं a piece of land तद्वत् सुरभि तस्य. **विगणय**—revolve in your mind, think out for yourself. **वासराणि**–वासर, 'a day' is *mas.* and *neu.* **कथं व्रजेयु:**– for, their are passion-stirring. see I. 3 (मेघालोके भवति &c.) **दिक्संसक्त** दिक्षु संसक्ता ये प्रवितता: stretched in a line मेघास्तै: व्यस्त: dispelled सूर्यातप: येषु तानि.

अधुना स्वप्नदर्शनमाह —

मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतो-
र्लब्धायास्ते कथमपि [1]मया स्वप्नसंदर्शनेषु ।
पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां
मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः[2] पतन्ति ॥ ४६ ॥

46. Drops of tears, as big as pearls, do indeed drop in abundance on the shoots of trees (from the eyes) of the deities of the spot, as they see me stretching forth my arms in space in order to pressingly embrace you, found with great difficulty by me in the visions of dreams.

मामिति ॥ सुप्तस्य विज्ञानं स्वप्न: 'स्वप्न: सुप्तस्य विज्ञानम्' इति विश्व:। संदर्शनं संवित् । 'दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽक्षिण संविदि ।' इति शब्दार्णवे । [स्वप्नसंदर्शनेषु] स्वप्नसंदर्शनानि स्वप्नज्ञानानि । चूतवृक्षादिवत्सामान्यविशेषभावेन सहप्रयोग: । तेषु मया कथमपि महता प्रयत्नेन लब्धाया: गृहीताया: । दृष्टाया इति यावत् । ते तव [निर्दयाश्लेषहेतो:] निर्दयाश्लेषो गाढालिङ्गनं स एव हेतुस्तस्य । निर्दयाश्लेषार्थमित्यर्थ: । 'षष्ठी हेतुप्रयोगे' इति षष्ठी । [आकाशप्रणिहितभुजं] आकाशे निर्विषये प्रणिहितभुजं प्रसारितबाहुं मां पश्यन्तीनां स्थलीदेवतानां [मुक्तास्थूला:] मुक्ता मौक्तिकानीव स्थूला: अश्रुलेशा: बाष्पबिन्दव: तरुकिसलयेषु अनेन चेलाञ्चलेनाश्रुधारणसमाधिर्ध्वन्यते [खलु] बहुशो न पतन्ति इति न किं तु पतन्त्येवेत्यर्थ: । निश्चये नञ्द्वयप्रयोग: । तथा चाधिकारसूत्रम् – 'स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोग: सिद्ध:' इति । 'महात्मगुरुदेवानामश्रुपात: क्षितौ यदि । देशभ्रंशो महद् दुःखं मरणं च भवेद् ध्रुवम् ॥' इति क्षितौ देवताश्रुपातनिषेधदर्शनाद्यक्षस्य मरणाभावसूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम् ॥

---

१ निशि. २ लेखा:, पाता:.

Sl. 46. आकाश०--आकाशे प्रणिहितौ भुजौ येन; arms cast or thrown in space. निर्दय cruel (*i. e.* so close as to cause pain); hence, very close or tight. निर्दयश्चासौ आश्लेषश्च; Karm. Comp. now see com. स्वप्न--०स्वप्न perception by a man in sleep. What he sees and remembers. संदर्शन—the knowledge of it, see com., hence, visions obtained in dreams. न खलु न--It is not, indeed, that they do not; *i. e.* they very certainly do. बहुशः—plentifully, in abundance. Some connect हुशः with पश्यन्तीनां. स्थलीदेव०--the deities presiding over natural spots. तरुकिसलयेषु-For the tears of great men, elderly persons or preceptors and deities, if fallen on the ground, lead to serious calamities. See com. अश्रुलेशाः--These were of course dew-drops dropping on the shoots of the trees. The Yaksha's plight excited the sympathy of the sylvan deities and they wept for him. Trees are similarly described as shedding tears of compassion. For the tears *cf.* निशातुषारैर्नयनाम्बुकल्पैः पत्रान्तपर्यागलदच्छबिन्दुः । उपारुरोदेव नदत्पतङ्गः कुमुद्वतीं तीरतरुर्दिनादौ ॥ Bhaṭṭi. II. 4. विलपन्निति कोसलाधिपः करुणार्थग्रथितं प्रियां प्रति । अकरोत्पृथिवीरुहानपि स्रुतशाखारसबाष्पदूषितान् ॥ Ragh. VIII. 70.

इदानीं तदङ्गस्पृष्टवस्तुदर्शनमाह--

भित्त्वा सद्यः किसलयपुटान्देवदारुद्रुमाणां
ये[1] तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।
आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ ४७ ॥

47. Those breezes from the mountain of snow (Himālaya) which, at once breaking open the folds of the shoots of the *devadāru* trees and fragrant with their milky exudations, blow in a southerly direction, are embraced by me, O meritorious one, with the thought that they might have in all probability touched your body previously.

भित्त्वेति ॥ देवदारुद्रुमाणां किसलयपुटान् पल्लवपुटान् सद्यः भित्त्वा तत्क्षीरस्रुतिसुरभयः तेषां देवदारुद्रुमाणां क्षीरस्रुतिभिः क्षीरनिष्यन्दैः सुरभयः सुगन्धयः । तुषाराद्रिजातत्वे लिङ्गमिदम् । ये वाताः दक्षिणेन दक्षिणमार्गेण । तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात्तृतीया समेन यातीतिवत् । तत्रापि करणत्वस्य प्रतीयमानत्वात् 'कर्तृकरणयोरेव तृतीया' इति भाष्यकारः । प्रवृत्ताः चलिताः ।

---

१ एतत्.

हे गुणवति सौशील्यसौकुमार्यादिगुणसंपन्ने ते तुषाराद्रिवाताः पूर्वं प्राक् एभिः वातैः तव अङ्गम् स्पृष्टं भवेद् यदि किल इति संभावितमेतदिति बुद्ध्येत्यर्थः। 'वार्तासंभाव्ययोः किल' इत्यमरः। मया आलिङ्ग्यन्ते आश्लिष्यन्ते। अत्र वायूनां स्पृश्यत्वेऽप्यमूर्तत्वेनालिङ्गनायोगादालिङ्ग्यन्त इत्यभिधानं यक्षस्योन्मत्तत्वात्प्रलपितमित्यदोष इति वदन्निरुक्तकारः स्वयमेवोन्मत्तप्रलापीत्युपेक्षणीयः॥

Śl. 47. तत्क्षीर--The milky juice or sap of the pine trees, सुरभयः--The Himalayan breezes are said to be rendered fragrant by the exudations of the pines. *Cf.* भागीरथीनिर्झरशीकराणां वोढा मुहुः कम्पितदेवदारुः। यद्वायुः &c. Kum. I. 15. दक्षिणेन--in the southernly direction. The direction or route followed in going is put in the Instr. case. See A. G.*51 (*f.*) The authority for this is the Vārttika प्रकृत्यादिभ्य उपसंख्यानम्; words like प्रकृति, विषय, सम &c. govern the Instr case. See com. यदि किल–Both these words signify 'probability', therefore, when used together they intensify it. *Cf.* Sārod. यदि किलेति पदद्वयमपि संभावनार्थम् एवार्थद्वययोरुपादानं संभावनातिशयं ख्यापयति। अङ्गमेभिस्तवेति—For such a breeze has the peculiar power of cooling the heat of a lover separated from his love. *Cf.* तामीषत्प्रचलाविलोचनां नताङ्गीमालिङ्गनपवन मम स्पृशाङ्गमङ्गम्। Māl.–Mādh. I. 38. शक्यमरविन्दसुरभि कणवाही मालिनीतरङ्गाणाम्। अङ्गैरनङ्गतप्तैरविरलमालिङ्गितुं पवनः॥ Śāk. III, 5, where Śakuntalā's contact with the breezs is implied. See Rāghavabhatta (who refers to this passage of Megh.) on it.

संक्षिप्येत[1] क्षण[2] इव [3]कथं दीर्घयामा[4] त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं [5]त्वद्वियोगव्यथाभिः॥ ४८॥

48. How would the night with its long, *Yāmas* (watches) be shortened to the space of a moment, and how would the day have very faint light (*or*, moderate heat) in all states (seasons)!—My mind, thus seeking objects difficult to attain, O tremulous-eyed one, is rendered helpless by the pangs of separation from you, causing intense heat (pain).

---

१ संक्षिप्येव, संक्षिप्यैवम्, संक्षिप्यन्ते. २ क्षणम्. ३ मया. ४ ०मास्त्रियामाः. ५ तद्विमोग.

संक्षिप्येतेति ॥ दीर्घाः यामाः प्रहरा यस्यां सा दीर्घयामा । विरहवेदनया तथा प्रतीयमानेत्यर्थः । त्रियामा रात्रिः ' आद्यन्तयोरर्धयाममयोर्दिनव्यवहारात्त्रियामा ' इति क्षीरस्वामी । क्षण इव कथं केन प्रकारेण संक्षिप्येत लघूक्रियेत । अहः अपि सर्वावस्थासु । सर्वकालेष्वित्यर्थः । मन्दमन्द्रो मन्दप्रकारः । ' प्रकारे गुणवचनस्य ' इति द्वि क्तिः । ' कर्मधारयवदुत्तरेषु ' इति कर्मधारयवद्भावात्सुपो लुक् । मन्दमन्दातपम् अत्यल्पसंतापं कथं स्यात् । न स्यादेव । हे चटुलनयने चञ्चलाक्षि इत्थम् अनेन प्रकारेण दुर्लभप्रार्थनम् अप्राप्यमनोरथं मे मम चेतः गाढोष्माभिः अतितीव्राभिः त्वद्वियोगव्यथाभिः अशरणम् अनाथं कृतम् ॥

Sl. 48. दीर्घयामा—The watches appear long to the Yaksha owing to the disconsolation produced by separation. त्रियामा–The night so called because of its being considered as consisting of three *Yāmas* or watches, the first half of the watch first being reckoned as part of the previous day and the second half of the last watch as part of the next day (forming, like day, business time). See com. सर्वावस्थासु in all conditions, *i. e.* seasons. मन्द्रमन्दातपं–Some explain as मन्दान्मन्दः अतिमदः &c. कथं स्यात्—Malli.'s न स्यादेव is unintelligible unless we add अतः, एवं न यतः स्यादतः दुर्लभप्रार्थनं &c. चटुलनयने—चटुले नयने यस्याः सा; having trembling or unsteady eyes. Eyes with ever-moving pupils. दुर्लभ०—दुर्लभा unattainable, not to be fulfilled, प्रार्थना earnest desire यस्य. गाढोष्माभिः–गाढः ऊष्मः ऊष्मा वा यासां; of great heat. *i. e.* very tormenting or गाढाश्च ता ऊष्माश्च; they were गाढ and so he wished the night to be shortened; they were ऊष्म and so he wished the heat of the day to be moderated. अशरणं—नास्ति शरणं यस्य helpless, without a protector.

न च मदीयदुर्दशाश्रवणाद्भेतव्यमित्याह—

[1]नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नि[3]तरां मा गमः कातरत्वम् ।
कस्यात्यन्तं सुखमु[4]पनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ४९ ॥

49. Thinking much to myself (as to the future), O dear one, I support myself just by myself; therefore, O bleassed one, you too should not be very much afraid (*or*, lose courage); whom does uninterrupted (*or*, unmixed) happiness attend or invariable misery

---

१ न तु; इति. २ नाव०. ३ सुतराम्. ४ उपगतम्.

befall! Man's condition (of life) goes up and down again, in the manner of the felly of a wheel.

नन्विति ।। न तु इत्येकं वाक्यम् । तु शब्दो भेदकः किं तु न भेतव्यमित्यर्थः । अथ वा नत्विति पाठः । ननु इति आमन्त्रणे । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः । ननु प्रिये बहु विगणयन् शापान्ते सत्येवमेवं करिष्यामीत्यावर्तयन् आत्मानम् आत्मनैव स्वेनैव । 'प्रकृत्यादिभ्य उपसंख्यानम्' इति तृतीया । अवलम्बे धारयामि । यथाकथंचिज्जीवामीत्यर्थः । तत् तस्मात्कारणात् हे कल्याणि सुभगे । त्वत्सौभाग्येनैव जीवामीति भावः । 'बह्वादिभ्यश्च इति ङीष् । त्वमपि नितराम् अत्यन्तं कातरत्वं भीरुत्व मा गमः मा गच्छ । गमेर्माङि लुङ 'न माङ्योगे' इत्यङागमाभावः तादृक्सुखिनोरावयोरीदृशि दुःखे कथं न बिभेमीत्याशङ्क्याह--कस्येति कस्य जनस्य अत्यन्तं नियतं सुखं उपनतं प्राप्तम् एकान्ततः नियमेन दुःखं वा उपनतम् । किं तु दशा अवस्था [चक्रनेमिक्रमेण] चक्रस्य रथाङ्गस्य नेमिस्तदन्तः । 'चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्' इत्यमरः । तस्याः क्रमेण परिपाट्या । 'क्रमः शक्तौ परीपाट्याम्' इति विश्वः । नीचैः अधः उपरि च गच्छति प्रवर्तते । एवं जन्तोः सुखदुःखे पर्यायेण इत्यर्थः ।।

Śl. 49. Now he says-Although I am reduced to this plight you should not be alarmed on my account. ननु—is a vocative particle here; 'O dear one' Malli. notices the reading न तु also. it means-तु न भेतव्यं although such is the case you should entertain no fear as regards my safety. Prof. Pathak suggests another construction of this line, separating विगणयन्नात्मानं as विगणयन् न आ०; thus-तु आत्मानं बहु विगणयन् आत्मना एव अवलम्बे इति न. विगणयन्—thinking highly (of the future). Entertaining sweet fancies about our future life. आत्मनैव--One Com. reads आत्मना नावलम्बे and explains आत्मना स्वयमेव आत्मानं मनो नावलम्बे । अपि तु धैर्य प्राप्स्यामि. कल्याणि--'O blessed one!' (implying thereby-My life really depends upon your good fortune, *saubhāgya*, see com.) नितरां--very much, excessively. मा गमः—the अ of अगमः is dropped after the particle मा. अत्यन्तं--अन्तमतिक्रान्तं unending, everlasting, uninterrupted. एकान्ततः—in one way, uniformly unmixed. दशा-- condition of life. different states or vicissitudes of life. *Cf.* सुखस्यानन्तरं दुःखं दुखस्यानन्तरं सुखम् । सुखदुःखं मनुष्याणां चक्रवत्परिवर्तते ।।

"We are scarcely prepared for this sudden fortitude of the Yaksha. But it is not by any means unnatural. The task of consoling partners in affiaction necessarily diverts the mind from its own distress."—Wilson.

न च निरवधिकमेतद् दुःखमित्याह—

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
शेषान्मासान्गमय[1] चतुरो लोचने मीलयित्वा
पश्चादावां विरहगुणितं[2] तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ५० ॥

50. My curse will end when Vishṇu (*lit.* the holder of the horny bow) rises from his serpent-bed; pass the remaining four months with your eyes closed (through patience); after that we two will enjoy those various desires of ours with their flavour redoubled by separation in nights lit up with the perfect clear) autumnal moon-light."

शापान्त इति ॥ शार्ङ्गं पाणौ यस्य स तस्मिन् शार्ङ्गपाणौ विष्णौ । 'सप्तमीविशेषणे–' इत्यादिना बहुव्रीहिः । 'प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः' इति वक्तव्यात्पाणिशब्दस्योत्तरनिपातः । [भुजगशयनात्] भुजगः शेष एव शयनं तस्मात् उत्थिते सति मे शापान्तः शापावसानम् । भविष्यतीति शेषः । शेषान् अवशिष्टान् चतुरः मासान् । मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः । दशदिवसाधिक्यं त्वत्र न विवक्षितमित्युक्तमेव । लोचने मीलयित्वा निमील्य गमय । धैर्येणातिवाहयेत्यर्थः । पश्चात् अनन्तरं त्वं चाहं च आवाम् । 'त्यदादीनि सर्वैर्नित्यम्' इत्येकशेषः । 'त्यदादीनां मिथो द्वन्द्वे यत्परं तच्छिष्यते' इत्यस्मदः शेषः । [विरहगुणितं] विरहे गुणितमेवमेवं करिष्यामीति मनस्यावर्तितं तं तम् । वीप्सायां द्विरुक्तिः । [आत्माभिलाषं] आत्मनोरावयोरभिलाषं मनोरथम् [परिणतशरच्चन्द्रिकासु] परिणताः शरच्चन्द्रिकाः यासां तासु क्षपासु रात्रिषु निर्वेक्ष्यावः भोक्ष्यावहे । विशतेर्लृट् । 'निर्वेशो भृतिभोगयोः' इत्यमरः । अत्र कैश्चित् 'नभोनभस्ययोरेव वार्षिकत्वात्कथमाषाढादिचतुष्टयस्य वार्षिकत्वमिति चोदयित्वर्तुत्रयपक्षाश्रयणादविरोधः' इति पर्यहारि । तत्सर्वमसंगतम् । अत्र गतशेषाश्चत्वारो मासा इत्युक्तं कविना न तु ते वार्षिका इति । तस्मादनुक्तोपालम्भ एव । यच्च नाथेनोक्तम् 'कथमाषाढादिचतुष्टयात्परं शरत्कालः' इति तत्राप्याकार्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकास्वित्युक्तम् । न तु तदैव शरत्प्रादुर्भाव उक्त इत्यविरोध एव ॥

Śl. 50. भुजग०:—भुजः (going crookedly) सन् गच्छतीति भुजगः a serpent, here Sesha, the lord of serpents, also called Ananta. See Kum. III. 13. Vishṇu sleeps on his serpent-couch for four months beginning from the eleventh of Ashādha, called शयनी (एकादशी),

१ मासानेतान्; मासानन्यात्. २ गणितम्, जनितम्.

to the 11th of Kārttika, called प्रबोधिनी. The sleep of Vishṇu is called Yoga-Nidra or the sleep of Wakefulness, and is not like the ordinary sleep of mortals. This sleep of Vishṇu is often and sometimes humorously referred to by poets. *Cf.* जयति स भगवान् कृष्णः शेते यः शेषभोगशय्यायाम् । Veni. I. Intro. Stanza. अवश्यंभाविनो भावा भवन्ति महतामपि । नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ "The sleep of Vishṇu, during the four months of the periodical rains in Hindustan, seems to bear an emblematical relation to that season. It has been compared to the Egyptian Hieoglyphical account of the sleep of Horus, typical of the annual overflow of the Nile."—Wilson. शाङ्गर्पाणेः--शृङ्गस्य विकारः शाङ्गं धनुः a bow made of horn. Now see com. The comp. should properly be पाणिशाङ्ग but by the rule 'past participles and words in the Loc. case come next when compounded with words meaning weapons,' we have शाङ्गर्पाण. **शेषान्**—remaining, *i. e.* which are to pass. **चतुरः**--*i.e.* four roughly speaking. See com. **लोचने मीलयित्वा**—quietly, courageously, *lit.* shutting up your eyes (to the external word, *i. e.* do not think of how happy others are, but bear up your misfortune with fortitude). See com. **विरहगुणितं**–विरहेण गुणितं multiplied *i. e.* increased by, rendered sweeter by. *Cf.* यदेवोपनतं दुःखात्सुखं तद्रसवत्तरम् । निर्वाणाय तरुच्छाया तप्तस्य हि विशेषतः ॥ Vik. III. 21. सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् । Mrich. I. 10 Malli. reads गणितं; so read in the com. गणितं for गुणितं–गणितं—calculated as, revolved in the mind. See com. विरहजनितमिति पाठे विरहे चित्ताभिप्रायेण विपयीकृतम् । Sārod. **तं तं** various, all kinds of. **परिणत०**– ripe. Hence, very bright the obstruction of clouds being removed. **क्षपासु**–because the night time is best suited to the enjoyment of pleasures. *Cf.* तमिस्रपक्षेऽपि सह प्रियाभिर्ज्योत्स्नावतो निर्विशति प्रदोषान् । Ragh. VI. 34. The autumnal nights are well known for the beauty of the moonlight.

संप्रति तस्या मेघवञ्चकत्वशङ्कानिरासायातिगूढमभिधेयमुपदिशति--

भूयश्चाह[1] त्वमपि[2] शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं[3] विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत्पृच्छतश्च[4] त्वया मे
दृष्टः स्वप्ने कितव रमयन्कामपि[5] त्वं मयेति ॥ ५१ ॥

---

१ ०श्चापि. २ असि. ३ सस्वनं, सत्वरम्. ४ तोऽसि. ५ कामिनीं कामपि त्वम्.

51. He (your husband) further said—" Once you although clung to my neck (on the bed), full asleep and then work up with a cry for some reason or other, and when I asked you repeatedly (the reason of that), you said with a suppressed smile—' You rogue, I saw you, in my dream, frolicking with some other women.'

भूय इति ॥ हे अबले भूयः च पुनरपि आह। त्वद्भर्ता मन्मुखेनेति शेषः। मेघवचनमेतत्। किमित्यत आह-पुरा पूर्वम्। पुराशब्दश्चिरातीते। 'स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा' इत्यमरः। शयने मे कण्ठलग्ना अपि त्वम्। गले बद्धस्य कथमपि गमनं न संभवेदिति भावः। निद्रां गत्वा किमपि केन वा निमित्तेनेत्यर्थः सस्वरं सशब्दम्। उच्चैरित्यर्थः रुदती सती विप्रबुद्धा। आसीरिति शेषः। असकृत् बहुशः पृच्छतः। रोदनहेतुमिति शेषः मे मम हे कितव त्वं कामपि रमयन् मया स्वप्ने दृष्टः इति त्वया सान्तर्हासं समन्दहासं यथा तथा कथितं च इति। त्वद्भर्ता भूयश्चाहेति योजना ॥

Śl. 51. भूयश्चाह—He again said, *i.e.* communicated a secret to me, that you should be convinced of my real character as a messenger. त्वमपि—Prof. Iśvarachandra finds fault with this reading, saying that अपि has no force here, and proposes to read किमयि, taking अयि as a particle of address to his wife, which is also objectionable, as the speech is not directly addressed to his wife by the Yaksha. Malli. gives a meaning to अपि by connecting it with कण्ठलग्ना. But, as we have अपि again in the second line, the repetition does not look good, and so it is better to read त्वमसि, taking असि with विप्रबुद्धा. किमपि—for some reason or other (which I could not make out). सान्तर्हासं—अन्तर्हसिन सहितं यथा तथा; with an inward smile, because she blushed as she knew her mistake on waking up. कितव—' O you rogue',-used as a term of endearment.

एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा
मा कौलीनाद[1]सितनयने मय्यविश्वासिनी भूः।
स्नेहानाहुः किमपि विरहे[2] ध्वंसिनस्ते त्वभोगा-
दिष्टे[3] वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ५२ ॥

52. Knowing me to be safe from the giving of this convincing proof, do not be distrustful of me, O black-eyed one, from

१ चकित. २ विरहह्रासिनस्तेऽप्यभा०; विरहव्यापदः-ध्वंसिनः-ते ह्यभोग्यः. ३ दृष्टे.

(believing in) the evil talk of the people; they say somehow (without any ground for it) that affections die away during separation; on the contrary, they (the affections) with the taste for the desired objects heightened, become accumulated into a heap of love."

एतस्मादिति ॥ एतस्मात् पूर्वोक्तात् । (अभिज्ञानदानात्) अभिज्ञायतेऽनेनेत्यभिज्ञानं लक्षणं तस्य दानात्प्रापणात् मां कुशलिनं क्षेमवन्तं विदित्वा ज्ञात्वा । हे असितनयने कुले जनसमूहे भवात् कौलीनात् लोकप्रवादात् । एतावता कालेन परासुर्नो चेदागच्छतीति जनप्रवादादित्यर्थः । 'स्यात्कौलीनं लोकवादे युद्धे पश्वहिपक्षिणाम् ।' इत्यमरः । मयि विषये अविश्वासिनी मरणशङ्किनी मा भूः न भव । भवतेर्लुङ् । 'न माङ्योगे' इत्यडागमप्रतिषेधः । न च दीर्घकालविप्रकर्षात्पूर्वस्नेहनिवृत्तिराशङ्क्येत्याह—स्नेहानिति । किमपि किंचिन्निमित्तम् । न विद्यत इति शेषः । स्नेहान् प्रीतीः विरहे सत्यन्योन्यविप्रकर्षे सति ध्वंसिनः विनश्वरान् आहुः । तत्तथा न भवतीत्यभिप्रायः । (तु) किं तु ते स्नेहाः अभोगात् विरहे भोगाभावाद्धेतोः प्रसज्यप्रतिषेधेऽपि नञ्समास इष्यते । इष्टे वस्तुनि विषये । उपचितोरसः स्वादो येषु ते उपचितरसाः सन्तः । प्रवृद्धतृष्णा इत्यर्थः । 'रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः' इति विश्वः । प्रेमराशीभवन्ति । वियोगासहिष्णुत्वमापद्यन्त इत्यर्थः । स्नेहप्रेम्णोरवस्थाभेदाद्भेदः । तदुक्तम्—'आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा । रतिश्शृङ्गारौ योगे वियोगता विप्रलम्भश्च ॥' इति । तदेव स्फुटीकृतं रसाकरे—'प्रेक्षा दिदृक्षा रम्येषु तच्चिन्ता त्वभिलाषकः । रागस्तत्सङ्गबुद्धिः स्यात्स्नेहस्तत्प्रवणाक्रिया ॥ तद्वियोगासहं प्रेम रतिस्तत्सहवर्तनम् । शृङ्गारस्तत्समं क्रीडा संयोगः सप्तधा क्रमात् ॥' इति ॥

Sl. 52. कुशलिनं—कुशलमस्यास्तीति कुशली तम्. अभिज्ञान—that by which something is recognized; a token of recognition, कौलीनात्—For the derivation of कौलीन see com. when meaning 'an evil report' or scandal, it may rather be derived as कौ पृथिव्यां लीनं कुलीनं what is fit to be buried underground on account of its badness, तस्य भावः कौलीनं, Malli. takes the people's report to refer to his death, probably because the Yaksha's wife, being a Pativratā, would not believe in any other report about her husband, such as the transference of his love to another woman &c. But it is more natural to take the people's talk to refer to his having forgotten her or grown cold towards her on account of long absence and distance. This is certainly better in accord with the suspicion expressed in the preceding śloka and the word अविश्वासिनी and the idea expressed in स्नेहान् &c. असित—mark the meaning of अ;

' other than white '. *i. e.* dark. किमपि--for some reason (known to them only), *i. e.* we do not admit of it. Or किमपि may be taken, as the late Mr. Godbole proposes, with विरहे when there is separation owing to something or other. ध्वंसिनः--ध्वंसितुं शीलं येषां Perishable by nature. *Cf.* Bhartrihari--दौर्मन्त्र्यान्नृपतिर्विनश्यति... स्नेहः प्रवासाश्रयात् &c. Nitis. Notice the reading ह्रासिनः--wasting away, decreasing. तु-means here ' on the contrary ', expressing disagreement with the previous statement. अभोगात्--on account of their being not enjoyed, नञ् here is emphatic or प्रसज्यप्रतिषेध. According to writers on rhetorics there are two kinds of Negation (नञ्) *viz.* प्रसज्यप्रतिषेध and पर्युदास, अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥, *i. e.* that नञ् is called प्रसज्य० (emphatic) where the negation is prominent and not the affirmation, and the नञ् is expressed with the verb. Now the negation here must be taken as emphatic, and so it should not have been compounded. But sometimes such a नञ् is compounded, as is done by Pān. himself and Vamana while commenting on III. 3. 19, remarks--प्रसज्यप्रतिषेधेऽपि समासोऽस्ति ।. उपचितरसाः--what is not enjoyed grows by accumulation. The flavour of the fruits of affection not being tasted is heightened. प्रेम०--According to the Rasākara quoted in the com. प्रेक्षा means the desire to see a charming object &c. स्नेह is the evincing of liking for it, and प्रेम (the same developed) is what can brook no separation from it.

इत्थं स्वकुशलं संदिश्य तत्कुशलसंदेशानयनमिदानीं याचते—

आश्वास्यैवं[1] प्रथमविरहोदग्रशोकां[2] सखीं ते[3]
शैलादाशु[4] त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
[5]साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्[6]ममापि
प्रातः कुन्दप्रसवशिथिलं जीवितं धारयेथाः[7] ॥ ५३ ॥

53. Having thus consoled your friend (my wife) whose sorrow is intense, this being our first separation, and turned back at once from the mountain, the peaks of which are dug up by Śiva's bull, pray support my life also, hanging as loosely as a

---

१ ०स्यैनाम्. २ विरहादुग्रशोकाम्; विरहेणाग्रशोकाम्; विरहे शोकदृष्टाम् ३ मे, स्वाम्. ४ अस्मात्; तस्मादद्रेः. ५ साभिज्ञानं प्रहितवचनैस्तत्र युक्तैः. ६ त्वद्वचोभिः. ७ येदम्.

Kunda flower in the morning, reproducing her words of welfare sent along with tokens.

आश्वास्येति ॥ (**प्रथमविरहोदग्रशोकां**) प्रथमविरहेणोदग्रशोकां तीव्रदुःखां ते सखीम् एवं पूर्वोक्तरीत्या आश्वास्य उपजीव्य [**त्रिनयनवृषोत्खातकूटात्**] त्रिनयनस्य त्र्यम्बकस्य वृषेण वृषभेणोत्खाता अवदारिताः कूटाः शिखराणि यस्य तस्मात्। 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः। **शैलात्** कैलासात् **आशुनिवृत्तः** सन्प्रत्यावृत्तः सन् (**साभिज्ञानप्रहितकुशलैः**) साभिज्ञानं सलक्षणं यथा तथा प्रहितं प्रेरितं कुशलं येषु तैः (**तद्वचोभिः**) तस्यास्त्वत्सख्या वचोभिः। **मम अपि प्रातः** (**कुन्दप्रसवशिथिलं**) कुन्दप्रसवमिव शिथिलं **जीवितं धारयेथाः** स्थापय। प्रार्थनायां लिङ्॥

Śl. 53. **विरहोदग्र**--उद्गतमग्रमस्य उदग्रः with the point promicent. hence, excessie, intense. The Pārsvā. reads ०विरहे शोकदष्टां smitten by sorrow. **त्रिनयन०**--*Cf.* śl. I 54, and note on I. 2. **प्रातः कुन्दप्रसव०**---प्रसूयते इति प्रसवः fr. सू with प्र + अ (अच्); a flower. The *Kunda* flower blooms in the evening and get loosened in its stem in the morning.

संप्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं कल्पयति--

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
[1]प्रत्यादेशान्न खलु भवतो [2]धीरतां [3]कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं [4]याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ५४ ॥

54. Have you, O gentle one, undertaken to do this friendly service to me? (I hope you have). I do not, indeed, infer your gravity (firmness of purpose) from a reply in the affirmative (*i.e.* I do not want a reply in the affirmative to know that you have taken your resolve to do my business) (*or*, according to some—I do not think this your gravity is owing to the rejection of my suit); even without giving out a sound you give water to the Chātakas when petitioned (for it) : For, in the case of the good the very accomplishment of the desired object is their reply to the supplicants.

कच्चिदिति ॥ **हे सौम्य साधो इदं मे बन्धुकृत्यं** बन्धुकार्यं । देवदत्तस्य गुरुकुलमितिवत्प्रयोगः। [**त्वया**] **व्यवसितं कच्चित्** करिष्यामीति निश्चितं किम्।

---

१ प्रत्याख्यानात्, प्रत्याख्यातुम्, प्रत्यादेशम्, प्रत्याख्यानम्. २ अधीरतां. ३ तर्कयामि. ४ याचितम्.

'कच्चित्कामप्रवेदने' इत्यमरः । अभिप्रायज्ञापनं कामप्रवेदनम् । न च ते तूष्णीभावादनङ्गीकारं शङ्के यतस्ते स एवोचित इत्याह–प्रत्यादेशात् 'करिष्यामि' इति प्रतिवचनात् । 'उक्तिराभाषणं वाक्यमादेशो वचनं वचः इति' शब्दार्णवे । भवतः तव धीरतां गम्भीरत्वं न कल्पयामि न समर्थये खलु । तर्हि कथमङ्गीकारज्ञानं तत्राह याचितः सन् निःशब्दोऽपि निर्गर्जितोऽपि । अप्रतिजानानोऽपीत्यर्थः । चातकेभ्यः जलं प्रदिशसि ददासि । युक्तं चैतदित्याह–हि यस्मात् सतां सत्पुरुषाणां प्रणयिषु याचकेषु विषये ईप्सितार्थक्रियैव अपेक्षितार्थसंपादनमेव प्रत्युक्तं प्रतिवचनम् । क्रिया केवलमुत्तरमित्यर्थः । 'गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः । नीचो वदति न कुरुते न वदति सुजनः करोत्येव ॥' इति भावः ॥

Śl. 54. कच्चित्—is used to express hope on the part of the speaker, the reply expected being according to his wish. It is interrogative in form. व्यवसितं—*p. p. p.* of सो with वि and अव; resolved upon, undertaken. 'Have you undertaken this? I hope you have.' प्रत्यादेशात्—This reading has puzzled many a commentator. Prof, Iśvarachandra prefers the reading प्रत्यादेश न &c. this may also be written as प्रत्यादेश । and the mistake might have been originally made by some copyist writing down प्रत्यादेशान्न for प्रत्यादेशन्न. With this reading the coustruction becomes easier भवतो धीरतां प्रत्यादेशं न कल्पयामि I do not regard your gravity (remaining silent) as a refusal or rejection of my request. The meaning (प्रत्यादेशो निराकृति) will do. प्रत्यादेशात् भवतो धीरता इति न &c. See trans. According to Malli. the meaning is I do not consider धीरता to exist in you from your giving a reply in the affirmative. *i. e.* I know that you are धीर although you do not reply to me in the affirmative. In any case the Yaksha's meaning is this—Great men are धीर (grave). They do not say in words, like ordinary men, what they will do. Their very greatness speaks for them; for सन्तः स्वयं परहितेषु कृताभियोगाः (Bhartrihari); and स्वार्थात्सतां गुरुतरा प्रणयिक्रियैव Vik. IV. 15. So I take for granted that you have undertaken the task. निःशब्द—silent—(1) without thunder; (2) without saying 'I will give.' प्रदिशसि–you give; *cf.* for this sense बलिप्रदिष्टां श्रियमाददानः Ragh. VII. 35. प्रत्युक्तं—a reply. ईप्सितार्थं०–ईप्सित *p.p.p.* of the Desid of आप् (ईप्सति) desired to be got. *Cf.* नीचो वदति न कुरुते न वदति साधुः करोत्येव। "We cannot halp pausing here to remark the ingenuity of the poet in the conduct of his work. He sets out with excusing the apparent absurdity of Yaksha's addressing him self to a cloud as to a rational being, by introducing a pleasing and natural sentiment

The colud has now received his charge, and something is expected by way of reply, expressive either of refusal or assent. To have given the cloud anything like the faculty of speech, would have been straining probability over-much; and we see in the above lines with what neatness Kālidāsa has extricated himself from the dilemma."—Wilson.

संप्रति स्वापराधसमाधानपूर्वकं स्वकार्यस्यावश्यंकरणं प्रार्थयमानो मेघं विसृजति—

एतत्कृत्वा प्रियम[1]नुचितप्रार्थनावर्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान्देशाञ्जलद विचर प्रावृषा संभृतश्री-
र्मा भूदेवं [2]क्षणमपि [3]च ते विद्युता विप्रयोगः ॥ ५५ ॥

55. Having done this favour to me, who have addressed a request unworthy of you, either through friendship or out of compassion for me, because I am separated, wander, O cloud, with your splendour enhanced by the rainy season, over regions desired by you. May you not suffer, like me, separation even for a moment from lightning (your wife)!"

एतदिति ॥ हे जलद सौहार्दात् सुहृद्भावात् । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य

१ प्रियमनुचितं प्रार्थनादात्मनः, प्रियसमुचितं प्रार्थनादात्मनः, प्रियसमुचितं प्रार्थनं चेतसः, प्रियमनुचितं प्रार्थनात्मनः, प्रियसमुचितं प्रार्थितं चेतसः. २ क्वचिदपि न. ३ सखे.

५५ श्लोकस्यान्त इमे प्रक्षिप्ता दृश्यन्ते—

"इत्याख्यांते सुरपतिसखः शैलकुल्यापुरीषु
स्थित्वा स्थित्वा धनपतिपुरीं वासरैः कैश्चिदाप ।
मत्वाऽगारं कनकरुचिरं लक्षणैः पूर्वमुक्तै-
स्तस्योत्सङ्गं क्षितितलगतां तां च दीनां ददर्श ॥
तस्मादद्रेर्निगदितमथो (पथा) शीघ्रमेत्यालकायां
यक्षागारं विगलितनिभं दृष्टचिह्नैर्विदित्वा ।
यत्संदिष्टं प्रणयमधुरं गुह्यकेन प्रयत्ना-
त्तद्गेहिन्या सकलमवदत्कामरूपी पयोदः ॥
तं संदेशं जलधरवरो दिव्यवाचाऽऽचचक्षे
प्राणांस्तस्या जनहितरतो रक्षितुं यक्षवध्वाः ।
प्राप्योदन्तं प्रमुदितमनाः साऽपि तस्थौ स्वभर्तुः
केषां न स्यादभिमतफला प्रार्थना ह्युत्तमेषु (ह्युन्नतेषु) ॥

च । ' इत्युभयपदवृद्धिः । विधुरः वियुक्तः इति हेतोः वा । ' विधुरं तु प्रविश्लेषे ' इत्यमरः । मयि विषये अनुक्रोशबुद्धया करुणाबुद्धया वा । [अनुचितप्रार्थनावर्तिनः] अनुचिता तवाननुरूपा या प्रार्थना प्रियां प्रति ' संदेशं मे हर ' इत्येवंरूपा तत्र वर्तिनो निर्बन्धपरस्य मे मम एतत् संदेशहरणरूपं प्रियं कृत्वा संपाद्य । प्रावृषा वर्षाभिः । ' स्त्रियां प्रावृट् स्त्रियां भूम्नि वर्षाः ' इत्यमरः । संभृतश्रीः उपचितशोभाः सन् इष्टान् स्वाभिलषितान् देशान् विचर । यथेष्टदेशेषु विहरेत्यर्थः । ' देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् । ' इति वचनात्कर्मत्वम् । एवं मद्वत् क्षणमपि च स्वल्पकालमपि ते तव विद्युता । कलत्रेणेति शेषः । विप्रयोगः विरहः मा भूत् माऽस्तु । माङीत्याशिषि लुङ् । ' अन्ते काव्यस्य नित्यत्वात्कुर्यादाशिषमुत्तमाम् । सर्वत्र प्राप्यते विद्वान्नायकेच्छानुरूपिणीम् ॥ ' इति सारस्वतालंकारे दर्शनात्काव्यान्ते नायकेच्छानुरूपोऽयमाशीर्वादः प्रयुक्त इत्यनुसंधेयम् ॥

Śl. 55. अनुचित०–वर्तिनः sticking to, pressingly addressing my request &c. Messrs. Pathak and Nandargikar read–प्रियमनुचितं प्रार्थनादात्मनः with Malli.'s com: on it as आत्मनः तव अनुचितम् अननुरूप मपि...प्रार्थनात् कृत्वा &c. So Malli.'s appears to have commented on both the readings; we have, however, preferred the one given in the text; for in the case of other reading, अनुचितं goes with प्रियं; but it was not the प्रिय that was अनु० but its करण by the cloud. It does, however, better fit in with प्रार्थना. Again, we have to take the word प्रार्थना as प्रार्थन् which is not of so frequent occurrence as the word प्रार्थना. सौहार्दात्––सुहृदो भावः सौहार्द friendship. fr. सुहृद् + अ (अण्) ; in the case of Comp. bases ending in the words हृद्, भग, and सिंधु the initial vowels of both the members take Vriddhi before affixes having ञ्, ण or क्, as their indicatory letters So सौभाग्यं साक्तुसैंधवः &c. विधूरः––विगता धूर्यस्य love-lorn: one separated. *Cf.* मयि च विधुरे भावः कान्ताप्रवृत्तिपराङ्मुखः । Vik. IV. 20 : विधुरां ज्वलनातिसर्जनान्ननु मां प्रापय पत्युरन्तिकम् । Kum. IV. 32. अनुक्रोश–अनुक्रोशति अनेन; fr. क्रुश with अनु+अ (घञ्) that by which one cries after another (out of sympathy): hence, merch, compassion. विद्युता *i.e.* with his wife; *cf.* कच्चित्सौम्य प्रियसहचरी विद्युदालिङ्गति त्वाम् । Māl. Mādh. IX 25. The pronouncement of the blessing marks the close of the poem, forming what is called the Bharatavākya of the dramas.

श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः
शापस्यान्तं सदयहृदयः संविधायास्तकोपः ।

संयोज्यैनौ विगलितशुचौ दंपती हृष्टचित्तौ
भोगानिष्टानविर (निम) ततसुखं भोजयामास शश्वत् ॥
इत्थंभूतं सुरचितपदं मेघदूताभिधानं
कामक्रीडाविरहतजने विप्रयोगे विनोदः ।
मेघस्यास्मिन्नतिनिपुणताबुद्धिभावः कवीनां
नत्वाऽऽर्यायाश्चरणकमलं कालिदासश्चकार ॥

(*Additional Verses at the end of Sl. 55*).

These verses, it will be easily seen, cannot form part of the poem, as the poet has formally closed it with the 55th verse : They were composed by some writers in imitaion of Kālidāsa's style, and smuggled into his work. All the best commentators of the Megh. thought them to be spurious and did not write their commentaries on them. Only Kalyāṇamalla has written a com. on the verse श्रुत्वा वार्तां &c., which is the best of the five and makes the nearest approach to Kālidāsa's style. The student will see from Wilson's remark on the preceding śloka how it was absurd to make the cloud actually deliver the message. The poet's own remark संदेशार्थाः क्व पटुकरणैः &c. (I.)—-precludes such a possibillity.

(1) सुरपतिसुखः—-the cloud. शैलकुल्यापुरीषु स्थित्वा स्थित्वा–halting at various mountains, rivers and towns (as directed by the Yaksha). मत्वा अगारं—knowing–recognizing—the house. तस्योत्सङ्गे in its interior.

(2) निगदितुमथो—*v.l.* निगदितपथः ' to whom the way was pointed out. प्रणयमधुरं–sweet by the feeling of love.

(3) जनहितरतः—-devoted to the good of the people. This explains why he wanted to save her life. अभिमतफला—-अभिमतं फलं यस्याः

(4) अविरतसुखम्—अविरतं unceasing, continuous सुखं यस्मिन्.

(5) This very poor verse is found in a MS. consulted by Mr. Nandargikar, where it is stated to have been composed by poet who called himself जयमंदीरच्छात्र.

After śl. 55, the following 5 additional ślokas are read by some—

When this much was said, the cloud (*lit.* the friend of Indra, the God of rain) having halted repeatedly on hills, near rivers, and in cities, arrived after a few days in Alaka, the capital of

Kubera; and having recognized the (Yaksha's) abode, bright like gold, from the signs told before, he saw also his afflicted wife, lying on the ground on the terrace of that (mansion).

Then the cloud that assumed any form at will, wishing to communicate the message, came to Alaka from that mountain and having recognized the Yaksha's residence, with its splendour gone, from the signs observed, communicated to his wife all that Yaksha had taken pains to say and that was sweet with love (owing to the spirit of love it breathed).

The noble cloud, devoted to the good of the people, delivered in divine words the message, in order to save the life of that wife of the Yaksha and she, too, on getting intelligence of her lord, became delighted at heart: For whose request, when addressed to the noble-minded (*or*, magnanimous), does not bear the desired fruit (fulfil the desired object).

The lord of wealth (Kubera), on hearing the news told by the cloud, his heart filled with pity and his anger gone, put an end to the curse, and having united husband and wife, whose sorrow now disappeared and who were delighted at heart, made them enjoy pleasures desired by them, in a manner to yield uninterrupted happiness.

The poet Kālidsāa, having bowed to the lotus-like feet of the goddess (Kāli), composed the foregoing poem, called *Meghadūta* having its words well arranged. It serves as a diversion, in separation, to couples who have been robbed of the pleasures of love, and in it is to be seen the very perfect intelligence displayed by the cloud.

इति श्रीमहोपाध्यायमल्लिनाथसूरिविरचितया संजीविनीसमाख्यया
व्याख्यया समेते महाकविश्रीकालिदासविरचिते
मेघदूतकाव्य उत्तरमेघः समाप्तः ॥

श्लोकसूची ।

Neena

APPENDIX


No. I

Index of Geographical Names Occurring in The Pūrvamegha

ERRATUM

Page	*Line*	*Erratum*	*Correct form*
१०	३५	Vik. IV. p.	Vik IV. p. 182
२४	८	Vik. II. p	**Vik** II p. 94
२४	१२	Sak. V p.	Sak. V. p. 184
२९	२	अवानम्	अध्वानम्
३४	११	भ्रुविलास०	भ्रूविलास०
४०	४	मादाय	तोयमादाय
५२	२९	of the......of	of the mountains of
५८	२८	Vik. II. p.	Vik. II. p. 106
६९	११	आनुगागम्श्च	आनुगागमश्च
७३	३०	प्रालेयार	प्रालेयास्त्रं
७४	१५	नश्यन्ति च	नश्यन्ति रौरवं च
८२	१०	अत इञ् । तस्य	'अत इञ् । इति इञ् तस्य
८३	२९	व्यालम्बेथा. ।	व्यालम्ब्रेथाः ।
९४	३१	शुभ्रांत्रिनयन०	शुभ्रांत्रिनयन[1]
९८	३१	प्रथमानां पदं......	प्रमथानां पदं......
		प्रथमसंख्यौघाः	प्रमथसंख्यौघाः
९९	२६	Śak IV. p	Śak IV. p. 140
१००	१६	त्रितय च'	त्रितये च'
१०८	२९	एकायतोऽनुकूलः	एकायत्तोऽनुकूलः
११४	३२	०विन्द्रद्रममोर--	०विन्दद्रुममोर—
१२३	२७	रञा कद्रव्यम्	रञ्जकद्रव्यम्
१४९	१८	तत्पर्यंनप्रगलितलवैः	तत्पर्यन्तप्रगलितलवैः
१५४	१५	शृंगार	शृङ्गार
१५७	१७	मद्रीयैः	मदीयैः
१५९	२२	शङखनी	शङ्खिनी
१७३	५	द्विक्तिः	द्विरुक्तिः
१७४	१५	पर्यावर्तत	पर्यावर्तेते
१८१	१६	प्रत्यादेश ।	प्रत्यादेशन्न

मेघदूते निर्दिष्टानि स्थलानि दर्शयन् आलेखः



स्थलनाम	श्लोक क्र.	स्थलनाम	श्लोक क्र.
रामगिरि	१	सिप्रा	३२
अलका	७	गन्धवती	३९
कैलास	११	गम्भीरा	४३
मानस	११	देवगिरि	४५
माल	१६	चर्मण्वती	४८
आम्रकूट	१७	दशपुर	५०
रेवा, विन्ध्य	१९	कुरुक्षेत्र	५१
दशार्ण	२४	ब्रह्मावर्त	५१
विदिशा	२५	सरस्वती	५२
वेत्रवती	२५	कनखल	५३
नीचैर्गिरि	२६	जाह्नवी	५३
वननदी	२७	यमुना	५४
उज्जयिनी	२८	हिमालय	५५
निर्विन्ध्या	२९	श्रीचरव्यास	५९
सिन्धु	३०	कौञ्चरन्ध्र	६०
विशाला	३१	कैलास	६१
अवन्ति	३१		

मेघदूते, भूवर्णनम्

स्थलानाम् आधुनिकानि नामानि

क्र०	पुरातनं नाम	आधुनिकं नाम
१	रामगिरि	रामटेक
२	उज्जयिनी	उज्जैन
३	वेत्रवती	बेतवा
४	आम्रकूट	अमरकण्टक
५	दशार्ण	दसान
६	देवगिरि	देवगढ़
७	दशपुर	मदसोर
८	कनखल	कनखल
९	क्रौञ्चरन्ध्र	
१०	कैलास	कैलास पर्वत
११	चमण्वती	चंबल
१२	मानस सरोवर	मानसरोवर
१३	सिप्रा	सिप्रा, क्षिप्रा
१४	विन्ध्यपाद	विन्ध्य